॥ पञ्चमाध्यायस्य प्रथमः पादः ॥

प्राक् क्रीताच्छः ॥ १ ॥

'तेन क्रीतम्' (५.१.३७) इति वक्ष्यति। प्रागेतस्मात् क्रीतसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः, छप्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति—'तस्मै हितम्' (५.१.५) इति। वत्सेभ्यो हितो वत्सीयो गोधुक्। करभीय उष्ट्रः। अकरभीयः। अवत्सीयः। अर्थोऽवधित्वेन गृहीतः, न प्रत्ययः। तेन प्राक् ठञः छ इति नोक्तम्॥

उगवादिभ्यो यत् ॥ २ ॥

प्राक् क्रीतादित्येव। उवर्णान्तात् प्रातिपदिकाद् गवादिभ्यश्च यत् प्रत्ययो भवति प्राक्क्रीतीयेष्वर्थेषु। छस्यापवादः। शङ्क्व्यं दारु। पिचव्यः कार्पासः। कमण्डलव्या मृत्तिका। गवादिभ्यः खल्वपि—गव्यम्। हविष्यम्। सनड्गुर्नाम चर्मविकारः। ततः परत्वात् 'चर्मणोऽञ्' (५.१.१५) इत्येष विधिः प्राप्नोति। तथा चरुर्नाम हविः, सक्तुरन्नविकारः। अपूपादिषु 'अन्नविकारेभ्यश्च' (ग० सू० १११) इति पठ्यते। ततो 'विभाषा हविरपूपादिभ्यः' (५.१.४) इत्येष विधिः प्राप्नोति। तत्र सर्वत्र पूर्वविप्रतिषेधेन यत् प्रत्यय एवेष्यते—सनड्व्यं चर्म, चरव्यास्तण्डुलाः, सक्तव्या धाना इति। गवादिषु 'नाभि नभं च' (ग० सू० १०८) इति पठ्यते। तस्यायमर्थः—नाभिशब्दो यत्प्रत्ययमुत्पादयति, नभं चादेशमापद्यत इति। नाभये हितो नभ्योऽक्षः। नभ्यमञ्जनम्। यस्तु शरीरावयवो नाभिशब्दः, ततः 'शरीरावयवाद् यत्' (५.१.६) इति यति कृते नाभये हितं नाभ्यं तैलमिति भवितव्यम्। गवादिषु यता सन्नियुक्तो नभभावोऽत्र न भवति॥ गो। हविस्। बर्हिष्। खट। अष्टका। युग। मेधा। स्रक्। नाभि नभं च (ग० सू० १०८)। शुनः संप्रसारणं वा च दीर्घत्वं तत्सन्नियोगेन चान्तोदात्तत्वम् (ग० सू० १०६)—शुन्यम्, शून्यम्। चकारस्यानुक्तसमुच्चयार्थत्वाद् 'नस्तद्धिते' (६.४.१४४) इति लोपो न स्यात्। ऊधसोऽनङ् च (ग० सू० ११०)—ऊधन्यः। कूप। उदर। खर। स्खद। अक्षर। विष। गवादिः॥

कम्बलाच्च संज्ञायाम् ॥ ३ ॥

कम्बलात् प्राक्क्रीतीयेष्वर्थेषु यत् प्रत्ययो भवति संज्ञायां विषये। छस्यापवादः। कम्बल्यमूर्णापलशतम्। संज्ञायामिति किम् ? कम्बलीया ऊर्णा॥

---

१ - ' कूपः ' इत्यपपाठो मुद्रितेषु । गणशब्दोऽयम्, नोधन्यविशेष्यः ।

२ - ' उदर ' इति नास्ति है०।

विभाषा हविरपूपादिभ्यः ॥ ४ ॥

हविर्विशेषवाचिभ्योऽपूपादिभ्यश्च प्रातिपदिकेभ्यः प्राक्क्रीतीयेष्वर्थेषु विभाषा यत् प्रत्ययो भवति। आमिक्ष्यं दधि, आमिक्षीयं दधि। पुरोडाश्यास्तण्डुलाः, पुरोडाशीयाः। हविश्शब्दात्तु गवादिपाठाद् नित्यमेव भवति। अपूपादिभ्यः—अपूप्यम्, अपूपीयम्। तण्डुल्यम्, तण्डुलीयम्॥ अपूप। तण्डुल। अभ्यूष। अभ्योष। पृथुक। अभ्येष। अर्गल। मुसल। सूप। कटक। कर्णवेष्टक। किण्व। अन्नविकारेभ्यश्च (ग० सू० १११)। पूप। स्थूणा। पीप। अश्व। पत्र। अपूपादिः॥

तस्मै हितम् ॥ ५ ॥

तस्मा इति चतुर्थीसमर्थाद् हितमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। वत्सेभ्यो हितो गोधुक् वत्सीयः। अवत्सीयः। पटव्यम्। गव्यम्। हविष्यम्। अपूप्यम्, अपूपीयम्॥

शरीरावयवाद् यत् ॥ ६ ॥

शरीरं प्राणिकायः। शरीरावयववाचिनः प्रातिपदिकाद् यत् प्रत्ययो भवति तस्मै हितमित्येतस्मिन् विषये। छस्यापवादः। दन्त्यम्। कण्ठ्यम्। ओष्ठ्यम्। नाभ्यम्। नस्यम्॥

खलयवमाषतिलवृषब्रह्मणश्च ॥ ७ ॥

खलादिभ्यो यत् प्रत्ययो भवति तस्मै हितमित्येतस्मिन् विषये। छस्यापवादः। खलाय हितं खल्यम्। यव्यम्। माष्यम्। तिल्यम्। वृष्यम्। ब्रह्मण्यम्। वृष्णे हितम्, ब्राह्मणेभ्यो हितमिति वाक्यमेव भवति। छप्रत्ययोऽपि न भवति, अनभिधानात्। चकारोऽनुक्तसमुच्चयार्थः। रथाय हिता रथ्या॥

अजाविभ्यां थ्यन् ॥ ८ ॥

अज अवि इत्येताभ्यां थ्यन् प्रत्ययो भवति तस्मै हितमित्येतस्मिन् विषये। छस्यापवादः। अजथ्या यूथिः। अविथ्या॥

आत्मन्विश्वजनभोगोत्तरपदात् खः ॥ ९ ॥

आत्मन् विश्वजन इत्येताभ्यां भोगोत्तरपदात् च प्रातिपदिकात् खः प्रत्ययो भवति तस्मै हितमित्येतस्मिन् विषये। छस्यापवादः। आत्मन्निति नलोपो न कृतः प्रकृति-

परिमाणज्ञापनार्थम्। तेनोत्तरपदग्रहणं भोगशब्देनैव संबध्यते, न तु प्रत्येकम्। आत्मने हितम् आत्मनीनम् (पै० सं० ५.११.८)। 'आत्माध्वानौ खे' (६.४.१६९) इति प्रकृतिभावः। विश्वजनेभ्यो हितं विश्वजनीनम्। कर्मधारयादेवेष्यते। षष्ठीसमासाद् बहुव्रीहेश्च छ एव भवति। विश्वजनाय हितं विश्वजनीयम्॥ पञ्चजनादुपसंख्यानम्॥ पञ्चजनात् च खः। अत्रापि कर्मधारयादिष्यते। पञ्चजनीनम्। अन्यत्र पञ्चजनीयम्॥ सर्वजनाट् ठञ् खश्च॥ सार्वजनिकम्, सर्वजनीनम्। अत्रापि कर्मधारयादेव—सर्वजनीयमन्यत्र ॥ महाजनाद् नित्यं ठञ् वक्तव्यः॥ महाजनाय हितं माहाजनिकम्। तत्पुरुषादेव। बहुव्रीहेस्तु छ एव भवति। महाजनीयम्। भोगोत्तरपदात् खल्वपि—मातृभोगीणः। पितृभोगीणः। भोगशब्दः शरीरवाची। केवलेभ्यो मात्रादिभ्यश्छ एव भवति। मात्रीयम्। पित्रीयम् ॥ राजाचार्याभ्यां तु नित्यम्॥ भोगोत्तरपदाभ्यामेव खः प्रत्यय इष्यते, न केवलाभ्याम्। राजभोगीनः॥ आचार्यादणत्वं च॥ आचार्यभोगीनः। केवलाभ्यां वाक्यमेव भवति—राज्ञे हितम्, आचार्याय हितमिति॥

सर्वपुरुषाभ्यां णढञौ ॥ १० ॥

सर्वपुरुषाभ्यां यथासंख्यं णढञौ प्रत्ययौ भवतः तस्मै हितमित्येतस्मिन् विषये। छस्याप- वादः। सर्वस्मै हितं सार्वम्। पौरुषेयम् ॥ सर्वाद् णस्य वा वचनम् ॥ सर्वीयम् ॥ पुरुषाद् वधविकारसमूहतेनकृतेष्विति वक्तव्यम्॥ पौरुषेयो वधः, पौरुषेयो विकारः, पौरुषेयः समूहो वा। तेन कृते—पौरुषेयो ग्रन्थः॥

माणवचरकाभ्यां खञ् ॥ ११ ॥

माणवचरकशब्दाभ्यां खञ् प्रत्ययो भवति तस्मै हितमित्येतस्मिन् विषये। छस्यापवादः। माणवाय हितं माणवीनम्। चारकीणम्॥

तदर्थं विकृतेः प्रकृतौ ॥ १२ ॥

प्रकृतिरुपादानकारणम्, तस्यैव उत्तरमवस्थान्तरं विकृतिः। विकृतिवाचिनः प्रातिपदिकात् प्रकृतावभिधेयायां यथाविहितं प्रत्ययो भवति। तदर्थमिति प्रत्ययार्थविशेषणम्। तदिति सर्वनाम्ना विकृतिः परामृश्यते। विकृत्यर्थायां प्रकृतौ प्रत्ययः। तदर्थग्रहणेन प्रकृतेरनन्यार्थता- ख्यायते। न प्रकृतिविकारसंभवमात्रे प्रत्ययः। किं तर्हि ? प्रकृतेरनन्यार्थत्वे विवक्षिते। प्रत्ययार्थस्य च तदर्थत्वे सति सामर्थ्यात् लभ्या चतुर्थी समर्थविभक्तिः। केचित् तु 'तस्मै हितम्' (५.१.५) इत्यनुवर्तयन्ति। अङ्गारेभ्यो हितान्येतानि काष्ठानि अङ्गारीयाणि काष्ठानि। प्राकारीया इष्टकाः। शङ्कव्यं दारु। पिचव्यः कार्पासः। तदर्थमिति किम् ?

यवानां धानाः। धानानां सक्तवः। प्रकृत्यन्तरनिवृत्तिरत्र विवक्षिता न तादर्थ्यम्—धानानां सक्तवः, न लाजानामिति। विकृतेरिति किम् ? उदकार्थः कूपः। विकृतिग्रहणेऽक्रियमाणे या काचित् प्रकृतिर्गृह्यते, नोपादानकारणमेव। भवति च कूप उदकस्य प्रकृतिः, तत्रोत्पादनात्। न तूदकं तस्य विकृतिः, अत्यन्तभेदात्। प्रकृताविति किम् ? अस्यर्था कोशी। असिरयसो विकृतिर्भवति, न तु कोशी तस्य प्रकृतिर्भवति। द्वयोरपि प्रकृतिविकृत्योर्ग्रहणे विवक्षितः प्रकृतिविकारभावो लभ्यते॥

छदिरुपधिबलेर्ढञ् ॥ १३ ॥

छदिरादिभ्यः शब्देभ्यो ढञ् प्रत्ययो भवति तदर्थं विकृतेः प्रकृतावित्येतस्मिन् विषये। छस्यापवादः। छादिषेयाणि तृणानि। औपधेयं दारु। बालेयास्तण्डुलाः। उपधिशब्दात् स्वार्थे प्रत्ययः। उपधीयत इत्युपधिः रथाङ्गम्। औपधेयमपि तदेव दारु॥

ऋषभोपानहोर्ञ्यः ॥ १४ ॥

ऋषभ उपानह् इत्येताभ्यां ञ्यः प्रत्ययो भवति तदर्थं विकृतेः प्रकृतावित्येतस्मिन् विषये। छस्यापवादः। आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। चर्मण्यपि प्रकृतित्वेन विवक्षिते पूर्वविप्रतिषेधादयमेवेष्यते। औपानह्यं चर्म॥

चर्मणोऽञ् ॥ १५ ॥

चर्मण इति षष्ठी। चर्मणो या विकृतिः तद्वाचिनः प्रातिपदिकादञ् प्रत्ययो भवति तदर्थं विकृतेः प्रकृतावित्येतस्मिन् विषये। छस्यापवादः। वार्ध्रं चर्म। वारत्रं चर्म॥

तदस्य तदस्मिन् स्यादिति ॥ १६ ॥

तदिति प्रथमा समर्थविभक्तिः, अस्येति प्रत्ययार्थः, स्यादिति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः। एवं द्वितीयेऽपि वाक्ये। सप्तम्यर्थे तु प्रत्यय इत्येतावान् विशेषः। प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति, यत् तत् प्रथमासमर्थं स्यात् चेत् तद् भवति। इतिकरणस्ततश्चेद् विवक्षा। प्राकार आसामिष्टकानां स्यात् प्राकारीया इष्टकाः। प्रासादीयं दारु। सप्तम्यर्थे खल्वपि—प्राकारोऽस्मिन् देशे स्यात् प्राकारीयो देशः। प्रासादीया भूमिः। स्यादिति संभावनायां लिङ् 'संभावनेऽलमिति चेद्०' (३.३.१५४) इत्यादिना। इष्टकानां बहुत्वेन तत् संभाव्यते—प्राकार आसामिष्टकानां स्यादिति। देशस्य च गुणेन संभाव्यते—प्रासादोऽस्मिन् देशे स्यादिति। प्रकृतिविकारभाव-स्तादर्थ्यं चेह न विवक्षितम्। किं तर्हि ? योग्यतामात्रम्। तेन पूर्वस्यायमविषयः। द्विस्तद्ग्रहणं न्यायप्रदर्शनार्थम्—अनेकस्मिन् प्रत्ययार्थे प्रत्येकं समर्थविभक्तिः संबन्धनीयेति।

अथेह कस्माद् न भवति—प्रासादो देवदत्तस्य स्यादिति, गुणवानयम्, संभाव्यते प्रासाद-लाभोऽस्येति ? इतिकरणो विवक्षार्थ इत्युक्तम् ॥

परिखाया ढञ् ॥ १७ ॥

परिखाशब्दाद् ढञ् प्रत्ययो भवति तदस्य तदस्मिन् स्यादित्येतस्मिन् अर्थे। छस्याप-वादः। पारिखेयी भूमिः। छयतोः पूर्णोऽवधिः। इतः परमन्यः प्रत्ययो विधीयते॥

प्राग्वतेष्ठञ् ॥ १८ ॥

'तेन तुल्यं क्रिया चेद् वतिः' (५.१.११५) इति वक्ष्यति। प्रागेतस्माद् वतिसंशब्द-नाद् यानित ऊर्ध्वमनुक्रमिष्यामः, ठञ् प्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति—'पारायण-तुरायणचान्द्रायणं वर्तयति' (५.१.७२)—पारायणिकः। तौरायणिकः। चान्द्रायणिकः॥

आर्हादगोपुच्छसंख्यापरिमाणाट् ठक् ॥ १९ ॥

'तदर्हति' (५.१.६३) इति वक्ष्यति। आ एतस्मादर्हसंशब्दनाद् यानित ऊर्ध्वमनु-क्रमिष्यामः, ठक् प्रत्ययस्तेष्वधिकृतो वेदितव्यो गोपुच्छादीन् वर्जयित्वा। अभिविधावय-माकारः, तेनार्हत्यर्थेऽपि ठग् भवत्येव। ठञधिकारमध्ये तदपवादः ठग् विधीयते। वक्ष्यति—'तेन क्रीतम्' (५.१.३७)—नैष्किकम्। पाणिकम्। अगोपुच्छसंख्यापरिमाणादिति किम्? गोपुच्छेन क्रीतं गौपुच्छिकम्। संख्या—षाष्टिकम्। परिमाण—प्रास्थिकम्। कौड- विकम्। ठञ् प्रत्युदाहियते। संख्यापरिमाणयोः को विशेषः ? भेदगणनं संख्या एकत्वादिः। गुरुत्वमानमुन्मानं पलादि। आयाममानं प्रमाणं वितस्त्यादि। आरोहपरिणाहमानं परिमाणं प्रस्थादि।

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः।
आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः॥

असमासे निष्कादिभ्यः ॥ २० ॥

आर्हादित्येव। निष्कादिभ्यः शब्देभ्योऽसमासे ठक् प्रत्ययो भवत्यार्हीयेष्वर्थेषु। ठञोऽ- पवादः। नैष्किकम्। पाणिकम्। पादिकम्। माषिकम्। असमास इति किम् ? द्विनैष्किकम्। त्रिनैष्किकम्। ठञेव भवति, 'परिमाणान्तस्या०' (७.३.१७) इत्युत्तरपदवृद्धिः। अथ किमर्थमसमास इत्युच्यते, यावता 'ग्रहणवता प्रातिपदिकेन तदन्तविधिः प्रतिषिध्यते' (परि० ३१) ? निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्ताप्रतिषेधस्य। 'उगवादिभ्यो

---

१ - ' तेनार्हत्यर्थोऽपि ' इति मुद्रितेषु। २ - ' परमनैष्किकम्, उत्तमनैष्किकम्' इत्यपपाठो मुद्रितेषु ।

यत्' (५.१.२)—गव्यम्। सुगव्यम्। अतिसुगव्यम्। 'विभाषा हविरपूपादिभ्यः' (५.१.४)—अपूप्यम्, अपूपीयम्। यवापूप्यम्, यवापूपीयम्। 'शरीरावयवाद् यत्' (५.१.६)—दन्त्यम्, राजदन्त्यमित्येवमादि सिद्धं भवति। इत उत्तरं च संख्यापूर्वपदानां तदन्तविधिरिष्यते। 'पारायणतुरायणचान्द्रायणं वर्तयति' (५.१.७२)—द्वैपारायणिकः। त्रैपारायणिकः। लुगन्तायास्तु प्रकृतेर्नेष्यते। द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम्। त्रिशूर्पम्। द्विशूर्पेण क्रीतमिति तदन्तविधिप्रतिषेधात् 'शूर्पादञन्यतरस्याम्' (५.१.२६) इत्यञ् न भवति। सामान्यविहितष्ठञेव भवति। द्विशौर्पिकम्। ठञो द्विगुं प्रत्यनिमित्तत्वाद् लुगभावः। तथा चोक्तम्—'प्राग् वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (महाभाष्य-वा० ५.१.२०) इति॥ निष्क। पण। पाद। माष। वाह। द्रोण। षष्टि। निष्कादिः॥

शताच्च ठन्यतावशते ॥ २१ ॥

आर्हादित्येव। शतशब्दात् ठन्यतौ प्रत्ययौ भवतोऽशतेऽभिधेय आर्हीयेष्वर्थेषु। कनोऽपवादः। शतेन क्रीतं शतिकम्। शत्यम्। अशत इति किम् ? शतं परिमाणमस्य शतकं निदानम्। प्रत्ययार्थोऽत्र संघः शतमेव वस्तुतः प्रकृत्यर्थाद् न भिद्यते। इह तु न भवति—शतेन क्रीतं शत्यं शाटकशतम्, शतिकं शाटकशतमिति। वाक्येन ह्यत्र प्रत्ययार्थस्य तत्त्वं गम्यते, न श्रुत्या। तथा चोक्तम्—'शतप्रतिषेधेऽन्यशतत्वेऽप्रतिषेधः' (महाभाष्य-वा० ५.१.२१) इति। चकारोऽसमास इत्यनुकर्षणार्थः। द्वौ च शतं च द्विशतम्, द्विशतेन क्रीतं द्विशतकम्। त्रिशतकम्। 'प्राग् वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (महाभाष्य-वा० ५.१.२०) इत्यनया इष्ट्या समासादपि प्राप्नोति॥

संख्याया अतिशदन्तायाः कन् ॥ २२ ॥

आर्हादित्येव। संख्याया अत्यन्ताया अशदन्तायाश्च कन् प्रत्ययो भवत्यार्हीयेष्वर्थेषु। ठञोऽपवादः। पञ्चभिः क्रीतः पञ्चकः पटः। बहुकः। गणकः। अतिशदन्ताया इति किम्? साप्ततिकः। चात्वारिंशत्कः। अर्थवतस्तिशब्दस्य ग्रहणाद् डतेः पर्युदासो न भवति। कतिकः॥

वतोरिड् वा ॥ २३ ॥

वत्वन्तस्य संख्यात्वात् कन् सिद्ध एव, तस्य त्वनेन वा इडागमो विधीयते। वतोः परस्य कनो वा इडागमो भवत्यार्हीयेष्वर्थेषु। तावतिकः, तावत्कः। यावतिकः, यावत्कः॥

विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम् ॥ २४ ॥

विंशतित्रिंशद्भ्यां ड्वुन् प्रत्ययो भवत्यसंज्ञायां विषय आर्हीयेष्वर्थेषु। विंशकः।

त्रिंशकः। 'ति विंशतेर्डिति' (६.४.१४२) इति तिलोपः। असंज्ञायामिति किम् ? विंशतिकः। त्रिंशत्कः। कथं पुनरत्र कन्, यावता अतिशदन्ताया इति पर्युदासेन भवितव्यम्? योगविभागः करिष्यते—विंशतित्रिंशद्भ्यां कन् प्रत्ययो भवति, ततो ड्वुन्नसंज्ञायामिति॥

कंसाट् टिठन् ॥ २५ ॥

कंसाट् टिठन् प्रत्ययो भवत्यार्हीयेष्वर्थेषु। ठञोऽपवादः। टकारो ङीबर्थः। इकार उच्चारणार्थः। नकारः स्वरार्थः। कंसिकः। कंसिकी॥ अर्धाच्चेति वक्तव्यम्॥ अर्धिकः। अर्धिकी ॥ कार्षापणाट् टिठन् वक्तव्यः॥ कार्षापणिकः। कार्षापणिकी॥ प्रतिशब्दश्चास्यादेशो वा वक्तव्यः॥ प्रतिकः। प्रतिकी॥

शूर्पादञन्यतरस्याम् ॥ २६ ॥

शूर्पशब्दादन्यतरस्यामञ् प्रत्ययो भवत्यार्हीयेष्वर्थेषु। ठञोऽपवादः। पक्षे सोऽपि भवति। शूर्पेण क्रीतं शौर्पम्, शौर्पिकम्॥

शतमानविंशतिकसहस्रवसनादण् ॥ २७ ॥

शतमानादिभ्यः शब्देभ्योऽण् प्रत्ययो भवत्यार्हीयेष्वर्थेषु। ठक्ठञोरपवादः। शतमानेन क्रीतं शातमानं शतम्। वैंशतिकम्। साहस्रम्। वासनम्॥

अध्यर्धपूर्वद्विगोर्लुगसंज्ञायाम् ॥ २८ ॥

आर्हादित्येव। अध्यर्धशब्दः पूर्वो यस्मिन् तस्मादध्यर्धपूर्वात् प्रातिपदिकाद् द्विगोश्च परस्यार्हीयस्य लुग् भवत्यसंज्ञायां विषये। अध्यर्धकंसम्। द्विकंसम्। त्रिकंसम्। अध्यर्धशूर्पम्। द्विशूर्पम्। त्रिशूर्पम्। असंज्ञायामिति किम् ? पाञ्चलोहितिकम्। पाञ्चकलापिकम्। लोहिनीशब्दस्य 'भस्याढे तद्धिते०' (वा० ६.३.३५) इति पुंवद्भावः। प्रत्ययान्तस्य विशेषणमसंज्ञाग्रहणम्, न चेत् प्रत्ययान्तं संज्ञेति। अध्यर्धशब्दः संख्यैव, किमर्थं भेदेनोपादीयते? ज्ञापकार्थम् , क्वचिदस्य संख्याकार्यं न भवति, 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' (५.४.१७) इति॥

विभाषा कार्षापणसहस्राभ्याम् ॥ २९ ॥

अध्यर्धपूर्वाद् द्विगोश्च कार्षापणसहस्रान्तादुत्तरस्यार्हीयप्रत्ययस्य विभाषा लुग्

---

१ - ' शतम् ' इति नास्ति बहुत्र । २ - ' पञ्चलौहितिकम् । पाञ्चकलायिकम् ' इति बाल०।

भवति। पूर्वेण लुकि नित्ये प्राप्ते विकल्प्यते। अध्यर्धकार्षापणम्, अध्यर्धकार्षापणिकम्। द्विकार्षापणम्, द्विकार्षापणिकम्। औपसंख्यानिकस्य टिठनो लुक्। अलुक्पक्षे च प्रतिरादेशो विकल्पितः। अध्यर्धप्रतिकम्। द्विप्रतिकम्। त्रिप्रतिकम्। सहस्रात्—अध्यर्धसहस्रम्, अध्यर्धसाहस्रम्। द्विसहस्रम्, द्विसाहस्रम्। अलुक्पक्षे 'संख्यायाः संवत्सरसंख्यस्य च' (७.३.१५) इत्युत्तरपदवृद्धिः ॥ सुवर्णशतमानयोरुपसंख्यानम्॥ अध्यर्धसुवर्णम्, अध्यर्धसौवर्णिकम्। द्विसुवर्णम्, द्विसौवर्णिकम्। अध्यर्धशतमानम्, अध्यर्धशातमानम्। द्विशतमानम्, द्विशातमानम्। 'परिमाणान्तस्या०' (७.३.१७) इत्युत्तरपदवृद्धिः॥

द्वित्रिपूर्वान्निष्कात् ॥ ३० ॥

द्विगोरित्येव। द्वित्रिपूर्वाद् द्विगोर्निष्कान्तादार्हीयप्रत्ययस्य विभाषा लुग् भवति। द्विनिष्कम्, द्विनैष्किकम्। त्रिनिष्कम्, त्रिनैष्किकम् ॥ बहुपूर्वाच्चेति वक्तव्यम्॥ बहुनिष्कम्, बहुनैष्किकम्। 'परिमाणान्तस्या०' (७.३.१७) इत्युत्तरपदवृद्धिः॥

बिस्ताच्च ॥ ३१ ॥

द्वित्रिपूर्वादिति चकारेणानुकृष्यते। द्वित्रिपूर्वाद् बिस्तान्ताद् द्विगोः परस्यार्हीयप्रत्ययस्य विभाषा लुग् भवति। द्विबिस्तम्, द्विबैस्तिकम्। त्रिबिस्तम्, त्रिबैस्तिकम्। बहुबिस्तम्, बहुबैस्तिकम्॥

विंशतिकात् खः ॥ ३२ ॥

अध्यर्धपूर्वात् प्रातिपदिकाद् द्विगोश्च विंशतिकशब्दान्तादार्हीयेष्वर्थेषु खः प्रत्ययो भवति। अध्यर्धविंशतिकीनम्। द्विविंशतिकीनम्। त्रिविंशतिकीनम्। विधानसामर्थ्यादस्य लुङ् न भवति॥

खार्या ईकन् ॥ ३३ ॥

अध्यर्धपूर्वाद् द्विगोरित्येव। अध्यर्धपूर्वात् प्रातिपदिकाद् द्विगोश्च खारीशब्दान्तादार्हीयेष्वर्थेषु ईकन् प्रत्ययो भवति। अध्यर्धखारीकम्। द्विखारीकम् ॥ केवलायाश्चेति वक्तव्यम्॥ खारीकम्॥ काकिण्याश्चोपसंख्यानम्॥ अध्यर्धकाकिणीकम्। द्विकाकिणीकम्। त्रिकाकिणीकम् ॥ केवलायाश्च॥ काकिणीकम्॥

पणपादमाषशताद् यत् ॥ ३४ ॥

अध्यर्धपूर्वाद् द्विगोरित्येव। अध्यर्धपूर्वाद् द्विगोश्च पणपादमाषशतशब्दान्ता-

दार्हीयेष्वर्थेषु यत् प्रत्ययो भवति। अध्यर्धपण्यम्। द्विपण्यम्। त्रिपण्यम्। पाद—अध्यर्ध-पाद्यम्। द्विपाद्यम्। त्रिपाद्यम्। पद्भावो न भवति 'पद्यत्यतदर्थे' (६.३.५३) इति। प्राण्यङ्गस्य स इष्यते, इदं तु परिमाणम्। माष—अध्यर्धमाष्यम्। द्विमाष्यम्। त्रिमाष्यम्। शत—अध्यर्धशत्यम्। द्विशत्यम्। त्रिशत्यम्॥

शाणाद् वा ॥ ३५ ॥

अध्यर्धपूर्वाद् द्विगोरित्येव। शाणशब्दादध्यर्धपूर्वाद् द्विगोरार्हीयेष्वर्थेषु वा यत् प्रत्ययो भवति। ठञोऽपवादः। पक्षे सोऽपि भवति, तस्य च लुक्। अध्यर्धशाण्यम्, अध्यर्धशाणम्। द्विशाण्यम्, द्विशाणम्। त्रिशाण्यम्, त्रिशाणम्॥ शताच्चेति वक्तव्यम्॥ अध्यर्धशत्यम्, अध्यर्धशतम्। द्विशत्यम्, द्विशतम्। त्रिशत्यम्, त्रिशतम्॥

द्वित्रिपूर्वादण् च ॥ ३६ ॥

शाणाद्वेत्येव। द्वित्रिपूर्वात् शाणान्तात् प्रातिपदिकादार्हीयेष्वर्थेषु अण् प्रत्ययो भवति, चकाराद् यत् च वा। तेन त्रैरूप्यं संपद्यते। द्वैशाणम्, द्विशाण्यम्, द्विशाणम्। त्रैशाणम्, त्रिशाण्यम्, त्रिशाणम्। 'परिमाणान्तस्यासंज्ञाशाणयोः' (७.३.१७) इति पर्युदासादादि-वृद्धिरेव भवति॥

तेन क्रीतम् ॥ ३७ ॥

ठञादयस्त्रयोदश प्रत्ययाः प्रकृताः। तेषामितः प्रभृति समर्थविभक्तयः प्रत्ययार्थाश्च निर्दिश्यन्ते। तेनेति तृतीयासमर्थात् क्रीतमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। सप्तत्या क्रीतं साप्ततिकम्। आशीतिकम्। नैष्किकम्। पाणिकम्। पादिकम्। माषिकम्। शत्यम्। शतिकम्। द्विकम्। त्रिकम्। तेनेति मूल्यात् करणे तृतीया समर्थविभक्तिः। अन्यत्रानभिधानाद् न भवति देवदत्तेन क्रीतम्, पाणिना क्रीतमिति। द्विवचनबहुवचनान्तात् प्रत्ययो न भवति। प्रस्थाभ्यां क्रीतम्, प्रस्थैः क्रीतमिति, अनभिधानादेव। यत्र तु प्रकृत्यर्थस्य संख्याभेदावगमे प्रमाणमस्ति तत्र द्विवचनबहुवचनान्तादपि प्रत्ययो भवति। द्वाभ्यां क्रीतं द्विकम्। त्रिकम्। पञ्चकम्। तथा मुद्गैः क्रीतं मौद्गिकम्। माषिकम्। न ह्येकेन मुद्गेन क्रयः संभवति॥

तस्य निमित्तं संयोगोत्पातौ ॥ ३८ ॥

---

१ - ' भवति ' इति बाल०।

तस्येति षष्ठीसमर्थाद् निमित्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति, यत् तद् निमित्तं संयोगश्चेत् स भवति, उत्पातो वा। संयोगः संबन्धः। प्राणिनां शुभाशुभसूचको महाभूतपरिणाम उत्पातः। शतस्य निमित्तं धनपतिना संयोगः शत्यः, शतिकः। साहस्रः। उत्पातः खल्वपि—शतस्य निमित्तमुत्पातो दक्षिणाक्षिस्पन्दनं शत्यम्, शतिकम्। साहस्रम् ॥ तस्य निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्॥ वातस्य शमनं कोपनं वा वातिकम्। पैत्तिकम्। श्लैष्मिकम्॥ सन्निपाताच्चेति वक्तव्यम्॥ सान्निपातिकम्॥

गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत् ॥ ३९ ॥

गोशब्दाद् द्व्यचश्च प्रातिपदिकात् संख्यापरिमाणाश्वादिविवर्जिताद् यत् प्रत्ययो भवति तस्य निमित्तं संयोगोत्पाताविति्येतस्मिन्नर्थे। ठञादीनामपवादः। गोर्निमित्तं संयोग उत्पातो वा गव्यः। द्व्यचः खल्वपि—धन्यम्। स्वर्ग्यम्। यशस्यम्। आयुष्यम्। असंख्या-परिमाणाश्वादेरिति किम् ? पञ्चानां निमित्तं पञ्चकम्। सप्तकम्। अष्टकम्। परिमाण—प्रास्थिकम्। खारीकम्। अश्वादि—आश्विकः॥ ब्रह्मवर्चसादुपसंख्यानम्॥ ब्रह्मवर्चसस्य निमित्तं गुरुणा संयोगो ब्रह्मवर्चस्यम्॥ अश्व। अश्मन्। गण। ऊर्णा। उमा। वसु। वर्ष। भङ्ग। अश्वादिः॥

पुत्राच्छ च ॥ ४० ॥

पुत्रशब्दात् छः प्रत्ययो भवति, चकाराद् यत् च, तस्य निमित्तं संयोगोत्पाताविति्ये-तस्मिन् विषये। द्व्यच इति नित्ये यति प्राप्ते वचनम्। पुत्रस्य निमित्तं संयोग उत्पातो वा पुत्रीयम्, पुत्र्यम्॥

सर्वभूमिपृथिवीभ्यामणञौ ॥ ४१ ॥

सर्वभूमिपृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतः तस्य निमित्तं संयोगोत्पाता-विति्येतस्मिन् विषये। ठकोऽपवादौ। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। पार्थिवः। सर्वभूमेरनुशतिकादिपाठाद् (७.३.२०) उभयपदवृद्धिः॥

तस्येश्वरः ॥ ४२ ॥

तस्येति षष्ठीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यां यथासंख्यम् अणञौ प्रत्ययौ भवत

---

१ - ' यथासंख्यम् ' इति नास्ति बाल०।

ईश्वर इत्येतस्मिन् विषये। सर्वभूमेरीश्वरः सार्वभौमः। पार्थिवः। षष्ठीप्रकरणे पुनः षष्ठीसमर्थविभक्तिनिर्देशः प्रत्ययार्थस्य निवृत्तये। अन्यथा संयोगोत्पाताविवेश्वरोऽपि प्रत्ययार्थस्य निमित्तस्य विशेषणं संभाव्येत॥

तत्र विदित इति च ॥ ४३ ॥

तत्रेति सप्तमीसमर्थाभ्यां सर्वभूमिपृथिवीशब्दाभ्यां यथासंख्यमणञौ प्रत्ययौ भवतो विदित इत्येतस्मिन्नर्थे। विदितो ज्ञातः प्रकाशित इत्यर्थः। सर्वभूमौ विदितः सार्वभौमः। पार्थिवः॥

लोकसर्वलोकाट् ठञ् ॥ ४४ ॥

लोकसर्वलोकशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां विदित इत्येतस्मिन् विषये ठञ् प्रत्ययो भवति। लोके विदितो लौकिकः। सार्वलौकिकः। अनुशतिकादित्वाद् (७.३.२०) उभयपदवृद्धिः॥

तस्य वापः ॥ ४५ ॥

तस्येति षष्ठीसमर्थाद् वाप इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। उप्यतेऽस्मिन् वापः, क्षेत्रमुच्यते। प्रस्थस्य वापः क्षेत्रं प्रास्थिकम्। द्रौणिकम्। खारीकम्॥

पात्रात् ष्ठन् ॥ ४६ ॥

पात्रशब्दात् ष्ठन् प्रत्ययो भवति तस्य वाप इत्येतस्मिन् विषये। ठञोऽपवादः। नकारः स्वरार्थः। षकारो ङीषर्थः। पात्रशब्दः परिमाणवाची। पात्रस्य वापः पात्रिकं क्षेत्रम्। पात्रिकी क्षेत्रभक्तिः॥

तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयते ॥ ४७ ॥

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति, यत् तत् प्रथमा- समर्थं वृद्ध्यादि चेत् तद् दीयते। दीयत इत्येकवचनान्तं वृद्ध्यादिभिः प्रत्येकमभिसंबध्यते। तत्र यदधमर्णेनोत्तमर्णाय मूलधनातिरिक्तं देयं तद् वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भाग आयः। पटादीनामुपादानमूलादतिरिक्तं द्रव्यं लाभः। रक्षानिर्वेशो राजभागः शुल्कः। उत्कोच उपदा। पञ्च अस्मिन् वृद्धिर्वा आयो वा लाभो वा शुल्को वा उपदा वा दीयते पञ्चकः। सप्तकः। शत्यः, शतिकः। साहस्रः ॥ चतुर्थ्यर्थ उपसंख्यानम्॥ पञ्चास्मै वृद्धिर्वा आयो

वा लाभो वा शुल्को वा उपदा वा दीयते पञ्चको देवदत्तः। सिद्धं त्वधिकरणत्वेन विवक्षितत्वात्। सममब्राह्मणे दानम् (मनु० ७.८५) इति यथा॥

पूरणार्धाट् ठन् ॥ ४८ ॥

पूरणवाचिनः शब्दादर्धशब्दात् च ठन् प्रत्ययो भवति तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयत इत्येतस्मिन्नर्थे। यथायथं ठकूटिठनोरपवादः। द्वितीयो वृद्ध्यादिरस्मिन् दीयते द्वितीयिकः। तृतीयिकः। पञ्चमिकः। सप्तमिकः। अर्धिकः। अर्धशब्दो रूपकार्धस्य रूढिः॥

भागाद् यच्च ॥ ४९ ॥

भागशब्दाद् यत् प्रत्ययो भवति, चकारात् ठंश्च, तदस्मिन् वृद्ध्यायलाभशुल्कोपदा दीयत इत्येतस्मिन्नर्थे। ठञोऽपवादः। भागो वृद्ध्यादिरस्मिन् दीयते भाग्यम्, भागिकं शतम्। भाग्या, भागिका विंशतिः। भागशब्दोऽपि रूपकार्धस्य वाचकः॥

तद्धरति वहत्यावहति भाराद् वंशादिभ्यः ॥ ५० ॥

तदिति द्वितीयासमर्थाद् हरत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति। प्रकृतिविशेषणं भाराद् वंशादिभ्य इति। वंशादिभ्यः परो यो भारशब्दस्तदन्तात् प्रातिपदिकादिति। वंशभारं हरति वहत्यावहति वा वांशभारिकः। कौटजभारिकः। बाल्वजभारिकः। भारादिति किम्? वंशं हरति। वंशादिभ्य इति किम् ? व्रीहिभारं हरति। अपरा वृत्तिः—भाराद् वंशादिभ्य इति, भारभूतेभ्यो वंशादिभ्य इत्यर्थः। भारशब्दोऽर्थद्वारेण वंशादीनां विशेषणम्। भारभूतान् वंशान् हरति वांशिकः। कौटजिकः। बाल्वजिकः। भारादिति किम् ? वंशं हरति। वंशादिभ्य इति किम् ? भारभूतान् व्रीहीन् वहति। सूत्रार्थद्वयमपि चैतदाचार्येण शिष्याः प्रतिपादिताः। तदुभयमपि ग्राह्यम्। हरति देशान्तरं प्रापयति चोरयति वा। वहत्युत्क्षिप्य धारयतीत्यर्थः। आवहति उत्पादयतीत्यर्थः॥ वंश। कुटज। बल्वज। मूल। अक्ष। स्थूणा। अश्मन्। अश्व। इक्षु। खट्वा। वंशादिः॥

वस्नद्रव्याभ्यां ठन्कनौ ॥ ५१ ॥

वस्नद्रव्यशब्दाभ्यां द्वितीयासमर्थाभ्यां यथासंख्यं ठन् कन् इत्येतौ प्रत्ययौ भवतो हरत्यादिष्वर्थेषु। वस्नं हरति वहति वा वस्निकः। द्रव्यकः॥

---

१ - ‘ शुल्को वा ’ इति नास्ति है०, बाल०।

संभवत्यवहरति पचति ॥ ५२ ॥

तदिति द्वितीया समर्थविभक्तिरनुवर्तते। तदिति द्वितीयासमर्थात् संभवत्यादिष्वर्थेषु यथाविहितं प्रत्ययो भवति। तत्राधेयस्य प्रमाणानतिरेकः संभवः। उपसंहरणमवहारः। विक्लेदनं पाकः। प्रस्थं संभवत्यवहरति पचति वा प्रास्थिकः। कौडविकः। खारीकः। ननु च पाके च संभवोऽस्ति ? नास्त्यत्र नियोगः। प्रस्थं पचति ब्राह्मणी प्रास्थिकी॥ तत्पचतीति द्रोणादण् च॥ द्रोणं पचति द्रौणी, द्रौणिकी॥

आढकाचितपात्रात् खोऽन्यतरस्याम् ॥ ५३ ॥

आढकाचितपात्रशब्देभ्यो द्वितीयासमर्थेभ्योऽन्यतरस्यां संभवादिष्वर्थेषु खः प्रत्ययो भवति। ठञोऽपवादः। पक्षे सोऽपि भवति। आढकं संभवत्यवहरति पचति वा आढकीना, आढकिकी। आचितीना, आचितिकी। पात्रीणा, पात्रिकी॥

द्विगोः ष्ठंश्च ॥ ५४ ॥

आढकाचितपात्रादित्येव। आढकाचितपात्रान्ताद् द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् प्रत्ययो भवति, चकारात् खः, अन्यतरस्याम्। विधानसामर्थ्यादनयोर्लुग् न भवति। ठञस्तु पक्षेऽनुज्ञातस्य 'अध्यर्धपूर्वद्विगोः०' (५.१.२८) इति लुग् भवत्येव। नकारः स्वरार्थः। षकारो ङीषर्थः। द्व्याढकिकी, द्व्याढकीना, द्व्याढकी। द्व्याचितिकी, द्व्याचितीना, द्व्याचिता। 'अपरिमाणबिस्ताचित०' (४.१.२२) इति ङीपः प्रतिषेधः। द्विपात्रिकी, द्विपात्रीणा, द्विपात्री॥

कुलिजाल् लुक्खौ च ॥ ५५ ॥

द्विगोरित्येव। कुलिजशब्दान्ताद् द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ भवतः, चकारात् ष्ठंश्च। अन्यतरस्यांग्रहणानुवृत्त्या लुगपि विकल्प्यते। ठञः पक्षे श्रवणं भवति। तेन चातूरूप्यं संपद्यते। द्वे कुलिजे संभवत्यवहरति पचति वा द्विकुलिजिकी, द्विकुलिजीना, द्विकुलिजी, द्वैकुलिजिकी। 'परिमाणान्तस्यासंज्ञाशाणयोः' (७.३.१७) इत्यत्र कुलिजग्रहणमपीष्यते। तेनोत्तरपदवृद्धिरपि न भवति॥

सोऽस्यांशवस्नभृतयः ॥ ५६ ॥

स इति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् तत् प्रथमा-

---

१ - 'द्विकुलिजा' इति बाल०।

समर्थमंशवस्नभृतयश्चेत् ता भवन्ति। अंशो भागः। वस्नं मूल्यम्। भृतिर्वेतनम्। पञ्च अंशो वस्नो वा भृतिर्वास्य पञ्चकः। सप्तकः। साहस्रः॥

तदस्य परिमाणम् ॥ ५७ ॥

तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत् प्रथमासमर्थं परिमाणं चेत् तद् भवति। प्रस्थः परिमाणमस्य प्रास्थिको राशिः। खारशतिकः। शत्यः, शतिकः। साहस्रः। द्रौणिकः। कौडविकः। वर्षशतं परिमाणमस्य वार्षशतिकः। वार्षसहस्रिकः। षष्टिर्जीवितपरिमाणमस्येति षाष्टिकः। साप्ततिकः। समर्थविभक्तिः प्रत्ययार्थश्च पूर्वसूत्रादेवानुवर्तिष्यते, किमर्थं पुनरनयोरुपादानम् ? पुनर्विधानार्थम्। द्वे षष्टी जीवित- परिमाणमस्य द्विषाष्टिकः। द्विसाप्ततिकः। पुनर्विधानसामर्थ्याद् 'अध्यर्धपूर्वद्विगोर्लुग०' (५.१.२८) न भवति॥

संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु ॥ ५८ ॥

तदस्य परिमाणमिति वर्तते। संख्यावाचिनः प्रातिपदिकात् परिमाणोपाधिकात् प्रथमासमर्थादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति। संज्ञासंघसूत्राध्ययनेष्विति प्रत्ययार्थविशेषणम्। तत्र संज्ञायां स्वार्थे प्रत्ययो वाच्यः। पञ्चैव पञ्चकाः शकुनयः। त्रिकाः शालङ्कायनाः। संघ—पञ्च परिमाणमस्य पञ्चकः संघः। अष्टकः। सूत्र—अष्टावध्यायाः परिमाणमस्य सूत्रस्य अष्टकं पाणिनीयम्। दशकं वैयाघ्रपदीयम्। त्रिकं काशकृत्स्नम्। ननु चाध्यायसमूहः सूत्रसंघ एव भवति ? नैतदस्ति। प्राणिसमूहे संघशब्दो रूढः। अध्ययन—पञ्चकोऽधीतः। सप्तकोऽधीतः। अष्टकः। नवकः। अधीतिरध्ययनम्। तस्य संख्यापरिमाणं पञ्चावृत्तयः पञ्च वाराः पञ्च रूपाण्यस्याध्ययनस्य पञ्चकमध्ययनम् ॥ स्तोमे डविधिः पञ्चदशाद्यर्थः॥ पञ्चदश मन्त्राः परिमाणमस्य पञ्चदशः स्तोमः। सप्तदशः। एकविंशः॥ शन्नूशतोर्डिनिश्छन्दसि॥ पञ्चदशिनोऽर्धमासाः (तै० सं० ७.५.२०.१)। त्रिंशिनो मासाः (तै० सं० ७.५.२०.१)॥ विंशतेश्चेति वक्तव्यम्॥ विंशिनोऽङ्गिरसः (गो० ब्रा० १.१.८)॥

पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ॥ ५९ ॥

तदस्य परिमाणमिति वर्तते। पङ्क्त्यादयः शब्दा निपात्यन्ते। यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम्। पञ्चानां टिलोपः, तिश्च प्रत्ययः। पञ्च परिमाणमस्य

---

१ - 'खारीकः' इति बाल०। २ - 'द्विसाप्ततिकः' इति बाल०।

पङ्क्तिश्छन्दः। द्वयोर्दशतोर्विनूभावः शतिच् च प्रत्ययः। द्वौ दशतौ परिमाणमस्य संघस्य विंशतिः। त्रयाणां दशतां त्रिन्भावः शत् च प्रत्ययः। त्रयो दशतः परिमाणमस्य त्रिंशत्। चतुर्णां दशतां चत्वारिन्भावः शत् च प्रत्ययः। चत्वारो दशतः परिमाणमस्य चत्वारिंशत्। पञ्चानां दशतां पञ्चाभावः शत् च प्रत्ययः। पञ्च दशतः परिमाणमस्य पञ्चाशत्। षण्णां दशतां षड्भावस्तिः प्रत्ययोऽपदत्वं च। षड् दशतः परिमाणमस्य षष्टिः। सप्तानां दशतां सप्तभावः तिः प्रत्ययश्च। सप्त दशतः परिमाणमस्य सप्ततिः। अष्टानां दशतामशीभावस्तिः प्रत्ययश्च। अष्टौ दशतः परिमाणमस्य अशीतिः। नवानां दशतां नवभावस्तिः प्रत्ययश्च। नव दशतः परिमाणमस्य नवतिः। दशानां दशतां शभावः तश्च प्रत्ययः। दश दशतः परिमाणमस्य संघस्य शतम्। विंशत्यादयो गुणशब्दाः, ते यथाकथंचिद् व्युत्पाद्याः। नात्रावयवार्थेऽभिनिवेष्टव्यम्। तथाहि—पङ्क्तिरिति क्रमसंनिवेशेऽपि वर्तते। ब्राह्मणपङ्क्तिः, पिपीलिकापङ्क्तिरिति। न चात्रावयवार्थः कश्चिदस्ति। या चैषां विषयभेदेन गुणमात्रे गुणिनि च वृत्तिः, स्वलिङ्गसंख्यानुविधानं च, एतदपि सर्वं स्वाभाविकमेव। सहस्रादयोऽप्येवंजातीयकास्तद्वदेव द्रष्टव्याः। उदाहरणमात्रमेतदिति॥

पञ्चद्दशतौ वर्गे वा ॥ ६० ॥

पञ्चत् दशत् इत्येतौ वा निपात्येते तदस्य परिमाणमित्यस्मिन् विषये वर्गेऽभिधेये। 'संख्यायाः०' (५.१.५८) इति कनि प्राप्ते डतिर्निपात्यते। वावचनात् पक्षे सोऽपि भवति। पञ्च परिमाणमस्य पञ्चद् वर्गः, दशद् वर्गः। पञ्चको वर्गः, दशको वर्गः॥

सप्तनोऽञ् छन्दसि ॥ ६१ ॥

वर्ग इत्येव। तदस्य परिमाणमिति च। सप्तन्शब्दात् छन्दसि विषयेऽञ् प्रत्ययो भवति वर्गेऽभिधेये। स१प्त साप्तानि (तु० — तै० सं० ५.४.७.५) असृजत्॥

त्रिंशच्चत्वारिंशतोर्ब्राह्मणे संज्ञायां डण् ॥ ६२ ॥

तदस्य परिमाणमित्येव। वर्ग इति निवृत्तम्। त्रिंशच्चत्वारिंशच्छब्दाभ्यां संज्ञायां विषये डण् प्रत्ययो भवति तदस्य परिमाणमित्येतस्मिन् विषये ब्राह्मणेऽभिधेये। अभिधेयसप्तम्येषा, न विषयसप्तमी। तेन मन्त्रभाषयोरपि भवति। त्रिंशदध्यायाः परिमाणमेषां ब्राह्मणानां त्रैंशानि ब्राह्मणानि। चात्वारिंशानि ब्राह्मणानि। कानिचिदेव ब्राह्मणान्युच्यन्ते॥

तदर्हति ॥ ६३ ॥

तदिति द्वितीयासमर्थादर्हतीत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः। वास्त्रयुग्मिकः। शत्यः, शतिकः। साहस्रः॥

छेदादिभ्यो नित्यम् ॥ ६४ ॥

नित्यग्रहणं प्रत्ययार्थविशेषणम्। छेदादिभ्यो द्वितीयासमर्थेभ्यो नित्यमर्हतीत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। छेदं नित्यमर्हति छैदिकः। भैदिकः॥ छेद। भेद। द्रोह। दोह। वर्त। कर्ष। संप्रयोग। विप्रयोग। प्रेषण। संप्रश्न। विप्रकर्ष। विराग विरङ्गं च (ग० सू० ११२)। वैरङ्गिकः। छेदादिः॥

शीर्षच्छेदाद् यच्च ॥ ६५ ॥

शीर्षच्छेदशब्दाद् द्वितीयासमर्थाद् नित्यमर्हतीत्यस्मिन्नर्थे यत् प्रत्ययो भवति, चकारादु यथाविहितं च। शिरश्छेदं नित्यमर्हति शीर्षच्छेद्यः, शैर्षच्छेदिकः। प्रत्ययसन्नियोगेन शिरसः शीर्षभावो निपात्यते॥

दण्डादिभ्यो यः॥ ६६ ॥

नित्यमिति निवृत्तम्। दण्डादिभ्यो द्वितीयासमर्थेभ्योऽर्हतीत्यस्मिन्नर्थे यः प्रत्ययो भवति। ठकोऽपवादः। दण्डमर्हति दण्ड्यः। मुसल्यः॥ दण्ड। मुसल। मधुपर्क। कशा। अर्घ। मेधा। मेघ। युग। उदक। वध। गुहा। भाग। इभ। दण्डादिः॥

छन्दसि च ॥ ६७ ॥

प्रातिपदिकमात्रात् छन्दसि विषये तदर्हतीत्यस्मिन्नर्थे यत् प्रत्ययो भवति। ठञादीनामपवादः। उदक्या वृत्तयः। यूप्यः पलाशः। गर्त्यो देशः॥

पात्राद् घंश्च ॥ ६८ ॥

पात्रशब्दाद् घन् प्रत्ययो भवति, चकारादु यत् च, तदर्हतीत्यस्मिन्नर्थे। ठक्ठञोरपवादः। पात्रं परिमाणमप्यस्ति। पात्रमर्हति पात्रियः, पात्र्यः॥

कडङ्करदक्षिणाच्छ च ॥ ६९ ॥

कडङ्करदक्षिणाशब्दाभ्यां छः प्रत्ययो भवति, चकारादु यत् च, तदर्हतीत्यस्मिन् विषये। ठकोऽपवादः। कडङ्करमर्हति कडङ्करीयो गौः। कडङ्र्यः। दक्षिणामर्हति दक्षिणीयो भिक्षुः। दक्षिण्यो ब्राह्मणः। दक्षिणाशब्दस्यात्पाच्तरस्यापूर्वनिपातेन लक्षणव्यभिचारचिह्नेन यथासंख्याभावं सूचयति॥

---

१ - ' अयमेव प्रायिकः पाठः, न्यासाभिमतश्च। ' दण्डादिभ्यः ' इति सूत्रपाठं यतोऽनुवृत्तिं च निरचैषीद् हरदत्तः।

स्थालीबिलात् ॥ ७० ॥

छयतावनुवर्तेते। स्थालीबिलशब्दात् छयतौ प्रत्ययौ भवतः तदर्हतीत्यस्मिन्नर्थे। ठकोऽपवादौ। स्थालीबिलमर्हन्ति स्थालीबिलीयास्तण्डुलाः। स्थालीबिल्याः। पाकयोग्या इत्यर्थः॥

यज्ञर्त्विग्भ्यां घखञौ ॥ ७१ ॥

यज्ञशब्दादृत्विक्शब्दात् च यथासंख्यं घखञौ प्रत्ययौ भवतः तदर्हतीत्यस्मिन् विषये। ठकोऽपवादौ। यज्ञियो ब्राह्मणः। आर्त्विजीनो ब्राह्मणः॥ यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसंख्यानम्॥ यज्ञकर्मार्हति यज्ञियो देशः। ऋत्विक्कर्मार्हति आर्त्विजीनं ब्राह्मणकुलम्। आर्हीयाणां ठगादीनां पूर्णोऽवधिः। अतः परं प्राग्वतीयष्ठञेव भवति॥

पारायणतुरायणचान्द्रायणं वर्तयति ॥ ७२ ॥

समर्थविभक्तिरनुवर्तते। अर्हतीति निवृत्तम्। पारायणादिभ्यो द्वितीयासमर्थेभ्यो वर्तयतीत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति। पारायणं वर्तयत्यधीते पारायणिकश्छात्रः। तौरायणिको यजमानः। चान्द्रायणिकस्तपस्वी॥

संशयमापन्नः ॥ ७३ ॥

संशयशब्दाद् द्वितीयासमर्थादापन्न इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति। संशयमापन्नः प्राप्तः सांशयिकः स्थाणुः॥

योजनं गच्छति ॥ ७४ ॥

योजनशब्दाद् द्वितीयासमर्थाद् गच्छतीत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति। योजनं गच्छति यौजनिकः॥ क्रोशशतयोजनशतयोरुपसंख्यानम्॥ क्रोशशतं गच्छति क्रौशशतिकः। यौजनशतिकः ॥ ततोऽभिगमनमर्हतीति च क्रोशशतयोजनशतयोरुपसंख्यानम्॥ क्रोशशतादभिगमनमर्हति क्रौशशतिको भिक्षुः। यौजनशतिक आचार्यः॥

पथः ष्कन् ॥ ७५ ॥

पथिन्शब्दाद् द्वितीयासमर्थाद् गच्छतीत्यस्मिन्नर्थे ष्कन् प्रत्ययो भवति। नकारः स्वरार्थः। षकारो ङीषर्थः। पन्थानं गच्छति पथिकः। पथिकी॥

पन्थो ण नित्यम् ॥ ७६ ॥

नित्यग्रहणं प्रत्ययार्थविशेषणम्। पथः पन्थ इत्ययमादेशो भवति णश्च प्रत्ययो नित्यं गच्छतीत्यस्मिन् विषये। पन्थानं नित्यं गच्छति, पान्थो भिक्षां याचते। नित्यमिति किम्? पथिकः॥

उत्तरपथेनाहृतं च ॥ ७७ ॥

निर्देशादेव समर्थविभक्तिः। उत्तरपथशब्दात् तृतीयासमर्थादाहृतमित्येतस्मिन् विषये ठञ् प्रत्ययो भवति। चकारः प्रत्ययार्थसमुच्चये, गच्छतीति च। अत्रापि तृतीयैव समर्थविभक्तिः। उत्तरपथेनाहृतम् औत्तरपथिकम्। उत्तरपथेन गच्छति औत्तरपथिकः॥ आहृतप्रकरणे वारिजङ्गलस्थलकान्तारपूर्वपदादुपसंख्यानम्॥ वारिपथेनाहृतं वारिपथिकम्। वारिपथेन गच्छति वारिपथिकः। जङ्गलपथेनाहृतं जाङ्गलपथिकम्। जङ्गलपथेन गच्छति जाङ्गलपथिकः। स्थलपथेनाहृतं स्थालपथिकम्। स्थलपथेन गच्छति स्थालपथिकः। कान्तारपथेनाहृतं कान्तार-पथिकम्। कान्तारपथेन गच्छति कान्तारपथिकः॥ अजपथशङ्कुपथाभ्यां चोपसंख्यानम्॥ अजपथेनाहृतम् आजपथिकम्, गच्छति वा आजपथिकः। शङ्कुपथेनाहृतं शाङ्कुपथिकम्, गच्छति वा शाङ्कुपथिकः॥ मधुकमरिचयोरण् स्थलात्॥ स्थलपथेनाहृतं स्थालपथं मधुकम्। स्थालपथं मरिचम्॥

कालात् ॥ ७८ ॥

कालादित्यधिकारः। यदित ऊर्ध्वमनुक्रमिष्यामः कालादित्येवं तद् वेदितव्यम्। वक्ष्यति—'तेन निर्वृत्तम्' (५.१.७९)—मासेन निर्वृत्तं मासिकम्। आर्धमासिकम्। सांवत्सरिकम्। कालादित्यधिकारो 'व्युष्टादिभ्योऽण्' (५.१.९७) इति यावत्॥

तेन निर्वृत्तम् ॥ ७९ ॥

तेनेति तृतीयासमर्थात् कालवाचिनः प्रातिपदिकाद् निर्वृत्तमित्यस्मिन्नर्थे ठञ् प्रत्ययो भवति। अह्ना निर्वृत्तम् आह्निकम्। आर्धमासिकम्। सांवत्सरिकम्॥

तमधीष्टो भृतो भूतो भावी ॥ ८० ॥

तमिति द्वितीयासमर्थात् कालवाचिनः प्रातिपदिकादधीष्टो भृतो भूतो भावी वेत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। अधीष्टः सत्कृत्य व्यापारितः। भृतो वेतनेन क्रीतः। भूतः स्वसत्तया व्याप्तकालः। भावी तादृश एवानागतः। 'कालाध्वनोः०' (२.३.५) इति

---

१ - इदमुदाहरणं नास्ति है०।

द्वितीया। मासमधीष्टो मासिकोऽध्यापकः। मासं भृतो मासिकः कर्मकरः। मासं भूतो मासिको व्याधिः। मासं भावी मासिक उत्सवः। ननु चाध्येषणं भरणं च मुहूर्तं क्रियते, तेन कथं मासो व्याप्यते ? अध्येषणभरणे क्रियार्थे, तत्र फलभूतया क्रियया मासो व्याप्यमानस्ताभ्यामेव व्याप्त इत्युच्यते॥

मासाद् वयसि यत्खञौ ॥ ८१ ॥

मासशब्दाद् वयस्यभिधेये यत्खञौ प्रत्ययौ भवतः। ठञोऽपवादौ। अधीष्टादीनां चतुर्णामधिकारेऽपि सामर्थ्याद् भूत एवात्राभिसंबध्यते। मासं भूतो मास्यः, मासीनः। वयसीति किम् ? मासिकम्॥

द्विगोर्यप् ॥ ८२ ॥

मासाद् वयसीति वर्तते। मासान्ताद् द्विगोर्यप् प्रत्ययो भवति वयस्यभिधेये। द्वौ मासौ भूतो द्विमास्यः। त्रिमास्यः॥

षण्मासाण् ण्यच्च ॥ ८३ ॥

वयसीत्येव। षण्मासशब्दाद् वयस्यभिधेये ण्यत् प्रत्ययो भवति, यप् च। औत्सर्गिकष्ठञपीष्यते, स चकारेण समुच्चेतव्यः। स्वरितत्वाच्चानन्तरोऽनुवर्तिष्यते। तेन त्रैरूप्यं भवति। षाण्मास्यः, षण्मास्यः, षाण्मासिकः॥

अवयसि ठंश्च ॥ ८४ ॥

षण्मासशब्दादवयस्यभिधेये ठन् प्रत्ययो भवति। चकारेणानन्तरस्य ण्यतः समुच्चयः क्रियते। षण्मासिको रोगः। षाण्मास्यः॥

समायाः खः ॥ ८५ ॥

अधीष्टादयश्चत्वारोऽर्था अनुवर्तन्ते। समाशब्दाद् द्वितीयासमर्थादधीष्टादिष्वर्थेषु खः प्रत्ययो भवति। ठञोऽपवादः। समामधीष्टो भृतो भूतो भावी वा समीनः। केचित् तु 'तेन निर्वृत्तम्' (५.१.७९) इति सर्वत्रानुवर्तयन्ति। समया निर्वृत्तः समीनः॥

द्विगोर्वा ॥ ८६ ॥

समायाः ख इत्येव। समाशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु पञ्चसु वा खः प्रत्ययो

---

१ - 'चकारोऽनन्तरस्य ण्यतः समुच्चयार्थः' इति पाठान्तरम्।

भवति। पूर्वेण नित्यः प्राप्तो विकल्प्यते। 'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (महाभाष्य-वा० ५.१.२०) इति प्राप्तिरस्त्येव। खेन मुक्ते पक्षे ठञपि भवति। द्विसमीनः, द्वैसमिकः। त्रिसमीनः, त्रैसमिकः॥

रात्र्यहःसंवत्सराच्च ॥ ८७ ॥

रात्रि अहः संवत्सर इत्येवमन्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति। खेन मुक्ते पक्षे ठञपि भवति। द्विरात्रीणः, द्वैरात्रिकः। त्रिरात्रीणः, त्रैरात्रिकः। द्व्यहीनः, द्वैयह्निकः। त्र्यहीणः, त्रैयह्निकः। द्विसंवत्सरीणः, द्विसांवत्सरिकः। त्रिसंवत्सरीणः, त्रिसांवत्सरिकः। 'संख्यायाः संवत्सरसंख्यस्य च' (७.३.१५) इत्युत्तरपदवृद्धिः॥

वर्षाल्लुक् च ॥ ८८ ॥

द्विगोरित्येव। वर्षान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषु वा खः प्रत्ययो भवति। पक्षे ठञ्। तयोश्च वा लुग् भवति। एवं त्रीणि रूपाणि भवन्ति। द्विवर्षीणो व्याधिः, द्विवार्षिकः, द्विवर्षः। त्रिवर्षीणः, त्रिवार्षिकः, त्रिवर्षः। 'वर्षस्याभविष्यति' (७.३.१६) इत्युत्तरपदवृद्धिः। भाविनि तु त्रैवर्षिकः॥

चित्तवति नित्यम् ॥ ८९ ॥

चित्तवति प्रत्ययार्थेऽभिधेये वर्षशब्दान्ताद् द्विगोर्निर्वृत्तादिष्वर्थेषूत्पन्नस्य प्रत्ययस्य नित्यं लुग् भवति। पूर्वेण विकल्पे प्राप्ते वचनम्। द्विवर्षो दारकः। चित्तवतीति किम्? द्विवर्षीणो व्याधिः॥

षष्टिकाः षष्टिरात्रेण पच्यन्ते ॥ ९०॥

षष्टिकशब्दो निपात्यते। बहुवचनमतन्त्रम्। षष्टिरात्रशब्दात् तृतीयासमर्थात् कन् प्रत्ययो निपात्यते पच्यन्त इत्येतस्मिन्नर्थे, रात्रिशब्दस्य च लोपः। षष्टिरात्रेण पच्यन्ते षष्टिकाः। संज्ञैषा धान्यविशेषस्य। तेन मुद्गादिष्वतिप्रसङ्गो न भवति॥

वत्सरान्ताच्छश्छन्दसि ॥ ९१ ॥

वत्सरान्तात् प्रातिपदिकाद् निर्वृत्तादिष्वर्थेषु छन्दसि विषये छः प्रत्ययो भवति। ठञोऽपवादः। इद्वत्सरीयः। इदावत्सरीयः (काठ० सं० १३.१५)॥

संपरिपूर्वात् ख च ॥ ९२ ॥

संपरिपूर्वाद् वत्सरान्तात् प्रातिपदिकाच् छन्दसि विषये निर्वृत्तादिष्वर्थेषु खः

प्रत्ययो भवति, चकाराच् छश्च। सं॒व॒त्स॒रीणाः (तै० सं० ४.३.१३.४)। परिवत्स॒रीणम् (ऋ० ७.१०३.८)। संवत्सरीया, परिवत्सरीया (काठ० सं० १३.१५)॥

तेन परिजय्यलभ्यकार्यसुकरम् ॥ ९३ ॥

तेनेति तृतीयासमर्थात् कालवाचिनः प्रातिपदिकात् परिजय्य लभ्य कार्य सुकर इत्येतेष्वर्थेषु ठञ् प्रत्ययो भवति। मासेन परिजय्यः, शक्यते जेतुम्, मासिको व्याधिः। सांवत्सरिकः। मासेन लभ्यो मासिकः पटः। मासेन कार्यं मासिकं चान्द्रायणम्। मासेन सुकरो मासिकः प्रासादः॥

तदस्य ब्रह्मचर्यम् ॥ ९४ ॥

तदिति द्वितीया समर्थविभक्तिः। सा चात्यन्तसंयोगे। अस्येति प्रत्ययार्थः। ब्रह्मचर्यमिति द्वाभ्यामपि संबध्यते। कालस्य व्यापकम्, प्रत्ययार्थस्य च स्वमिति। तदिति द्वितीयासमर्थात् कालवाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, ब्रह्मचर्यं चेद् गम्यते। मासं ब्रह्मचर्यमस्य मासिको ब्रह्मचारी। आर्धमासिकः। सांवत्सरिकः। अपरा वृत्तिः—तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत् तदस्येति निर्दिष्टं ब्रह्मचर्यं चेत् तद् भवति। मासोऽस्य ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम्। आर्धमासिकम्। सांवत्सरिकम्। पूर्वत्र ब्रह्मचारी प्रत्ययार्थः, उत्तरत्र ब्रह्मचर्यमेव। उभयमपि प्रमाणम्, उभयथा सूत्रप्रणयनात्॥ महानाम्न्यादिभ्यः षष्ठीसमर्थेभ्य उपसंख्यानम्॥ माहानामिकम्। गौदानिकम्। आदित्यव्रतिकम्॥ तच्चरतीति च॥ महानाम्न्य ऋचः, तत्सहचरितं व्रतं तच्छब्देनोच्यते। महानाम्नीश्चरति माहानामिकः। आदित्यव्रतिकः। गौदानिकः। 'भस्याढे०' (वा० ६.३.३५) इति पुंवद्भावेन ङीपि निवृत्ते 'नस्तद्धिते' (६.४.१४४) इति टिलोपः॥ अवान्तरदीक्षादिभ्यो डिनिर्वक्तव्यः॥ अवान्तरदीक्षां चरति अवान्तरदीक्षी। तिलव्रती॥ अष्टाचत्वारिंशतो ड्वुंश्च डिनिश्च वक्तव्यः॥ अष्टाचत्वारिंशद् वर्षाणि व्रतं चरति अष्टाचत्वारिंशकः। अष्टाचत्वारिंशी॥ चातुर्मास्यानां यलोपश्च ड्वुंश्च डिनिश्च वक्तव्यः॥ चातुर्मास्यानि चरति चातुर्मासकः। चातुर्मासी॥ चतुर्मासाद् ण्यो यज्ञे तत्र भवे॥ चतुर्षु मासेषु भवानि चातुर्मास्यानि॥ संज्ञायामण् वक्तव्यः॥ चतुर्षु मासेषु भवा चातुर्मासी पौर्णमासी—आषाढी, कार्त्तिकी, फाल्गुनी॥

तस्य च दक्षिणा यज्ञाख्येभ्यः ॥ ९५ ॥

---

१ - द्र०—तै० सं० ६.२.२.७ ।

तस्येति षष्ठीसमर्थेभ्यो यज्ञाख्येभ्यो दक्षिणेत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति। अग्निष्टोमस्य दक्षिणा आग्निष्टोमिकी। वाजपेयिकी। राजसूयिकी। आख्याग्रहणमकालादपि यज्ञवाचिनो यथा स्यादिति। इतरथा हि कालाधिकारादेकाहद्वादशाहप्रभृतय एव यज्ञा गृह्येरन्। 'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि' (महाभाष्य-वा० ५.१.२०) इति कालाधिकारेऽपि द्वादशाहादिष्वस्ति प्राप्तिः॥

तत्र च दीयते कार्यं भववत् ॥ ६६ ॥

तत्रेति सप्तमीसमर्थात् कालवाचिनः प्रातिपदिकाद् दीयते कार्यमित्येतयोरर्थयोर्भववत् प्रत्ययो भवति। यथा—मासे भवं मासिकम्। सांवत्सरिकम्। प्रावृषेण्यम्। वासन्तिकम्, वासन्तम्। हैमनम्, हैमन्तम्, हैमन्तिकम्। शारदम्। वतिः सर्वसादृश्यार्थः। योगविभागश्चात्र कर्तव्यः। तत्र च दीयते, यज्ञाख्येभ्य इति। आग्निष्टोमिकं भक्तम्। राजसूयिकम्। वाजपेयिकम्। कालाधिकारस्य पूर्णोऽवधिः। अतः परं सामान्येन प्रत्ययविधानम्॥

व्युष्टादिभ्योऽण् ॥ ६७ ॥

तत्रेति सप्तमीसमर्थेभ्यो व्युष्टादिभ्यो दीयते कार्यमित्येतयोरण् प्रत्ययो भवति। व्युष्टे दीयते कार्यं वा, वैयुष्टम्। नैत्यम्॥ अणुप्रकरणे अग्निपदादिभ्य उपसंख्यानम्॥ आग्निपदम्। पैलुमूलम्। किं वक्तव्यम् ? न वक्तव्यम्। अत्रैव ते पठितव्याः॥ व्युष्ट। नित्य। निष्क्रमण। प्रवेशन। तीर्थ। संभ्रम। आस्तरण। संग्राम। संघात। अग्निपद। पीलुमूल। प्रवास। उपसंक्रमण। व्युष्टादिः॥

तेन यथाकथाचहस्ताभ्यां णयतौ ॥ ६८ ॥

दीयते कार्यमिति वर्तते। तेनेति तृतीयासमर्थाभ्यां यथाकथाचहस्तशब्दाभ्यां यथा- संख्यं णयतौ प्रत्ययौ भवतः। दीयते कार्यमित्येतयोरर्थयोः प्रत्येकमभिसंबन्धः, यथा- संख्यं नेष्यते। यथाकथाचशब्दोऽव्ययसमुदायोऽनादरे वर्तते। तृतीयार्थमात्रं चात्र संभवति, न तु तृतीया समर्थविभक्तिः। यथाकथाच दीयते कार्यं वा याथाकथाचम्। हस्तेन दीयते कार्यं वा हस्त्यम्॥

संपादिनि ॥ ६९ ॥

तेनेत्येव। तृतीयासमर्थात् संपादिन्यभिधेये ठञ् प्रत्ययो भवति। गुणोत्कर्षः संपत्तिः। आवश्यके णिनिः (३.३.१७०)। कर्णवेष्टकाभ्यां संपादि मुखं कार्णवेष्टकिकं मुखम्। वास्त्रयुगिकं शरीरम्। वस्त्रयुगेण विशेषतः शोभत इत्यर्थः॥

कर्मवेषाद् यत् ॥ १०० ॥

कर्मवेषशब्दाभ्यां तृतीयासमर्थाभ्यां यत् प्रत्ययो भवति संपादिनीत्येतस्मिन् विषये। ठञोऽपवादः। कर्मणा संपद्यते कर्मण्यं शरीरम्। वेषेण संपद्यते वेष्यो नटः॥

तस्मै प्रभवति संतापादिभ्यः ॥ १०१ ॥

तस्मा इति चतुर्थीसमर्थेभ्यः संतापादिभ्यः प्रभवतीत्यस्मिन् विषये ठञ् प्रत्ययो भवति। समर्थः शक्तः प्रभवतीत्युच्यते। अलमर्थे चतुर्थी। संतापाय प्रभवति सान्तापिकः। सान्नाहिकः॥ संताप। संनाह। संग्राम। संयोग। संपराय। संपेष। निष्पेष। निसर्ग। असर्ग। विसर्ग। उपसर्ग। उपवास। प्रवास। संघात। संमोदन। सक्तुमांसौदनाद् विगृहीतादपि (ग० सू० ११३)। संतापादिः॥

योगाद् यच्च ॥ १०२ ॥

योगशब्दाद् यत् प्रत्ययो भवति, चकाराट् ठञ्, तस्मै प्रभवतीत्यस्मिन् विषये। योगाय प्रभवति योग्यः, यौगिकः॥

कर्मण उकञ् ॥ १०३ ॥

कर्मशब्दादुकञ् प्रत्ययो भवति तस्मै प्रभवतीत्येतस्मिन्नर्थे। ठञोऽपवादः। कर्मणे प्रभवति कार्मुकं धनुः। धनुषोऽन्यत्र न भवति, अनभिधानात्॥

समयस्तदस्य प्राप्तम् ॥ १०४ ॥

समयशब्दात् तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं प्राप्तं चेत् तद् भवति। समयः प्राप्तोऽस्य सामयिकं कार्यम्। उपनतकाल-मित्यर्थः। समर्थविभक्तिनिर्देश उत्तरार्थः॥

ऋतोरण् ॥ १०५ ॥

तदस्य प्राप्तमित्यनुवर्तते। ऋतुशब्दात् तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थेऽण् प्रत्ययो भवति तदस्य प्राप्तमित्येतस्मिन् विषये। ऋतुः प्राप्तोऽस्य आर्तवं पुष्पम्॥ तदस्य प्रकरण उपवस्त्रादिभ्य उपसंख्यानम्॥ उपवस्ता प्राप्तोऽस्य औपवस्त्रम्। प्राशिता प्राप्तोऽस्य प्राशित्रम्॥

---

१ - 'धनुष.....अनभिधानात्' इति क्वाचित्कः पाठः।

छन्दसि घस् ॥ १०६ ॥

ऋतुशब्दाच् छन्दसि विषये घस् प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन् विषये। अणोऽपवादः। अ॒यं ते॒ योनि॑र्ऋ॒त्वि॒य॒ः (ऋ० ३.२९.१०)॥

कालाद् यत् ॥ १०७ ॥

कालशब्दाद् यत् प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन् विषये। कालः प्राप्तोऽस्य काल्यस्तापः। काल्यं शीतम्॥

प्रकृष्टे ठञ् ॥ १०८ ॥

कालादित्येव, तदस्येति च। प्राप्तमिति निवृत्तम्। प्रकर्षेण कालो विशेष्यते। प्रकर्षे वर्तमानात् कालात् प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति। प्रकृष्टो दीर्घः कालोऽस्य कालिकमृणम्। कालिकं वैरम्। ठञ्ग्रहणं विस्पष्टार्थम्॥

प्रयोजनम् ॥ १०९ ॥

तदस्येत्येव। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं प्रयोजनं चेत् तद् भवति। इन्द्रमहः प्रयोजनमस्य ऐन्द्रमहिकम्। गाङ्गामहिकम्॥

विशाखाषाढादण् मन्थदण्डयोः ॥ ११० ॥

विशाखाषाढाशब्दाभ्यामण् प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन् विषये यथासंख्यं मन्थदण्डयोरभिधेययोः। विशाखा प्रयोजनमस्य वैशाखो मन्थः। आषाढो दण्डः ॥ चूडादिभ्य उपसंख्यानम्॥ चूडा प्रयोजनमस्य चौडम्। श्रद्धा प्रयोजनमस्य श्राद्धम्॥

अनुप्रवचनादिभ्यश्छः ॥ १११ ॥

अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति तदस्य प्रयोजनमित्यस्मिन् विषये। ठञोऽपवादः। अनुप्रवचनं प्रयोजनमस्य अनुप्रवचनीयम्। उत्थापनीयम् ॥ विशिपूरिपतिरुहिप्रकृतेरनात् सपूर्वपदादुपसंख्यानम् ॥ गृहप्रवेशनं प्रयोजनमस्य गृहप्रवेशनीयम्। प्रपापूरणीयम्। अश्वप्रपतनीयम्। प्रासादारोहणीयम्॥ स्वर्गादिभ्यो यद् वक्तव्यः॥ स्वर्गः प्रयोजनमस्य स्वर्ग्यम्। यशस्यम्। आयुष्यम्। काम्यम्। धन्यम्॥ पुण्याहवाचनादिभ्यो लुग् वक्तव्यः॥ पुण्याहवाचनं प्रयोजनमस्य पुण्याहवाचनम्। स्वस्ति- वाचनम्। शान्तिवाचनम्॥ अनुप्रवचन। उत्थापन। प्रवेशन। अनुप्रवेशन।

उपस्थापन। संवेशन। अनुवेशन। अनुवचन। अनुवादन। अनुवासन। आरम्भण। आरोहण। प्ररोहण। अन्वारोहण। अनुप्रवचनादिः॥

समापनात् सपूर्वपदात् ॥ ११२ ॥

समापनशब्दात् सपूर्वपदाद् विद्यमानपूर्वपदाच्छः प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन् विषये। ठञोऽपवादः। छन्दस्समापनं प्रयोजनमस्य छन्दःसमापनीयम्। व्याकरणसमापनीयम्। पदग्रहणं बहुच्पूर्वनिरासार्थम्॥

ऐकागारिकट् चौरे ॥ ११३ ॥

ऐकागारिकड् इति निपात्यते चौरेऽभिधेये। एकागारं प्रयोजनमस्य ऐकागारिकः चौरः। ऐकागारिकी। किमर्थमिदं निपात्यते, यावता प्रयोजनमित्येव सिद्धष्ठञ् ? चौरे नियमार्थं वचनम्। इह मा भूत्—एकागारं प्रयोजनमस्य भिक्षोरिति। टकारः कार्यावधारणार्थः। ङीबेव भवति, न ञित्स्वर इति। अपरे पुनरिकट् प्रत्ययं वृद्धिं च निपातयन्ति॥

आकालिकडाद्यन्तवचने ॥ ११४ ॥

आकालिकड् इति निपात्यत आद्यन्तवचने। समानकालशब्दस्य आकालशब्द आदेशः। आद्यन्तयोश्चैतद् विशेषणम्। इकट् प्रत्ययश्च निपात्यते। समानकालावाद्यन्तावस्य आकालिकः स्तनयित्नुः। आकालिकी विद्युत्। जन्मना तुल्यकालविनाशा। उत्पादानन्तरं विनाशिनीत्यर्थः॥ आकालाट् ठंश्च॥ चात् ठञ् च। आकालिका विद्युत्। ठञः पूर्णोऽवधिः॥

तेन तुल्यं क्रिया चेद् वतिः ॥ ११५ ॥

तेनेति तृतीयासमर्थात् तुल्यमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति, यत् तुल्यं क्रिया चेत् सा भवति। ब्राह्मणेन तुल्यं वर्तते ब्राह्मणवत्। राजवत्। क्रियाग्रहणं किम् ? गुणद्रव्यतुल्ये मा भूत्। पुत्रेण तुल्यः स्थूलः। पुत्रेण तुल्यः पिङ्गलः। पुत्रेण तुल्यो गोमान्॥

तत्र तस्येव ॥ ११६ ॥

तत्रेति सप्तमीसमर्थात् तस्येति षष्ठीसमर्थात् च इवार्थे वतिः प्रत्ययो भवति। मथुरायामिव मथुरावत् सुघ्ने प्राकारः। पाटलिपुत्रवत् साकेते परिखा। षष्ठीसमर्थात्—

---

१ – 'उत्पन्नानन्तरं विनाशीत्यर्थः' इति बाल०। २ – 'द्रव्य' इति नास्ति है०, पद०।

३ – इदमुदाहरणं नास्ति है०।

देवदत्तस्येव देवदत्तवत् यज्ञदत्तस्य गावः। यज्ञदत्तस्येव यज्ञदत्तवत् देवदत्तस्य दन्ताः॥

तदर्हम् ॥ ११७ ॥

तदिति द्वितीयासमर्थादर्हमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति। राजानमर्हति राजवत् पालनम्। ब्राह्मणवत्। ऋषिवत्। क्षत्रियवत्॥

उपसर्गाच्छन्दसि धात्वर्थे ॥ ११८ ॥

उपसर्गात् ससाधने धात्वर्थे वर्तमानात् स्वार्थे वतिः प्रत्ययो भवति छन्दसि विषये। यदुद्वतो॑ नि॒वतो॒ यासि॒ बप्स॒द् (ऋ० १०.१४२.४) । उद्गतानि निगतानि च ॥

तस्य भावस्त्वतलौ ॥ ११९ ॥

तस्येति षष्ठीसमर्थाद् भाव इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः। भवतोऽस्मादभिधानप्रत्ययाविति भावः। शब्दस्य प्रवृत्तिनिमित्तं भावशब्देनोच्यते। अश्वस्य भावः अश्वत्वम्। अश्वता। गोत्वम्। गोता॥

आ च त्वात् ॥ १२० ॥

'ब्रह्मणस्त्वः' (५.१.१३६) इति वक्ष्यति। आ एतस्मात् त्वसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः, तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ। वक्ष्यति—'पृथ्वादिभ्य इमनिज् वा' (५.१.१२२) इति। प्रथिमा। पार्थवम्। पृथुत्वम्। पृथुता। म्रदिमा। मार्दवम्। मृदुत्वम्। मृदुता। अपवादैः सह समावेशार्थं वचनम्। कर्मणि च विधानार्थं 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (५.१.१२४) इति। चकारो नञ्स्नञ्भ्यामपि समावेशार्थः। स्त्रिया भावः स्त्रैणम्। स्त्रीत्वम्। स्त्रीता। पुंसो भावः पुंस्त्वम्। पुंस्ता। पौंस्नम्॥

न नञ्पूर्वात् तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः॥ १२१॥

इत उत्तरे ये भावप्रत्ययाः ते नञ्पूर्वात् तत्पुरुषाद् न भवन्ति चतुरादीन् वर्जयित्वा। वक्ष्यति—'पत्यन्तपुरोहितादिभ्यो यक्' (५.१.१२८) इति। अपतित्वम्। अपतिता। अपटुत्वम्। अपटुता। अरमणीयत्वम्। अरमणीयता। नञ्पूर्वादिति किम् ? बार्हस्पत्यम्। प्राजापत्यम्। तत्पुरुषादिति किम् ? नास्य पटवः सन्तीत्यपटुः, तस्य भाव आपटवम्। आलघवम्। अचतुरादिभ्य इति किम् ? आचतुर्यम्। आसंगत्यम्। आलवण्यम्। आवट्यम्। आबुध्यम्। आकत्यम्। आरस्यम्। आलस्यम्॥

पृथ्वादिभ्य इमनिज् वा ॥ १२२ ॥

पृथु इत्येवमादिभ्यः प्रातिपदिकेभ्य इमनिच् प्रत्ययो भवति वा तस्य भाव इत्येतस्मिन्नर्थे। वावचनमणादेः समावेशार्थम्। पृथोर्भावः प्रथिमा, पार्थवम्। म्रदिमा, मार्दवम्। 'तुरिष्ठेमेयस्सु' (६.४.१५४), 'टेः' (६.४.१५५) इति टिलोपः। 'र ऋतो हलादेर्लघोः' (६.४.१६१) इति रेफादेशः। त्वतलौ सर्वत्र भवत एव। पृथुत्वम्, पृथुता। मृदुत्वम्, मृदुता॥ पृथु। मृदु। महत्। पटु। तनु। लघु। बहु। साधु। वेणु। आशु। बहुल। गुरु। दण्ड। ऊरु। खण्ड। चण्ड। बाल। अकिंचन। होड। पाक। वत्स। मन्द। स्वादु। ह्रस्व। दीर्घ। प्रिय। वृष। ऋजु। क्षिप्र। क्षुद्र। पृथ्वादिः॥

वर्णदृढादिभ्यः ष्यञ् च ॥ १२३ ॥

वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ् प्रत्ययो भवति, चकारा- दिमनिच् च, तस्य भाव इत्येतस्मिन् विषये। शुक्लस्य भावः शौक्ल्यम्, शुक्लिमा, शुक्लत्वम्, शुक्लता। काष्ण्यम्, कृष्णिमा, कृष्णत्वम्, कृष्णता। दृढादिभ्यः—दार्ढ्यम्, द्रढिमा, दृढत्वम्, दृढता। षकारो ङीषर्थः। औचिती। याथाकामी॥ दृढ। परिवृढ। भृश। कृश। चक्र। आम्र। लवण। ताम्र। अम्ल। शीत। उष्ण। जड। बधिर। पण्डित। मधुर। मूर्ख। मूक। वेर्यातलाभमतिमनःशारदानाम् (ग० सू० ११४)। समो मतिमनसोः (ग० सू० ११५)। दृढादिः॥

गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ १२४ ॥

गुणमुक्तवन्तो गुणवचनाः। गुणवचनेभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यञ् प्रत्ययो भवति, चकारादू भावे च। कर्मशब्दः क्रियावचनः। जडस्य भावः कर्म वा जाड्यम्। ब्राह्मणादिभ्यः खल्वपि—ब्राह्मण्यम्। माणव्यम्। आ पादपरिसमाप्तेर्भावकर्माधिकारः। ब्राह्मणादिराकृतिगणः। आदिशब्दः प्रकारवचनः॥ चातुर्वर्ण्यादीनां स्वार्थ उपसंख्यानम्॥ चत्वार एव वर्णाश्चातुर्वर्ण्यम्। चातुराश्रम्यम्। त्रैलोक्यम्। त्रैस्वर्यम्। षाड्गुण्यम्। सैन्यम्। सान्निध्यम्। सामीप्यम्। औपम्यम्। सौख्यम्॥ ब्राह्मण। वाडव। माणव। चोर। मूक। आराधय। विराधय। अपराधय। उपराधय। एकभाव। द्विभाव। त्रिभाव। अन्यभाव। समस्थ। विषमस्थ। परमस्थ। मध्यमस्थ। अनीश्वर। कुशल। कपि। चपल। अक्षेत्रज्ञ। निपुण। अर्हतो नुम् च (ग० सू० ११६)। आर्हन्त्यम्। संवादिन्। संवेशिन्। बहुभाषिन्। बालिश। दुष्पुरुष। कापुरुष। दायाद।

---

१ - 'क्षुद्र' इत्यधिकं है०। २ - 'जवने' इत्यधिकं बाल०।

विशसि। धूर्त। राजन्। संभाषिन्। शीर्षपातिन्। अधिपति। अलस। पिशाच। पिशुन। विशाल। गणपति। धनपति। नरपति। गडुल। निव। निधान। विष। सर्ववेदादिभ्यः स्वार्थे (ग० सू० ११७)। चतुर्वेदस्योभयपदवृद्धिश्च (ग० सू० ११८)। चातुर्वैद्यम्। ब्राह्मणादिः॥

स्तेनाद् यन् नलोपश्च ॥ १२५ ॥

स्तेनशब्दात् षष्ठीसमर्थात् भावकर्मणोर्यत् प्रत्ययो भवति, नशब्दस्य लोपश्च भवति। स्तेनस्य भावः कर्म वा स्तेयम्। स्तेनादिति केचिद् योगविभागं कुर्वन्ति। स्तेनात् ष्यञ् भवति। स्तैन्यम्। ततो यन्नलोपश्च। स्तेयम्॥

सख्युर्यः ॥ १२६ ॥

सखिशब्दाद् यः प्रत्ययो भवति भावकर्मणोरर्थयोः। सख्युर्भावः कर्म वा सख्यम् ॥ दूतवणिग्भ्यां चेति वक्तव्यम्॥ दूत्यम्। वणिज्यम्। कथं वाणिज्यम्? ब्राह्मणादित्वात्॥

कपिज्ञात्योर्ढक् ॥ १२७ ॥

कपिज्ञातिशब्दाभ्यां ढक् प्रत्ययो भवति भावकर्मणोरर्थयोः। कपेर्भावः कर्म वा कापेयम्। ज्ञातेयम्। यथासंख्यमर्थयोः सर्वत्रैवात्र प्रकरणे नेष्यते॥

पत्यन्तपुरोहितादिभ्यो यक् ॥ १२८ ॥

पत्यन्तात् प्रातिपदिकात् पुरोहितादिभ्यश्च यक् प्रत्ययो भवति भावकर्मणोरर्थयोः। सेनापतेर्भावः कर्म वा सैनापत्यम्। गार्हपत्यम्। प्राजापत्यम्। पौरोहित्यम्। राज्यम्॥ पुरोहित। राजन्। संग्रामिक। एषिक। वर्मित। खण्डिक। दण्डिक। छत्रिक। मिलिक। पिण्डिक। बाल। मन्द। स्तनिक। चूडितिक। कृषिक। पूतिक। पत्रिक। प्रतिक। अजानिक। सलनिक। सूचिक। शाक्वर। सूचक। पक्षिक। सारथिक। जलिक। सूतिक। अञ्जलिक। राजासे (ग० सू० ११९)। पुरोहितादिः॥

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ॥ १२९ ॥

प्राणभृज्जातिवाचिभ्यः प्रातिपदिकेभ्यो वयोवचनेभ्य उद्गात्रादिभ्यश्च अञ् प्रत्ययो भवति भावकर्मणोरर्थयोः। अश्वस्य भावः कर्म वा आश्वम्। औष्ट्रम्। वयोवचनेभ्यः—कौमारम्। कैशोरम्। उद्गात्रादिभ्यः—औद्गात्रम्। औन्नेत्रम्॥ उद्गातृ। उन्नेतृ। प्रतिहर्तृ। रथगणक। पक्षिगणक। सुष्ठु। दुष्ठु। अध्वर्यु। वधू। सुभग मन्त्रे (ग० सू० १२०)। उद्गात्रादिः॥

हायनान्तयुवादिभ्योऽण् ॥ १३० ॥

हायनान्तेभ्यः प्रातिपदिकेभ्यो युवादिभ्यश्चाण् प्रत्ययो भवति भावकर्मणोरर्थयोः। द्विहायनस्य भावः कर्म वा द्वैहायनम्। त्रैहायनम्। युवादिभ्यः—यौवनम्। स्थाविरम् ॥ श्रोत्रियस्य यलोपश्च वाच्यः॥ श्रोत्रियस्य भावः कर्म वा श्रौत्रम्॥ युवन्। स्थविर। होतृ। यजमान। कमण्डलु। पुरुषासे (ग० सू० १२१)। सुहृत्। यातृ। श्रवण। कुस्त्री। सुस्त्री। सुहृदय। सुभ्रातृ। वृषल। दुर्भ्रातृ। हृदयासे (ग० सू० १२२)। क्षेत्रज्ञ। कृतक। परिव्राजक। कुशल। चपल। निपुण। पिशुन। सब्रह्मचारिन्। कुतूहल। अनृशंस। युवादिः॥

इगन्ताच्च लघुपूर्वात् ॥ १३१ ॥

इगन्ताच्च लघुपूर्वादण् प्रत्ययो भवति भावकर्मणोः। लघुपूर्वग्रहणेन प्रातिपदिक-समुदायो विशेष्यते। लघुः पूर्वोऽवयवोऽस्येति लघुपूर्वः। कुतः पुनरसौ लघुः पूर्वः ? इक्संनिधानादिक इति विज्ञायते। लघुः पूर्वो यस्मादिकः तदन्तात् प्रातिपदिकादित्ययमर्थो विवक्षितः। अपरे तत्पुरुषकर्मधारयं वर्णयन्ति। इक् चासावन्तश्चेतीगन्तः। लघुपूर्व-ग्रहणेन स एव विशेष्यते। पश्चात् तेन प्रातिपदिकस्य तदन्तविधिरिति। अस्मिन् व्याख्यानेऽन्तग्रहणमतिरिच्यते। लघुपूर्वादिक इत्येतावदेव वाच्यं स्यात्। शुचेर्भावः कर्म वा शौचम्। मौनम्। नागरम्। हारीतकम्। पाटवम्। लाघवम्। इगन्तादिति किम् ? पटत्वम्। घटत्वम्। लघुपूर्वादिति किम् ? कण्डूत्वम्। पाण्डुत्वम्। कथं काव्यमिति ? ब्राह्मणादिषु कविशब्दो द्रष्टव्यः॥

योपधाद् गुरूपोत्तमाद् वुञ् ॥ १३२ ॥

त्रिप्रभृतीनामन्तस्य समीपमुपोत्तमम्। गुरुरुपोत्तमं यस्य तद् गुरूपोत्तमम्। यकारो-पधाद् गुरूपोत्तमाद् वुञ् प्रत्ययो भवति भावकर्मणोः। रमणीयस्य भावः कर्म वा रामणीयकम्। वासनीयकम्। योपधादिति किम् ? विमानत्वम्। गुरूपोत्तमादिति किम् ? क्षत्रियत्वम् ॥ सहायाद् वेति वक्तव्यम्॥ साहायकम्, साहाय्यम्॥

द्वन्द्वमनोज्ञादिभ्यश्च ॥ १३३ ॥

द्वन्द्वसंज्ञकेभ्यो मनोज्ञादिभ्यश्च वुञ् प्रत्ययो भवति भावकर्मणोः। गोपालपशु-पालानां भावः कर्म वा गौपालपशुपालिका। शैष्योपाध्यायिका। कौत्सकुशिकिका।

---

१ - 'लघुपूर्वः' इति बाल०।

मनोज्ञादिभ्यः—मानोज्ञकम्। काल्याणकम्॥ मनोज्ञ। कल्याण। प्रियरूप। छान्दस। छात्र। मेधाविन्। अभिरूप। आढ्य। कुलपुत्र। श्रोत्रिय। चोर। धूर्त। वैश्वदेव। युवन्। ग्रामपुत्र। ग्रामखण्ड। ग्रामकुमार। अमुष्यपुत्र। अमुष्यकुल। शतपुत्र। कुशल। मनोज्ञादिः॥

गोत्रचरणाच् छ्लाघात्याकारतदवेतेषु ॥ १३४ ॥

गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्ययो भवति, प्रत्येकं भाव-कर्मणोरर्थयोः श्लाघादिषु विषयभूतेषु। तत्र श्लाघा विकत्थनम्। अत्याकारः पराधिक्षेपः। तदवेतस्तत्प्राप्तस्तज्ज्ञो वा। तदिति गोत्रचरणयोर्भावकर्मणी निर्दिश्येते। तत्प्राप्तस्तदव-गतवान् तदवेत इत्युच्यते। श्लाघायां तावत्—गार्गिकया श्लाघते। काठिकया श्लाघते। गार्ग्यत्वेन कठत्वेन च विकत्थत इत्यर्थः। अत्याकारे—गार्गिकयात्याकुरुते। काठिकयात्या-कुरुते। गार्ग्यत्वेन कठत्वेन च परानधिक्षिपतीत्यर्थः। तदवेतः—गार्गिकामवेतः। काठिका-मवेतः। गार्ग्यत्वं कठत्वं च प्राप्त इत्यर्थः। तद् वावगतवानित्यर्थः। श्लाघादिष्विति किम्? गार्ग्यत्वम्। कठत्वम्॥

होत्राभ्यश्छः ॥ १३५ ॥

होत्राशब्द ऋत्विग्विशेषवचनः। ऋत्विग्विशेषवाचिभ्यश्छः प्रत्ययो भवति भाव-कर्मणोः। अच्छावाकस्य भावः कर्म वा अच्छावाकीयम्। मित्रावरुणीयम्। ब्राह्मणाच्छं-सीयम्। आग्नीध्रीयम्। प्रतिप्रस्थात्रीयम्। त्वष्ट्रीयम्। पोत्रीयम्। बहुवचनं स्वरूप-विधिनिरासार्थम्॥

ब्रह्मणस्त्वः ॥ १३६ ॥

होत्राभ्य इत्यनुवर्तते। ब्रह्मन्शब्दाद् होत्रावाचिनस्त्वः प्रत्ययो भवति भावकर्मणोः। छस्यापवादः। ब्रह्मणो भावः कर्म वा ब्रह्मत्वम्। नेति वक्तव्ये त्ववचनं तलो बाधनार्थम्। यस्तु जातिशब्दो ब्राह्मणपर्यायो ब्रह्मन्शब्दः, ततस्त्वतलौ भवत एव। ब्रह्मत्वम्। ब्रह्मता। भवनावधिकयोर्नञ्स्नञोरधिकारः समाप्तः॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ पञ्चमाध्यायस्य प्रथमः पादः॥

॥ पञ्चमाध्यायस्य द्वितीयः पादः ॥

धान्यानां भवने क्षेत्रे खञ् ॥ १ ॥

निर्देशादेव समर्थविभक्तिः। धान्यविशेषवाचिभ्यः षष्ठीसमर्थेभ्यो भवनेऽभिधेये खञ् प्रत्ययो भवति, तच्चेद् भवनं क्षेत्रं भवति। भवनमिति भवन्ति जायन्तेऽस्मिन्निति भवनम्। मुद्गानां भवनं क्षेत्रं मौद्गीनम्। कौद्रवीणम्। कौलत्थीनम्। धान्यानामिति किम् ? तृणानां भवनं क्षेत्रमित्यत्र न भवति। क्षेत्रमिति किम् ? मुद्गानां भवनं कुसूलम्। बहुवचनं स्वरूपविधिनिरासार्थम्॥

व्रीहिशाल्योर्ढक् ॥ २ ॥

व्रीहिशालिशब्दाभ्यां ढक् प्रत्ययो भवति भवने क्षेत्रेऽभिधेये। खञोऽपवादः। व्रीहीणां भवनं क्षेत्रं व्रैहेयम्। शालेयम्॥

यवयवकषष्टिकाद् यत् ॥ ३ ॥

यवादिभ्यः शब्देभ्यो यत् प्रत्ययो भवति भवने क्षेत्रेऽभिधेये। खञोऽपवादः। यवानां भवनं क्षेत्रं यव्यम्। यवक्यम्। षष्टिक्यम्॥

विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥ ४ ॥

तिल माष उमा भङ्गा अणु इत्येतेभ्यो विभाषा यत् प्रत्ययो भवति भवने क्षेत्रेऽभिधेये। खञि प्राप्ते वचनम्, पक्षे सोऽपि भवति। उमाभङ्गयोरपि धान्यत्वमाश्रितमेव। तिल माष उमा भङ्गा अणु—एषां भवनं क्षेत्रं तिल्यम्, तैलीनम्। माष्यम्, माषीणम्। उम्यम्, औमीनम्। भङ्ग्यम्, भाङ्गीनम्। अणव्यम्, आणवीनम्॥

सर्वचर्मणः कृतः खखञौ ॥ ५ ॥

सर्वचर्मन्शब्दात् तृतीयासमर्थात् कृत इत्यस्मिन्नर्थे खखञौ प्रत्ययौ भवतः। सर्वशब्दश्चात्र प्रत्ययार्थेन कृतेन संबध्यते, न चर्मणा। तत्रायमसमर्थसमासो द्रष्टव्यः। सर्वश्चर्मणा कृत इत्येतस्मिन् वाक्यार्थे वृत्तिः। सर्वचर्मीणः। सार्वचर्मीणः॥

यथामुखसंमुखस्य दर्शनः खः ॥ ६ ॥

---

१ - ' तिलानां भवनं क्षेत्रम् ' इति है०।

यथामुखशब्दात् संमुखशब्दात् षष्ठीसमर्थाद् दर्शन इत्येतस्मिन्नर्थे खः प्रत्ययो भवति। दृश्यतेऽस्मिन्निति दर्शनः, आदर्शादिः प्रतिबिम्बाश्रय उच्यते। निपातनात् सादृश्येऽव्ययीभावः। यथामुखं दर्शनो यथामुखीनः। सर्वस्य मुखस्य दर्शनः सम्मुखीनः॥

तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ॥ ७ ॥

तदिति द्वितीया समर्थविभक्तिः। व्याप्नोतीति प्रत्ययार्थः। परिशिष्टं प्रकृतिविशेषणम्। सर्वादेः प्रातिपदिकात् पथिन् अङ्ग कर्मन् पत्र पात्र इत्येवमन्ताद् द्वितीयासमर्थाद् व्याप्नोतीत्यस्मिन्नर्थे खः प्रत्ययो भवति। सर्वपथं व्याप्नोति सर्वपथीनो रथः। सर्वाङ्गीणस्तापः। सर्वकर्मीणः पुरुषः। सर्वपत्रीणः सारथिः। सर्वपात्रीण ओदनः॥

आप्रपदं प्राप्नोति ॥ ८ ॥

प्रपदमिति पादस्याग्रमुच्यते। आङ् मर्यादायाम्। तयोरव्ययीभावः। आप्रपदशब्दात् तदिति द्वितीयासमर्थात् प्राप्नोतीत्यस्मिन्नर्थे खः प्रत्ययो भवति। आप्रपदं प्राप्नोति आप्रपदीनः पटः। शरीरेणासंबद्धस्यापि पटस्य प्रमाणमाख्यायते॥

अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ ९ ॥

अनुपदादिभ्यः शब्देभ्यस्तदिति द्वितीयासमर्थेभ्यो यथासंख्यं बद्धा भक्षयति नेय इत्येतेष्वर्थेषु खः प्रत्ययो भवति। अनुरायामे सादृश्ये वा। अनुपदं बद्धा उपानत् अनुपदीना। पदप्रमाणेत्यर्थः। सर्वान्नानि भक्षयति सर्वान्नीनो भिक्षुः। अयः प्रदक्षिणम्, अनयः प्रसव्यम्। प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन् परशारैः पदानामसमावेशः सोऽयानयः। अयानयं नेयः अयानयीनः शारः। फलकशिरसि स्थित इत्यर्थः॥

परोवरपरंपरपुत्रपौत्रमनुभवति ॥ १० ॥

परोवर परम्पर पुत्रपौत्र इत्येतेभ्यस्तदिति द्वितीयासमर्थेभ्योऽनुभवतीत्यस्मिन्नर्थे खः प्रत्ययो भवति। परोवरेति परस्योत्वं प्रत्ययसंनियोगेन निपात्यते। परांश्चावरांश्चानुभवति परोवरीणः। परपरतराणां च परम्परभावो निपात्यते। परांश्च परतरांश्चानुभवति परम्परीणः। पुत्रपौत्राननुभवति पुत्रपौत्रीणः। परम्परशब्दो विनापि प्रत्ययेन दृश्यते—मन्त्रिपरम्परा मन्त्रं भिनत्तीति। तच्छब्दान्तरमेव द्रष्टव्यम्॥

अवारपारात्यन्तानुकामं गामी ॥ ११ ॥

अवारपार अत्यन्त अनुकाम इत्येतेभ्यो द्वितीयासमर्थेभ्यो गामीत्येतस्मिन्नर्थे खः प्रत्ययो भवति। गमिष्यतीति गामी, 'भविष्यति गम्यादयः' (३.३.३) इति। 'अकेनोर्भ-

विष्यदाधमर्ण्ययोः' (२.३.७०) इति षष्ठीप्रतिषेधः। अवारपारं गामी अवारपारीणः ॥ विगृहीतादपीष्यते॥ अवारीणः, पारीणः॥ विपरीताच्च॥ पारावारीणः। अत्यन्तं गामी अत्यन्तीनः। भृशं गन्तेत्यर्थः। अनुकामं गामी अनुकामीनः। यथेष्टं गन्तेत्यर्थः॥

समांसमां विजायते ॥ १२ ॥

समांसमामिति वीप्सा। सुबन्तसमुदायः प्रकृतिः। विजायते गर्भं धारयतीति प्रत्ययार्थः। गर्भधारणेन सकलापि समा व्याप्यत इति अत्यन्तसंयोगे द्वितीया (२.१.२६)। समांसमां विजायते समांसमीना गौः। समांसमीना वडवा ॥ पूर्वपदे सुपोऽलुग् वक्तव्यः॥ केचित् तु समायांसमायां विजायत इति विगृह्णन्ति, गर्भविमोचने तु विजनिर्वर्तत इत्याहुः। तेषां पूर्वपदे यलोपमात्रं निपात्यते, परिशिष्टस्यालुग् वक्तव्यः॥ अनुत्पत्तावुत्तरपदस्य च वा यलोपो वक्तव्यः॥ समांसमां विजायते, समायांसमायां विजायत इति वा॥

अद्यश्वीनावष्टब्धे ॥ १३ ॥

विजायत इति वर्तते। अद्यश्वीन इति निपात्यत अवष्टब्धे विजने, आसन्ने प्रसवे। आविदूर्ये हि मूर्धन्यो विधीयते, 'अवाच्चालम्बनाविदूर्ययोः' (८.३.६८) इति। अद्य वा श्वो वा विजायते अद्यश्वीना गौः। अद्यश्वीना वडवा। केचित् तु विजायत इति नानुवर्तयन्ति, अवष्टब्धमात्रे निपातनमित्याहुः। अद्यश्वीनं मरणम्। अद्यश्वीनो वियोग इति॥

आगवीनः ॥ १४ ॥

आगवीन इति निपात्यते। गोराङ्पूर्वाद् आ तस्य गोः प्रतिदानात् कर्मकारिणि खः प्रत्ययो निपात्यते। आगवीनः कर्मकरः। यो गवा भृतः कर्म करोति आ तस्य गोः प्रत्यर्पणात्॥

अनुग्वलंगामी ॥ १५ ॥

गोः पश्चाद् अनुगु। अनुगुशब्दादलंगामीत्यस्मिन्नर्थे खः प्रत्ययो भवति। अनुगु पर्याप्तं गच्छति अनुगवीनो गोपालकः॥

अध्वनो यत्खौ ॥ १६ ॥

---

१ - ' विगृहीतादपि भवति ' इति न्यासः। २ - ' पारीणः ' इति नास्ति मुद्रितेषु।

३ - ' अपि ' इति न्यासः। ४ - ' प्रतिपादनात् ' इति बाल० है०।

तदिति द्वितीया समर्थविभक्तिरनुवर्तते। अलंगामीति च प्रत्ययार्थः। अध्वन्-शब्दाद् द्वितीयासमर्थादलंगामीत्येतस्मिन्नर्थे यत्खौ प्रत्ययौ भवतः। अध्वानमलंगामी अध्वन्यः, अध्वनीनः। 'ये चाभावकर्मणोः' (६.४.१६८), 'आत्माध्वानौ खे' (६.४.१६९) इति प्रकृतिभावः॥

अभ्यमित्राच्छ च ॥ १७ ॥

अभ्यमित्रशब्दाद् द्वितीयासमर्थादलंगामीत्यस्मिन्नर्थे छः प्रत्ययो भवति, चकाराद् यत्खौ च। अभ्यमित्रमलंगामी अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः। अमित्राभिमुखं सुष्ठु गच्छतीत्यर्थः॥

गोष्ठात् खञ् भूतपूर्वे ॥ १८ ॥

गावस्तिष्ठन्त्यस्मिन्निति गोष्ठम्। गोष्ठशब्देन सन्निहितगोसमूहो देश उच्यते। भूतपूर्वग्रहणं तस्यैव विशेषणम्। गोष्ठशब्दाद् भूतपूर्वोपाधिकात् स्वार्थे खञ् प्रत्ययो भवति। गोष्ठो भूतपूर्वो गौष्ठीनो देशः। भूतपूर्वग्रहणं किम् ? गोष्ठो वर्तते॥

अश्वस्यैकाहगमः ॥ १९ ॥

निर्देशादेव समर्थविभक्तिः। अश्वशब्दात् षष्ठीसमर्थादेकाहगम इत्येतस्मिन्नर्थे खञ् प्रत्ययो भवति। एकाहेन गम्यत इत्येकाहगमः। अश्वस्यैकाहगमोऽध्वा आश्वीनः। आश्वीनानि (तां० ब्रा० २१.१.९) शतं पतित्वा॥

शालीनकौपीने अधृष्टाकार्ययोः ॥ २० ॥

शालीनकौपीनशब्दौ निपात्येते यथासंख्यमधृष्टेऽकार्ये चाभिधेये। अधृष्टोऽप्रगल्भः। अकार्यमकरणार्हं विरुद्धम्। शालीनकौपीने अधृष्टाकार्ययोः पर्यायौ यथाकथंचिद् व्युत्पादयितव्यौ। शालाप्रवेशनमर्हति कूपावतारमर्हति इति खञ् प्रत्यय उत्तरपदलोपश्च निपात्यते। शालीनो जडः। कौपीनं पापम्॥

व्रातेन जीवति ॥ २१ ॥

निर्देशादेव तृतीया समर्थविभक्तिः। व्रातशब्दात् तृतीयासमर्थाद् जीवतीत्यस्मिन्नर्थे खञ् प्रत्ययो भवति। नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः। उत्सेधः शरीरम्, तदायास्य ये जीवन्ति, त उत्सेधजीविनः, तेषां कर्म व्रातम्। तेन व्रातेन जीवति व्रातीनः। तेषामेव व्रातानामन्यतम उच्यते। यस्त्वन्यस्तदीयेन जीवति, तत्र नेष्यते॥

---

१. 'तदावासेन' इति बाल०।

साप्तपदीनं सख्यम् ॥ २२ ॥

साप्तपदीनमिति निपात्यते सख्येऽभिधेये। सप्तभिः पदैरवाप्यते साप्तपदीनम्। सख्यं जनाः साप्तपदीनमाहुः। कथं साप्तपदीनः सखा, साप्तपदीनं मित्रमिति ? यदा गुणप्रधानः साप्तपदीनशब्दः सखिभावे तत्कर्मणि च वर्तते, तदा सख्यशब्देन सामानाधिकरण्यं भवति, यदा तु लक्षणया वर्तते, तदा पुरुषेण सामानाधिकरण्यं भवति॥

हैयङ्गवीनं संज्ञायाम् ॥ २३ ॥

हैयङ्गवीनं निपात्यते संज्ञायां विषये। ह्योगोदोहस्य हियङ्ग्वादेशः, तस्य विकारे खञ् प्रत्ययो भवति संज्ञायाम्। ह्योगोदोहस्य विकारो हैयङ्गवीनम्। घृतस्य संज्ञा। तेनेह न भवति—ह्योगोदोहस्य विकार उदश्वित्॥

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ २४ ॥

तस्येति षष्ठीसमर्थेभ्यः पील्वादिभ्यः कर्णादिभ्यश्च यथासंख्यं पाकमूलयोरर्थयोः कुणब् जाहच् इत्येतौ प्रत्ययौ भवतः। पीलूनां पाकः पीलुकुणः। कर्कन्धुकुणः। कर्णादिभ्यः—कर्णस्य मूलं कर्णजाहम्॥ पीलु। कर्कन्धु। शमी। करीर। कुवल। बदर। अश्वत्थ। खदिर। पील्वादिः॥ कर्ण। अक्षि। नख। मुख। मख। केश। पाद। गुल्फ। भ्रूभङ्ग। दन्त। ओष्ठ। पृष्ठ। अङ्गुष्ठ। कर्णादिः॥

पक्षात् तिः ॥ २५ ॥

तस्येत्येव। तस्येति षष्ठीसमर्थात् पक्षशब्दाद् मूलेऽभिधेये तिः प्रत्ययो भवति। मूलग्रहणमनुवर्तते, न पाकग्रहणम्, 'एकयोगनिर्दिष्टानामप्येकदेशोऽनुवर्तते' (परि० १८) इति। पक्षस्य मूलं पक्षतिः प्रतिपत्॥

तेन वित्तश्चुञ्चुप्चणपौ ॥ २६ ॥

तेनेति तृतीयासमर्थाद् वित्त इत्येतस्मिन्नर्थे चुञ्चुप् चणप् इत्येतौ प्रत्ययौ भवतः। वित्तः प्रतीतो ज्ञात इत्यर्थः। विद्यया वित्तो विद्याचुञ्चुः। विद्याचणः॥

विनञ्भ्यां नानाञौ न सह ॥ २७ ॥

---

१ - 'केशचणः' इति बाल०।

वि नञ् इत्येताभ्यां यथासंख्यं ना नाञ् इत्येतौ प्रत्ययौ भवतः। न सहेति प्रकृतिविशेषणम्। असहार्थे पृथग्भावे वर्तमानाभ्यां विनञ्भ्यां स्वार्थे नानाञौ प्रत्ययौ भवतः। विना। नाना॥

वेः शालच्छङ्कटचौ ॥ २८ ॥

विशब्दात् शालच् शङ्कटच् इत्येतौ प्रत्ययौ भवतः। ससाधनक्रियावचनादुपसर्गात् स्वार्थे प्रत्ययौ भवतः। विगते शृङ्गे विशाले। विशङ्कटे। तद्योगाद् गौरपि विशालो विशङ्कट इत्युच्यते। परमार्थतस्तु गुणशब्दा एते यथाकथंचिद् व्युत्पाद्यन्ते। नात्र प्रकृति-प्रत्ययार्थयोरभिनिवेशः॥

संप्रोदश्च कटच् ॥ २९ ॥

सम् प्र उद् इत्येतेभ्यः कटच् प्रत्ययो भवति। चकाराद् वेश्च। संकटम्। प्रकटम्। उत्कटम्। विकटम् ॥ कटच्प्रकरणेऽलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् ॥ अलाबूनां रजोऽलाबूकटम्। तिलकटम्। उमाकटम्। भङ्गाकटम्॥ गोष्ठादयः स्थानादिषु पशुनामादिभ्य उपसंख्यानम् ॥ गवां स्थानं गोगोष्ठम्। महिषीगोष्ठम्॥ संघाते कटज् वक्तव्यः॥ अवीनां संघातोऽविकटम्॥ विस्तारे पटज् वक्तव्यः॥ अविपटम् ॥ द्वित्वे गोयुगच्॥ उष्ट्रगोयुगम्। अश्वगोयुगम्॥ प्रकृत्यर्थस्य षट्त्वे षड्गवच्॥ हस्तिषड्गवम्। अश्वषड्गवम्॥ विकारे स्नेहे तैलच्॥ एरण्डतैलम्। इङ्गुदतैलम्। तिलतैलम्॥ भवने क्षेत्र इक्ष्वादिभ्यः शाकटशाकिनौ॥ इक्षुशाकटम्। इक्षुशाकिनम्। मूलशाकटम्। मूल-शाकिनम्॥

अवात् कुटारच्च ॥ ३० ॥

अवशब्दात् कुटारच् प्रत्ययो भवति, चकारात् कटच्। अवकुटारम्। अवकटम्॥

नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः ॥ ३१ ॥

अवादित्येव। नमनं नतम्। नासिकायाः संबन्धिनि नतेऽभिधेये टीटच् नाटच् भ्रटच् इत्येते प्रत्यया भवन्ति संज्ञायां विषये। नासिकाया नतम् अवटीटम्। अवनाटम्। अवभ्रटम्। तद्योगाद् नासिकापि, पुरुषोऽपि तथोच्यते, अवटीटः। अवनाटः। अवभ्रट इति॥

---

१ - 'मूलकशा० ' इति बाल०।

नेर्बिडज्बिरीसचौ ॥ ३२ ॥

नते नासिकाया इत्यनुवर्तते, संज्ञायामिति च। निशब्दाद् नासिकाया नतेऽभिधेये बिडज् बिरीसच् इत्येतौ प्रत्ययौ भवतः। निबिडम्। निबिरीसम्। तद्योगाद् नासिकापि, पुरुषोऽपि निबिडः, निबिरीसः। कथं निबिडाः केशाः, निबिडं वस्त्रम् ? उपमानाद् भविष्यति॥

इनच्पिटच्चिकचि च ॥ ३३ ॥

नेरित्येव, नते नासिकाया इति च। निशब्दाद् नासिकाया नतेऽभिधेय इनच् पिटच् इत्येतौ प्रत्ययौ भवतः, तत्संनियोगेन च निशब्दस्य यथासंख्यं चिक चि इत्येतावादेशौ भवतः। चिकिनः। चिपिटः ॥ ककारः प्रत्ययो वक्तव्यश्चिक् च प्रकृत्यादेशः॥ चिक्कः। तथा चोक्तम्—'इनच्पिटच्काश्चिककचिचिकादेशाश्च' (महाभाष्य ५.२.३३) वक्तव्या इति ॥ क्लिन्नस्य चिल्पिल्लश्चास्य चक्षुषी॥ क्लिन्नस्य चिल् पिल् इत्येतावादेशौ भवतो लश्च प्रत्ययोऽस्य चक्षुषी इत्येतस्मिन्नर्थे । क्लिन्ने अस्य चक्षुषी चिल्लः। पिल्लः ॥ चुलादेशो वक्तव्यः॥ चुल्लः। अस्येत्यनेन नार्थः। चक्षुषोरेवाभिधाने प्रत्यय इष्यते। क्लिन्ने चक्षुषी चिल्ले। पिल्ले। चुल्ले। तद्योगात् तु पुरुषस्तथोच्यते॥

उपाधिभ्यां त्यकन्नासन्नारूढयोः ॥ ३४ ॥

उप अधि इत्येताभ्यां यथासंख्यमासन्नारूढयोर्वर्तमानाभ्यां स्वार्थे त्यकन् प्रत्ययो भवति। संज्ञाधिकारात् च नियतविषयमासन्नारूढं गम्यते। पर्वतस्यासन्नमुपत्यका। तस्यैवारूढम् अधित्यका। 'प्रत्ययस्थात् कात् पूर्वस्या०' (७.३.४४) इतीत्वमत्र न भवति, संज्ञाधिकारादेव॥

कर्मणि घटोऽठच् ॥ ३५ ॥

निर्देशादेव समर्थविभक्तिः। कर्मशब्दात् सप्तमीसमर्थाद् घट इत्येतस्मिन्नर्थेऽठच् प्रत्ययो भवति। घटत इति घटः। कर्मणि घटते कर्मठः पुरुषः॥

तदस्य संजातं तारकादिभ्य इतच् ॥ ३६ ॥

तदिति प्रथमासमर्थेभ्यस्तारकादिभ्यः शब्देभ्योऽस्येति षष्ट्यर्थ इतच् प्रत्ययो भवति। संजातग्रहणं प्रकृतिविशेषणम्। तारकाः संजाता अस्य नभसस्तारकितं नभः। पुष्पितो वृक्षः॥ तारका। पुष्प। मुकुल। कण्टक। पिपासा। सुख। दुःख। ऋजीष। कुड्मल। सूचक। रोग। विचार। व्याधि । निष्क्रमण। मूत्र। पुरीष। किसलय। कुसुम। प्रचार।

तन्द्रा। वेग। पुक्षा। श्रद्धा। उत्कण्ठा। भर। द्रोह। गर्भादप्राणिनि (ग० सू० १२३)। तारकादिराकृतिगणः॥

प्रमाणे द्वयसज्दघ्नञ्मात्रचः ॥ ३७ ॥

तदस्येत्यनुवर्तते। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे द्वयसच् दघ्नच् मात्रच् इत्येते प्रत्यया भवन्ति, यत् तत् प्रथमासमर्थं प्रमाणं चेत् तद् भवति। ऊरुः प्रमाणमस्य ऊरुद्वयसम्। ऊरुदघ्नम्। ऊरुमात्रम्। जानुद्वयसम्। जानुदघ्नम्। जानुमात्रम्।

प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम।

ऊरुद्वयसमुदकम्। ऊरुदघ्नमुदकम्। मात्रच् पुनरविशेषेण प्रस्थमात्रमित्यपि भवति ॥ प्रमाणे लो वक्तव्यः॥ प्रमाणशब्दा इति ये प्रसिद्धाः, तेभ्य उत्पन्नस्य प्रत्ययस्य लुग् भवति। शमः प्रमाणमस्य शमः। दिष्टिः। वितस्तिः॥ द्विगोर्नित्यम्॥ द्वौ शमौ प्रमाणमस्य द्विशमः। त्रिशमः। द्विवितस्तिः। नित्यग्रहणं किम् ? संशये श्राविणं वक्ष्यति, तत्रापि द्विगोर्लुगेव यथा स्यात्। द्वे दिष्टी स्यातां वा न वा द्विदिष्टिः॥ डट् स्तोमे वक्तव्यः॥ पञ्चदशः स्तोमः। सप्तदशी रात्रिः। टित्त्वाद् ङीप्॥ शनूशतोर्डिनिर्वक्तव्यः॥ पञ्च- द॒शिनो॑ऽर्धमा॒साः त्रिं॒शिनो॒ मासा॑ः (तै० सं० ७.५.२०.१) ॥ विंशतेश्चेति वक्तव्यम्॥ विंशिनोऽङ्गिरसः (गो० ब्रा० १.१.८)॥ प्रमाणपरिमाणाभ्यां संख्यायाश्चापि संशये मात्रज् वक्तव्यः॥ शममात्रम्। दिष्टिमात्रम्। प्रस्थमात्रम्। कुडवमात्रम्। पञ्चमात्रम्। दशमात्रा गावः॥ वत्वन्तात् स्वार्थे द्वयसज्मात्रचौ बहुलम्॥ तावदेव तावद्द्वयसम्। तावन्मात्रम्। एतावद्द्वयसम्। एतावन्मात्रम्। यावद्द्वयसम्। यावन्मात्रम्॥

पुरुषहस्तिभ्यामण् च ॥ ३८ ॥

तदस्येत्येव, प्रमाण इति च। पुरुषहस्तिभ्यां प्रथमासमर्थाभ्यां प्रमाणोपाधिकाभ्यामस्येति षष्ठ्यर्थेऽण् प्रत्ययो भवति, चकारादु द्वयसजादयश्च। पुरुषः प्रमाणमस्य पौरुषम्। पुरुषद्वयसम्। पुरुषदघ्नम्। पुरुषमात्रम्। हास्तिनम्। हस्तिद्वयसम्। हस्तिदघ्नम्। हस्तिमात्रम्। द्विगोर्नित्यं लुक्। द्विपुरुषमुदकम्। त्रिपुरुषमुदकम्। द्विहस्ति। त्रिहस्ति। द्विपुरुषी। त्रिपुरुषी। द्विहस्तिनी। त्रिहस्तिनी॥

यत्तदेतेभ्यः परिमाणे वतुप् ॥ ३९ ॥

तदस्येत्येव। यत्तदेतेभ्यः प्रथमासमर्थेभ्यः परिमाणोपाधिकेभ्योऽस्येति षष्ठ्यर्थे

---

१ - 'बुभुक्षा' इत्यधिकं क्वचित्।
२ - 'पञ्चदशी' इति पाठान्तरम्।
३ - 'च' इति नास्ति है०।

वतुप् प्रत्ययो भवति। यत् परिमाणमस्य यावान्। तावान्। एतावान्। प्रमाणग्रहणेऽनुवर्तमाने परिमाणग्रहणं प्रमाणपरिमाणयोर्भेदात्।

डावतावर्थवैशेष्यान् निर्देशः पृथगुच्यते।
मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोः॥

॥ वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम्॥ न त्वावाँ अ॒न्यो दि॒व्यो न पार्थि॒वो न जा॒तो न ज॑निष्यते (ऋ० ७.३२.२३)। त्वाव॑तः पुरूवसो (ऋ० ८.४६.१)। य॒ज्ञं विप्र॑स्य॒ माव॑तः (ऋ० १.१४२.२)। त्वत्सदृशस्य मत्सदृशस्येत्यर्थः॥

किमिदम्भ्यां वो घः ॥ ४० ॥

किमिदंभ्यामुत्तरस्य वतुपो वकारस्य घकारादेशो भवति। कियान्। इयान्। एतदेव चादेशविधानं ज्ञापकं किमिदंभ्यां वतुप् प्रत्ययो भवतीति। अथ वा योगविभागेन वतुपं विधाय पश्चाद् वो घो विधीयते॥

किमः संख्यापरिमाणे डति च ॥ ४१ ॥

संख्यायाः परिमाणं संख्यापरिच्छेद इत्यर्थः। संख्यापरिमाणे वर्तमानात् किमः प्रथमासमर्थादस्येति षष्ठ्यर्थे डतिः प्रत्ययो भवति। चकाराद् वतुप्। तस्य च वकारस्य घादेशो भवति। पृच्छ्यमानत्वात् परिच्छेदोपाधिकायां संख्यायां वर्तमानात् किमः प्रत्ययो विज्ञायते। का संख्या परिमाणमेषां ब्राह्मणानां कति ब्राह्मणाः। कियन्तो ब्राह्मणाः। अथवा संख्यैव परिमाणात्मिका परिच्छेदस्वभावा गृह्यते—का संख्या परिमाणं येषामिति। ननु च संख्या एवमात्मिकैव परिच्छेदस्वभावा, सा किमर्थं परिमाणेन विशेष्यते? यत्रापरिच्छेदकत्वेन विवक्ष्यते तत्र मा भूदिति। क्षेपे हि परिच्छेदो नास्ति—केयमेषां संख्या दशानामिति॥

संख्याया अवयवे तयप् ॥ ४२ ॥

तदस्येत्येव। संख्याया अवयवे वर्तमानाया अस्येति षष्ठ्यर्थे तयप् प्रत्ययो भवति। अवयवा अवयविनः संबन्धिन इति सामर्थ्यादवयवी प्रत्ययार्थो विज्ञायते। पञ्च अवयवा अस्य पञ्चतयम्। दशतयम्। चतुष्टयम्। चतुष्टयी॥

द्वित्रिभ्यां तयस्यायज् वा ॥ ४३ ॥

---

१ - 'अवयवावयविनः' इति है०। २ - 'यस्य' इति है०।

पूर्वेण विहितस्य तयस्य द्वित्रिभ्यां परस्य वायजादेशो भवति। द्वावयवावास्य द्वयम्, द्वितयम्। त्रयम्, त्रितयम्। तयग्रहणं स्थानिनिर्देशार्थम्। अन्यथा प्रत्ययान्तरमयज् विज्ञायेत। तत्र को दोषः ? त्रयी गतिरिति तयनिबन्धन ईकारो न स्यात् , 'प्रथमचरमतया०' (१.१.३३) इत्येष विधिर्न स्यात्। द्वये। द्वयाः। चकारः स्वरार्थः॥

उभादुदात्तो नित्यम् ॥ ४४ ॥

उभशब्दात् परस्य तयपो नित्यमयजादेशो भवति, स चोदात्तः। वचनसामर्थ्यादादेरुदात्तत्वं विज्ञायते। उभशब्दो यदि लौकिकी संख्या, ततः पूर्वेणैव विहितस्य तयप आदेशविधानार्थं वचनम्। अथ न संख्या, ततो योगविभागेन तयपं विधाय तस्य नित्यमयजादेशो विधीयते। उभयो मणिः। उभयेऽस्य देवमनुष्याः (तै० सं० १.६.८.१)॥

तदस्मिन्नधिकमिति दशान्ताड् डः ॥ ४५ ॥

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे दशान्तात् प्रातिपदिकाद् डः प्रत्ययो भवति, यत् तत् प्रथमासमर्थमधिकं चेत् तद् भवति। इतिकरणस्तताश्चेद् विवक्षा। एकादश अधिका अस्मिन् शत एकादशं शतम्। एकादशं सहस्रम्। द्वादशं शतम्। द्वादशं सहस्रम्। दशान्तादिति किम् ? पञ्चाधिका अस्मिन् शते। अन्तग्रहणं किम् ? दशाधिका अस्मिन् शते। प्रत्ययार्थेन च समानजातीये प्रकृत्यर्थे सति प्रत्यय इष्यते। एकादश कार्षापणा अधिका अस्मिन् कार्षापणशत एकादशं कार्षापणशतमिति। इह तु न भवति—एकादश माषा अधिका अस्मिन् कार्षापणशत इति। शतसहस्रयोश्चेष्यते। इह न भवति—एकादशा- धिका अस्यां त्रिंशतीति। इतिकरणो विवक्षार्थ इत्युक्तम्, तत इदं सर्वं लभ्यते। कथमेका- दशं शतसहस्रमिति ? शतानां सहस्रं सहस्राणां वा शतमिति शतसहस्रमित्युच्यते। तत्र शतसहस्रयोरित्येव सिद्धम्।

अधिके समानजाताविष्टं शतसहस्रयोः।
यस्य संख्या तदाधिक्ये डः कर्तव्यो मतो मम॥

शदन्तविंशतेश्च ॥ ४६ ॥

तदस्मिन्नधिकमित्यनुवर्तते, ड इति च। शदन्तात् प्रातिपदिकाद् विंशतेश्च डः प्रत्ययो भवति तदस्मिन्नधिकमित्येतस्मिन् विषये। त्रिंशदधिका अस्मिञ् छते त्रिंशं शतम्। शदग्रहणेऽन्तग्रहणं प्रत्ययग्रहणे यस्मात् स तदादेः (परि० २३) अधिकार्थम्। एकत्रिंशं शतम्। एकचत्वारिंशं शतम्॥ संख्याग्रहणं च कर्तव्यम्॥ इह मा भूद्—गोत्रिंशदधिका अस्मिन् गोशत इति॥ विंशतेश्च॥ विंशं शतम्॥ तदन्तादपीति वक्तव्यम्॥ एकविंशं शतम्। संख्याग्रहणं च कर्तव्यम्। इह मा भूत्—गोविंशतिरधिकास्मिन् गोशत इति॥

संख्याया गुणस्य निमाने मयट् ॥ ४७ ॥

तदस्येत्यनुवर्तते 'तदस्य संजातम्' (५.२.३६) इत्यतः। तदिति प्रथमासमर्थात् संख्यावाचिनः प्रातिपदिकादस्येति षष्ठ्यर्थे मयट् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं गुणस्य चेद् निमाने वर्तते। गुणो भागः। निमानं मूल्यम्। गुणो येन निमीयते मूल्यभूतेन, सोऽपि सामर्थ्याद् भाग एव विज्ञायते। यवानां द्वौ भागौ निमानमस्योदश्विद्भागस्य द्विमयमुदश्विद् यवानाम्। त्रिमयम्। चतुर्मयम्। भागेऽपि तु विधीयमानः प्रत्ययः प्राधान्येन भागवन्तमाचष्टे। तेन सामानाधिकरण्यं भवति द्विमयमुदश्विदिति। गुणस्येति चैकत्वं विवक्षितम्, तेनेह न भवति—द्वौ भागौ यवानां त्रय उदश्वित इति॥ भूयसश्च वाचिकायाः संख्यायाः प्रत्यय इष्यते॥ इह न भवति—एको भागो निमानमस्येति। भूयस इति च प्रत्ययार्थात् प्रकृत्यर्थस्याधिक्यमात्रं विवक्षितम्, बहुत्वमतन्त्रम्। तेन द्विशब्दादपि भवति। गुणशब्दः समानावयववचनः। तेनेह न भवति—द्वौ भागौ यवानामध्यर्ध उदश्वित इति ॥ निमेये चापि दृश्यते॥ निमेये वर्तमानायाः संख्याया निमाने प्रत्ययो दृश्यते। उदश्वितो द्वौ भागौ निमेयमस्य यवभागस्य द्विमया यवा उदश्वितः। त्रिमया यवा उदश्वितः। चतुर्मयाः। गुणस्येति किम् ? द्वौ व्रीहियवौ निमानमस्योदश्वितः। निमान इति किम् ? द्वौ गुणौ क्षीरस्यैकस्तैलस्य, द्विगुणं पच्यते तैलं क्षीरेणेत्यत्र मा भूत्॥

तस्य पूरणे डट् ॥ ४८ ॥

तस्येति षष्ठीसमर्थात् संख्यावाचिनः प्रातिपदिकात् पूरण इत्यस्मिन्नर्थे डट् प्रत्ययो भवति। पूर्यतेऽनेनेति पूरणम्। येन संख्या संख्यानं पूर्यते संपद्यते, स तस्याः पूरणः। एकादशानां पूरण एकादशः। त्रयोदशः। यस्मिन्नुपसंजातेऽन्या संख्या संपद्यते, स प्रत्ययार्थः। इह न भवति—पञ्चानां मुष्टिकानां पूरणो घट इति॥

नान्तादसंख्यादेर्मट् ॥ ४९ ॥

डडिति वर्तते। नकारान्तात् संख्यावाचिनः प्रातिपदिकादसंख्यादेः परस्य डटो मडागमो भवति। नान्तादिति पञ्चमी डट आगमसंबन्धे षष्ठीं प्रकल्पयति। पञ्चानां पूरणः पञ्चमः। सप्तमः। नान्तादिति किम् ? विंशतेः पूरणो विंशः। असंख्यादेरिति किम्? एकादशानां पूरण एकादशः॥

थट् च छन्दसि ॥ ५० ॥

नान्तादसंख्यादेः परस्य डटश्छन्दसि विषये थडागमो भवति चकारात् पक्षे मडपि भवति। पर्णमयानि पञ्चथानि भवन्ति (काठ० सं० ८.२)। पञ्चथः (काठ० सं० ६.

३)। सप्तथः (काठ० सं० ३७.११)। मट्—पञ्चमंमिन्द्रियंस्यांपाक्रामत् (काठ० सं० ६.१२)॥

षट्कतिकतिपयचतुरां थुक् ॥ ५१ ॥

डडित्यनुवर्तते, तदिह सप्तम्या विपरिणम्यते। षट् कति कतिपय चतुर् इत्येतेषां डटि परतस्थुगागमो भवति। कतिपयशब्दो न संख्या, तस्यास्मादेव ज्ञापकाद् डट् प्रत्ययो विज्ञायते। षण्णां पूरणः षष्ठः। कतिथः। कतिपयथः। चतुर्थः ॥ चतुरश्छयतावाद्यक्षरलोपश्च॥ चतुर्णां पूरणः तुरीयः। तुर्यः॥

बहुपूगगणसङ्घस्य तिथुक् ॥ ५२ ॥

डडित्येव। बहु पूग गण संघ इत्येतेषां डटि परतस्तिथुगागमो भवति। पूगसंघ-शब्दयोरसंख्यात्वादिदमेव ज्ञापकं डटो भावस्य। बहूनां पूरणो बहुतिथः। पूगतिथः। गणतिथः। संघतिथः॥

वतोरिथुक् ॥ ५३॥

डडित्येव। वतोर्डटि परत इथुगागमो भवति। वत्वन्तस्य संख्यात्वात् पूर्वेण डड् विहितः, तस्मिन्नयमागमो विधीयते। यावतां पूरणो यावतिथः। तावतिथः। एतावतिथः॥

द्वेस्तीयः ॥ ५४ ॥

द्विशब्दात् तीयः प्रत्ययो भवति तस्य पूरण इत्यस्मिन् विषये। डटोऽपवादः। द्वयोः पूरणो द्वितीयः॥

त्रेः संप्रसारणं च ॥ ५५ ॥

त्रिशब्दात् तीयः प्रत्ययो भवति तस्य पूरण इत्येतद्विषये। डटोऽपवादः। तत्सन्नियोगेन त्रेः संप्रसारणं च भवति। त्रयाणां पूरणः तृतीयः। 'हलः' (६.४.२) इति संप्रसारणस्य दीर्घत्वं न भवति। अण इति तत्रानुवर्तते 'द्व्रलोपे०' (६.३.१११) इत्यतः, पूर्वेण च णकारेणाण्ग्रहणम्॥

विंशत्यादिभ्यस्तमडन्यतरस्याम् ॥ ५६ ॥

विंशत्यादिभ्यः परस्य डटस्तमडागमो भवत्यन्यतरस्याम्। पूरणाधिकारादु डट् प्रत्यय आगमी विज्ञायते। विंशतेः पूरणो विंशतितमः, विंशः। एकविंशतितमः, एकविंशः।

त्रिविंशतितमः, त्रिविंशः। त्रिंशत्तमः, त्रिंशः। एकत्रिंशत्तमः, एकत्रिंशः। विशंत्यादयो लौकिकाः संख्याशब्दा गृह्यन्ते, न पङ्क्त्यादिसूत्रसंनिविष्टाः। तद्ग्रहणे ह्येकविंशति-प्रभृतिभ्यो न स्यात्, ग्रहणवता प्रातिपदिकेन तदन्तविधिप्रतिषेधात् (परि० ३१)। एवं च सति 'षष्ट्यादेश्चासंख्यादेः' (५.२.५८) इति पर्युदासो युज्यत एव॥

नित्यं शतादिमासार्धमाससंवत्सराच्च ॥ ५७ ॥

शतादयः संख्याशब्दा लौकिका गृह्यन्ते। शतादिभ्यो मासार्धमाससंवत्सरशब्देभ्यश्च परस्य डटो नित्यं तमडागमो भवति। मासादयः संख्याशब्दा न भवन्ति, तेभ्योऽस्मादेव ज्ञापकाद् डट् प्रत्ययो विज्ञायते। शतस्य पूरणः शततमः। सहस्रतमः। लक्षतमः। मासस्य पूरणो मासतमो दिवसः। अर्धमासतमः। संवत्सरतमः। 'षष्ट्यादेश्चासंख्यादेः' (५.२.५८) इति वक्ष्यमाणेन सिद्धे शतादिग्रहणं संख्याद्यर्थम्। एकशततमः। द्विशततमः॥

षष्ट्यादेश्चासंख्यादेः ॥ ५८ ॥

षष्ट्यादेः संख्याशब्दादसंख्यादेः परस्य डटो नित्यं तमडागमो भवति। 'विंशत्यादिभ्यः०' (५.२.५६) इति विकल्पेन प्राप्ते नित्यार्थम्। षष्टितमः। सप्ततितमः। असंख्यादेरिति किम् ? एकषष्टः, एकषष्टितमः। एकसप्ततः, एकसप्ततितमः॥

मतौ छः सूक्तसाम्नोः ॥ ५९ ॥

मताविति मत्वर्थ उच्यते। प्रातिपदिकाद् मत्वर्थे छः प्रत्ययो भवति सूक्ते सामनि चाभिधेये। मत्वर्थग्रहणेन समर्थविभक्तिः, प्रकृतिविशेषणं प्रत्ययार्थ इति सर्वमाक्षिप्यते। अच्छावाकशब्दोऽस्मिन्निति अच्छावाकीयं सूक्तम्। मित्रावरुणीयम्। यज्ञायज्ञीयं साम। वारवन्तीयम्। अनुकरणशब्दाश्च स्वरूपमात्रप्रधानाः प्रत्ययमुत्पादयन्ति। तेनानेकपदादपि सिद्धम्। अस्यवामीयम्। कयाशुभीयम्॥

अध्यायानुवाकयोर्लुक् ॥ ६० ॥

मताविति एव। मत्वर्थ उत्पन्नस्य छस्य लुग् भवत्यध्यायानुवाकयोरभिधेययोः। केन पुनरध्यायानुवाकयोः प्रत्ययः ? इदमेव लुग्वचनं ज्ञापकं तद्विधानस्य। विकल्पेन च लुगयमिष्यते। गर्दभाण्डशब्दोऽस्मिन्नस्ति गर्दभाण्डोऽध्यायोऽनुवाको वा, गर्दभाण्डीयः। दीर्घजीवितः, दीर्घजीवितीयः। पलितस्तम्भः, पलितस्तम्भीयः॥

---

१ - 'कयाषुभीयम्' इत्यपपाठो मुद्रितेषु।

विमुक्तादिभ्योऽण् ॥ ६१ ॥

मताविति्येव, अध्यायानुवाकयोरिति च। विमुक्तादिभ्यः प्रातिपदिकेभ्योऽण् प्रत्ययो भवति मत्वर्थेऽध्यायानुवाकयोरभिधेययोः। विमुक्तशब्दोऽस्मिन्नस्ति वैमुक्तोऽध्यायोऽनुवाको वा। दैवासुरः॥ विमुक्त। देवासुर। वसुमत्। सत्वत्। उपसत्। दशार्हपयस्। हविर्धान। मित्री। सोमापूषन्। अग्नाविष्णु। वृत्रहति। इडा। रक्षोसुर। सदसत्। परिषादक्। वसु। मरुत्वत्। पत्नीवत्। महीयल। दशार्ह। वयस्। पतत्रि। सोम। महित्री। हेतु। विमुक्तादिः॥

गोषदादिभ्यो वुन् ॥ ६२ ॥

मताविति्येव, अध्यायानुवाकयोरिति च। गोषदादिभ्यः प्रातिपदिकेभ्यो वुन् प्रत्ययो भवति मत्वर्थेऽध्यायानुवाकयोः। गोषदशब्दोऽस्मिन्निति गोषदकोऽध्यायोऽनुवाको वा। इषेत्वकः। मातरिश्वकः॥ गोषद। इषेत्वा। मातरिश्वन्। देवस्यत्वा। देवीरापः। कृष्णोस्याखरेष्टः। दैवींधियम्। रक्षोहण। अञ्जन। प्रभूत। प्रतूर्त। कृशानु। गोषदादिः॥

तत्र कुशलः पथः॥ ६३ ॥

वुनित्येव। तत्रेति सप्तमीसमर्थात् पथिन्शब्दात् कुशल इत्यस्मिन्नर्थे वुन् प्रत्ययो भवति। पथि कुशलः पथकः॥

आकर्षादिभ्यः कन् ॥ ६४ ॥

तत्रेत्येव, कुशल इति च। आकर्षादिभ्यः प्रातिपदिकेभ्यः सप्तमीसमर्थेभ्यः कुशल इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति। आकर्षे कुशल आकर्षकः। त्सरुकः॥ आकर्ष। त्सरु। पिपासा। पिचण्ड। अशनि। अश्मन्। विचय। चय। जय। आचय। अय। नय। निपाद। गद्गद। दीप। ह्रद। ह्राद। ह्लाद। शकुनि। आकर्षादिः॥

धनहिरण्यात् कामे ॥ ६५ ॥

तत्रेत्येव, कनिति च। धनहिरण्यशब्दाभ्यां तत्रेति सप्तमीसमर्थाभ्यां काम इत्यस्मिन्नर्थे कन् प्रत्ययो भवति। काम इच्छा अभिलाषः। धने कामो धनको देवदत्तस्य। हिरण्यको देवदत्तस्य॥

स्वाङ्गेभ्यः प्रसिते ॥ ६६ ॥

तत्रेत्येव, कनिति च। स्वाङ्गवाचिभ्यः शब्देभ्यस्तत्रेति सप्तमीसमर्थेभ्यः प्रसित

इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति। प्रसितः प्रसक्तस्तत्पर इत्यर्थः। केशेषु प्रसितः केशकः। केशादिरचनायां प्रसक्त एवमुच्यते। बहुवचनं स्वाङ्गसमुदायशब्दादपि यथा स्यात्। दन्तौष्ठकः। केशनखकः॥

उदराट् ठगाद्यूने ॥ ६७ ॥

तत्रेत्येव, प्रसित इति च। उदरशब्दात् सप्तमीसमर्थात् प्रसित इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति। आद्यून इति प्रत्ययार्थविशेषणम्। उदरेऽविजिगीषुर्भण्यते। यो बुभुक्षया- त्यन्तं पीड्यते, स एवमुच्यते। उदरे प्रसित औदरिक आद्यूनः। आद्यून इति किम् ? उदरकः॥

सस्येन परिजातः ॥ ६८ ॥

कन् प्रत्यय इत्येव स्वर्यते, न ठक्। निर्देशादेव तृतीया समर्थविभक्तिः। सस्य-शब्दात् तृतीयासमर्थात् परिजात इत्यस्मिन्नर्थे कन् प्रत्ययो भवति। सस्यशब्दोऽयं गुणवाची। परिः सर्वतो भावे वर्तते। यो गुणैः संबद्धो जायते, यस्य किंचिदपि वैगुण्यं नास्ति, तस्येदमभिधानम्। सस्येन परिजातः सस्यकः शालिः। सस्यकः साधुः। सस्यको मणिः। आकरशुद्ध इत्यर्थः॥

अंशं हारी ॥ ६९ ॥

अंशशब्दाद् निर्देशादेव द्वितीयासमर्थाद् हारीत्येतस्मिन्नर्थे कन् प्रत्ययो भवति। अंशं हारी अंशको दायादः। अंशकः पुत्रः। हारीत्यावश्यके णिनिः (३.३.१७०)। तत्र षष्ठीप्रतिषेधात् कर्मणि द्वितीयैव भवति॥

तन्त्रादचिरापहृते ॥ ७० ॥

तन्त्रशब्दाद् निर्देशादेव पञ्चमीसमर्थादचिरापहृत इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति। अचिरापहृतः स्तोककालापहृत इत्यर्थः। तन्त्रादचिरापहृतः तन्त्रकः पटः। तन्त्रकः प्रावारः। प्रत्यग्रो नव उच्यते॥

ब्राह्मणकोष्णिके संज्ञायाम् ॥ ७१ ॥

ब्राह्मणक उष्णिक इत्येतौ शब्दौ निपात्येते कन्प्रत्ययान्तौ संज्ञायां विषये। ब्राह्मणको देशः। उष्णिका यवागूः। यत्रायुधजीविनो ब्राह्मणाः सन्ति, तस्य ब्राह्मणक इति संज्ञा।

---

१ - ' आकार० ' इति बाल० । २ - ' तत्र ' इति मुद्रितेषु ।

अल्पान्ना यवागूरुष्णिकेत्युच्यते॥

शीतोष्णाभ्यां कारिणि ॥ ७२ ॥

शीतोष्णशब्दाभ्यां कारिण्यभिधेये कन् प्रत्ययो भवति। क्रियाविशेषणाद् द्वितीयासमर्थादयं प्रत्ययः। शीतं करोति शीतकः। अलसो जड उच्यते। उष्णं करोति उष्णकः। शीघ्रकारी दक्ष उच्यते॥

अधिकम् ॥ ७३ ॥

अधिकमिति निपात्यते। अध्यारूढशब्दस्योत्तरपदलोपः कंश्च प्रत्ययः। अधिको द्रोणः खार्याम्। अधिका खारी द्रोणेन। कर्तरि कर्मणि चाध्यारूढशब्दः॥

अनुकाभिकाभीकः कमिता ॥ ७४ ॥

अनुक अभिक अभीक इत्येते शब्दाः कन्प्रत्ययान्ता निपात्यन्ते कमितेत्यस्मिन्नर्थे। अभेः पक्षे दीर्घत्वं च निपात्यते। अनुकामयत अनुकः। अभिकः। अभीकः॥

पार्श्वेनान्विच्छति ॥ ७५ ॥

पार्श्वशब्दात् तृतीयासमर्थादन्विच्छतीत्यस्मिन्नर्थे कन् प्रत्ययो भवति। अनृजुरुपायः पार्श्वम्। तेनार्थानन्विच्छति पार्श्वकः। मायावी कौसृतिको जालिक उच्यते॥

अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ॥ ७६ ॥

अन्विच्छतीत्येव। अयःशूलदण्डाजिनाभ्यां तृतीयासमर्थाभ्यामन्विच्छतीत्येतस्मिन्नर्थे ठक्ठञौ प्रत्ययौ भवतः। तीक्ष्ण उपायोऽयःशूलमुच्यते। तेनान्विच्छति आयःशूलिकः। साहसिक इत्यर्थः। दम्भो दण्डाजिनम् , तेनान्विच्छति दाण्डाजिनिकः। दाम्भिक इत्यर्थः॥

तावतिथं ग्रहणमिति लुग् वा ॥ ७७ ॥

तावतां पूरणं तावतिथम्। गृह्यतेऽनेनेति ग्रहणम्। प्रकृतिविशेषणं चैतत्। पूरण-प्रत्ययान्तात् प्रातिपदिकाद् ग्रहणोपाधिकात् स्वार्थे कन् प्रत्ययो भवति। पूरणप्रत्ययस्य वा लुक्। द्वितीयेन रूपेण ग्रन्थं गृह्णाति द्विकं ग्रहणम्, द्वितीयकम्। त्रिकम्, तृतीयकम्। चतुष्कम्, चतुर्थकम्॥ तावतिथेन गृह्णातीति कन् वक्तव्यः, पूरणप्रत्ययस्य च नित्यं लुक्॥ षष्ठेन रूपेण ग्रन्थं गृह्णाति षट्को देवदत्तः। पञ्चकः। चतुष्कः। इतिकरणो

---

१ - 'वाध्या०' इति बाल०। २ - 'पूरणस्य प्रत्ययस्य' इति मुद्रितेषु ।

विवक्षार्थः। तेन ग्रन्थविषयमेव ग्रहणं विज्ञायते, नान्यविषयम्॥

स एषां ग्रामणीः ॥ ७८ ॥

स इति प्रथमासमर्थादेषामिति षष्ठ्यर्थे कन् प्रत्ययो भवति, यत् तत् प्रथमासमर्थं ग्रामणीश्चेत् स भवति। ग्रामणीः प्रधानो मुख्य इत्यर्थः। देवदत्तो ग्रामणीरेषां देवदत्तकाः। यज्ञदत्तकाः। ग्रामणीरिति किम् ? देवदत्तः शत्रुरेषाम्॥

शृङ्खलमस्य बन्धनं करभे ॥ ७९ ॥

शृङ्खलशब्दात् प्रथमासमर्थादस्येति षष्ठ्यर्थे कन् प्रत्ययो भवति। यत् तत् प्रथमा- समर्थं बन्धनं चेत् तद् भवति, यत् तदस्येति निर्दिष्टं करभश्चेत् स भवति। शृङ्खलं बन्धनमस्य करभस्य शृङ्खलकः। उष्ट्राणां बालकाः करभाः। तेषां काष्ठमयं पाशकं पादे व्यतिषज्यते, तदुच्यते शृङ्खलमिति। यद्यपि रज्ज्वादिकमपि तत्रास्ति तथापि शृङ्खलमस्यास्वतन्त्रीकरणे भवति साधनमिति बन्धनमित्युच्यते॥

उत्क उन्मनाः ॥ ८० ॥

उत्क इति निपात्यते, उन्मनाश्चेत् स भवति। उद्गतं मनो यस्य स उन्मनाः। उच्छब्दात् ससाधनक्रियावचनात् तद्वति कन् प्रत्ययो निपात्यते। उत्को देवदत्तः। उत्कः प्रवासी। उत्सुक इत्यर्थः॥

कालप्रयोजनाद् रोगे ॥ ८१ ॥

अर्थलभ्या समर्थविभक्तिः। कालात् प्रयोजनात् च यथायोगं समर्थविभक्तियुक्ताद् रोगेऽभिधेये कन् प्रत्ययो भवति। कालो दिवसादिः। प्रयोजनं कारणं रोगस्य फलं वा। द्वितीयेऽह्नि भवो द्वितीयको ज्वरः। चतुर्थकः। प्रयोजनात्—विषपुष्पैर्जनितो विषपुष्पको ज्वरः। काशपुष्पकः। उष्णं कार्यमस्य उष्णको ज्वरः। शीतको ज्वरः। उत्तरसूत्रादिह संज्ञाग्रहणमपकृष्यते। तेनायं प्रकारनियमः सर्वो लभ्यते॥

तदस्मिन्नन्नं प्राये संज्ञायाम् ॥ ८२ ॥

तदिति प्रथमासमर्थादस्मिन्निति सप्तम्यर्थे कन् प्रत्ययो भवति, यत् तत् प्रथमासमर्थमन्नं चेत् प्रायविषयं तद् भवति। प्रायो बाहुल्यम्। संज्ञाग्रहणं तदन्तोपाधिः। गुडापूपाः प्रायेणान्नमस्यां पौर्णमास्यां गुडापूपिका। तिलापूपिका पौर्णमासी॥ वटकेभ्य इनिर्वक्तव्यः॥

---

१ - 'ब्रह्मदत्तकाः' इति है०। २ - 'इह' इति नास्ति बाल०।

वटकिनी पौर्णमासी॥

कुल्माषादञ् ॥ ८३ ॥

कुल्माषशब्दादञ् प्रत्ययो भवति तदस्मिन्नन्नं प्राये संज्ञायामित्येतस्मिन्नर्थे। ञकारो वृद्धिस्वरार्थः। कुल्माषाः प्रायेणान्नमस्यां कौल्माषी पौर्णमासी॥

श्रोत्रियंश्छन्दोऽधीते ॥ ८४ ॥

श्रोत्रियन्निति निपात्यते छन्दोऽधीत इत्यस्मिन्नर्थे। नकारः स्वरार्थः। श्रोत्रियो ब्राह्मणः। श्रोत्रियंश्छन्दोऽधीत इति वाक्यार्थे पदवचनम् , छन्दसो वा श्रोत्रभावः, तदधीत इति घंश्च प्रत्ययः। कथं छन्दोऽधीते छान्दसः ? वाग्रहणमनुवर्तते 'तावतिथं ग्रहणमिति लुग् वा' (५.२.७७) इत्यतः॥

श्राद्धमनेन भुक्तमिनिठनौ ॥ ८५ ॥

श्राद्धमिति प्रकृतिः। अनेनेति प्रत्ययार्थः। भुक्तमिति प्रकृतिविशेषणम्। श्राद्धशब्दाद् भुक्तोपाधिकादनेनेत्यस्मिन्नर्थ इनिठनौ प्रत्ययौ भवतः। श्राद्धशब्दः कर्मनामधेयं तत्साधने द्रव्ये वर्तित्वा प्रत्ययमुत्पादयति। श्राद्धं भुक्तमनेन श्राद्धी, श्राद्धिकः। इनिठनोः समानकालग्रहणम्। अद्य भुक्ते श्राद्धे श्वः श्राद्धिक इति प्रयोगो मा भूत्॥

पूर्वादिनिः ॥ ८६ ॥

अनेनेति प्रत्ययार्थः कर्तानुवर्तते। न च क्रियामन्तरेण कर्ता संभवतीति यां कांचित् क्रियामध्याहृत्य प्रत्ययो विधेयः। पूर्वादनेनेत्यस्मिन्नर्थ इनिः प्रत्ययो भवति। पूर्वं गतमनेन भुक्तं पीतं वा पूर्वी, पूर्विणौ, पूर्विणः॥

सपूर्वाच्च ॥ ८७ ॥

विद्यमानं पूर्वं यस्मादिति सपूर्वं प्रातिपदिकम्। तस्य पूर्वशब्देन तदन्तविधिः। सपूर्वात् प्रातिपदिकात् पूर्वशब्दान्तादनेनेत्यस्मिन्नर्थ इनिः प्रत्ययो भवति। पूर्वं कृतमनेन कृतपूर्वी कटम्। भुक्तपूर्वी ओदनम्। सुप्सुपेति समासं कृत्वा तद्धित उत्पाद्यते। योगद्वयेन चानेन पूर्वादिनिः सपूर्वाच्चेति परिभाषाद्वयं ज्ञाप्यते— 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' (परि० ३२), 'ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति' (परि० ३१) इति॥

---

१ - ' कर्तव्यम् ' इत्यधिकं है०।

इष्टादिभ्यश्च ॥ ८८ ॥

अनेनेत्येव। इष्टादिभ्यः प्रातिपदिकेभ्योऽनेनेत्यस्मिन्नर्थ इनिः प्रत्ययो भवति। इष्टमनेन इष्टी यज्ञे। पूर्ती श्राद्धे। 'क्तस्येन्विषयस्य कर्मणि' (वा० २.३.३६) इति सप्तम्युपसंख्यायते॥ इष्ट। पूर्त। उपसादित। निगदित। परिवादित। निकथित। परिकथित। संकलित। निपठित। संकल्पित। अनर्चित। विकलित। संरक्षित। निपतित। पठित। परिकलित। अर्चित। परिरक्षित। पूजित। परिगणित। उपगणित। अवकीर्ण। परित। आयुक्त। आम्नात। श्रुत। अधीत। आसेवित। अपवारित। अवकल्पित। निराकृत। उपकृत। उपाकृत। अनुयुक्त। उपनत। अनुगुणित। अनुपठित। व्याकुलित। निगृहीत। इष्टादिः॥

छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ॥ ८९ ॥

परिपन्थिन् परिपरिन् इत्येतौ शब्दौ छन्दसि विषये निपात्येते पर्यवस्थातरि वाच्ये। पर्यवस्थाता प्रतिपक्षः सपत्न उच्यते। मा त्वा परिप१रिणो विद१न् मा त्वा परिप१न्थिनो विद१न् (मा० सं० ४.३४)॥

अनुपद्यन्वेष्टा ॥ ९० ॥

अनुपदीति निपात्यतेऽन्वेष्टा चेत् स भवति। पदस्य पश्चादनुपदम्। अनुपदी गवाम्। अनुपदी उष्ट्राणाम्॥

साक्षाद् द्रष्टरि संज्ञायाम् ॥ ९१ ॥

साक्षाच्छब्दोऽव्ययम्। तस्मादिनिः प्रत्ययो भवति द्रष्टरि वाच्ये। संज्ञाग्रहणमभिधेय-नियमार्थम्। साक्षाद् द्रष्टा साक्षी, साक्षिणौ, साक्षिणः। संज्ञाग्रहणादुपद्रष्टैवोच्यते, न दाता ग्रहीता वा॥

क्षेत्रियच् परक्षेत्रे चिकित्स्यः ॥ ९२ ॥

क्षेत्रियजिति निपात्यते। परक्षेत्रे चिकित्स्य इत्येतस्मिन् वाक्यार्थे पदवचनम्। पर-क्षेत्राद् वा तत्रेति सप्तमीसमर्थात् चिकित्स्य इत्येतस्मिन्नर्थे घच् प्रत्ययः परशब्दलोपश्च निपात्यते। परक्षेत्रे चिकित्स्यः क्षेत्रियो व्याधिः। क्षेत्रियं कुष्ठम्। परक्षेत्रं जन्मान्तर-शरीरम्, तत्र चिकित्स्यः क्षेत्रियः। असाध्योऽप्रत्याख्येयो व्याधिरुच्यते। नामृतस्य निवर्तत

१ - सन्दिग्धम् । २ - ' संपन्न ' इति बाल०।
३ - ' वा ' इति नास्ति है०। ४ - ' असाध्यः प्रत्याख्येयो ' इति है०।

इत्यर्थः। अथ वा क्षेत्रियं विषम्, यत् परक्षेत्रे परशरीरे संक्रमय्य चिकित्स्यते। अथवा क्षेत्रियाणि तृणानि, यानि सस्यार्थे क्षेत्रे जातानि चिकित्स्यानि नाशयितव्यानि। अथ वा क्षेत्रियः पारदारिकः। परदाराः परक्षेत्रम्, तत्र चिकित्स्यो निग्रहीतव्यः। सर्वं चैतत् प्रमाणम्॥

इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ॥ ९३॥

इन्द्रियमित्यन्तोदात्तं शब्दरूपं निपात्यते। रूढिरेषा चक्षुरादीनां करणानाम्। तथा च व्युत्पत्तेरनियमं दर्शयति। इन्द्रशब्दात् षष्ठीसमर्थात् लिङ्गमित्येतस्मिन्नर्थे घच् प्रत्ययो भवति। इन्द्रस्य लिङ्गमिन्द्रियम्। इन्द्र आत्मा, स चक्षुरादिना करणेनानुमीयते। नाकर्तृकं करणमस्ति। इन्द्रेण दृष्टम्। तृतीयासमर्थात् प्रत्ययः। आत्मना दृष्टमित्यर्थः। इन्द्रेण सृष्टम्। आत्मना सृष्टम्। तत्कृतेन शुभाशुभेन कर्मणोत्पन्नमिति कृत्वा। इन्द्रेण जुष्टम्। आत्मना जुष्टम्, सेवितम्, तद्द्वारेण विज्ञानोत्पादनात्। इन्द्रेण दत्तम् आत्मना विषयेभ्यो दत्तं यथायथं ग्रहणाय। इतिकरणः प्रकारार्थः। सति संभवे व्युत्पत्तिरन्यथापि कर्तव्या, रूढेरनियमादिति। वाशब्दः प्रत्येकमभिसंबध्यमानो विकल्पानां स्वातन्त्र्यं दर्शयति॥

तदस्यास्त्यस्मिन्निति मतुप् ॥ ९४ ॥

तदिति प्रथमा समर्थविभक्तिः। अस्यास्मिन्निति प्रत्ययार्थौ। अस्तीति प्रकृति- विशेषणम्। इतिकरणो विवक्षार्थः। तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे वा मतुप् प्रत्ययो भवति, यत् तत् प्रथमासमर्थमस्ति चेत् तद् भवति। अस्त्यर्थोपाधिकं चेत् तद् भवतीत्यर्थः। इतिकरणस्ततश्चेद् विवक्षा। गावोऽस्य सन्ति गोमान् देवदत्तः। वृक्षा अस्मिन् सन्ति वृक्षवान् पर्वतः। यवमान्। प्लक्षवान्। इतिकरणाद् विषयनियमः।

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥

भूम्नि तावत्—गोमान्। निन्दायाम्—कुष्ठी। ककुदावर्तिनी। प्रशंसायाम्—रूपवती कन्या। नित्ययोगे—क्षीरिणो वृक्षाः। अतिशायने—उदरिणी कन्या। संसर्गे—दण्डी। छत्री। अस्तिविवक्षायाम्—अस्तिमान्॥ गुणवचनेभ्यो मतुपो लुग् वक्तव्यः॥ शुक्लो गुणोऽस्यास्ति शुक्लः पटः। कृष्णः। श्वेतः॥

रसादिभ्यश्च ॥ ९५ ॥

रसादिभ्यः प्रातिपदिकेभ्यो मतुप् प्रत्ययो भवति तदस्यास्त्यस्मिन्नित्येतस्मिन् विषये।

---

१ - 'चिकित्सते' इति है०।

रसवान्। रूपवान्। किमर्थमिदमुच्यते, न पूर्वसूत्रेणैव मतुप् सिद्धः ? रसादिभ्यः पुनर्वचनमन्यनिवृत्त्यर्थम्। अन्ये मत्वर्थीया मा भूवन्निति। कथं रूपिणी कन्या, रूपिको दारकः ? प्रायिकमेतद् वचनम्। इतिकरणो विवक्षार्थोऽनुवर्तते। अथ वा गुणादित्यत्र पठ्यते। तेन ये रसनेन्द्रियादिग्राह्या गुणाः, तेषामेवायं पाठः। इह मा भूत्—रूपिणी, रूपिक इति। शोभायोगो गम्यते। रसिको नट इत्यत्र भावयोगः॥ रस। रूप। गन्ध। स्पर्श। शब्द। स्नेह। गुणात् (ग० सू० १२४) । एकाचः (ग० सू० १२५)। गुणग्रहणं रसादीनां विशेषणम्॥

प्राणिस्थादातो लजन्यतरस्याम् ॥ ९६॥

प्राणिस्थवाचिनः शब्दादाकारान्तात् लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे। चूडालः, चूडावान्। कर्णिकालः, कर्णिकावान्। प्राणिस्थादिति किम् ? शिखावान् प्रदीपः। आदिति किम् ? हस्तवान्। पादवान्॥ प्राण्यङ्गादिति वक्तव्यम्॥ इह मा भूत्—चिकीर्षास्यास्ति चिकीर्षावान्, जिहीर्षास्यास्ति जिहीर्षावान्। प्रत्ययस्वरेणैवान्तोदात्तत्वे सिद्धे चकारश्चूडालोऽस्तीत्यत्र 'स्वरितो वानुदात्ते पदादौ' (८.२.६) इति स्वरितबाधनार्थः॥

सिध्मादिभ्यश्च ॥ ९७ ॥

लजन्यतरस्यामिति वर्तते। सिध्मादिभ्यः प्रातिपदिकेभ्यो लच् प्रत्ययो भवत्यन्यतरस्यां मत्वर्थे। सिध्मलः, सिध्मवान्। गडुलः, गडुमान्। अन्यतरस्यांग्रहणेन मतुप् समुच्चीयते न तु प्रत्ययो विकल्प्यते। तस्मादकारान्तेभ्य इनिठनौ प्रत्ययौ न भवतः॥ सिध्म। गडु। मणि। नाभि। जीव। निष्पाव। पांसु। सक्तु। हनु। मांस। परशु। पार्ष्णिधमन्योर्दीर्घश्च (ग० सू० १२६)। पार्ष्णीलः। धमनीलः। पर्ण। उदक। प्रज्ञा। मण्ड। पार्श्व। गण्ड। ग्रन्थि। वातदन्तबललललाटानामूङ् च (ग० सू० १२७)। वातूलः। दन्तूलः। बलूलः। ललाटूलः। जटाघटाकलाः क्षेपे (ग० सू० १२८)। जटालः। घटालः। कलालः। सक्थि। कर्ण। स्नेह। शीत। श्याम। पिङ्ग। पित्त। शुष्क। पृथु। मृदु। मञ्जु। पत्र। चटु। कपि। कण्डु। संज्ञा। क्षुद्रजन्तूपतापाच्चेष्यते (ग० सू० १२९)। क्षुद्रजन्तु—यूकालः। मक्षिकालः। उपताप—विचर्चिकालः। विपादि- कालः। मूर्छालः। सिध्मादिः॥

वत्सांसाभ्यां कामबले ॥ ९८ ॥

वत्सांसशब्दाभ्यां लच् प्रत्ययो भवति यथासंख्यं कामवति बलवति चार्थे। वत्सलः।

---

१ - ' तेषामत्र ' इति है०। २ - ' शोभायोग्यता ' इति बाल०।

अंसलः। वृत्तिविषये वत्सांसशब्दौ स्वभावात् कामबलयोर्वर्तमानौ तद्वति प्रत्ययमुत्पादयतः। न ह्यत्र वत्सार्थोऽसार्थो वा विद्यते। वत्सल इति स्नेहवानुच्यते—वत्सलः स्वामी, वत्सलः पितेति। अंसल इति चोपचितमांसो बलवानुच्यते। न चायमर्थो मतुपि संभवतीति नित्यं लजेव भवति। अन्यत्र वत्सवती गौः। अंसवान्[1] दुर्बलः॥

फेनादिलच्च ॥ ९९ ॥

फेनशब्दादिलच् प्रत्ययो भवति मत्वर्थे, चकारात् लच्च। अन्यतरस्यांग्रहणं मतुप्समुच्चयार्थं सर्वत्रैवानुवर्तते। फेनिलः, फेनलः, फेनवान्॥

लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥ १०० ॥

लोमादिभ्यः पामादिभ्यः पिच्छादिभ्यश्च त्रिभ्यो गणेभ्यो यथासंख्यं श न इलच् इत्येते प्रत्यया भवन्ति मत्वर्थे, मतुप् च। लोमादिभ्यः शो भवति। लोमशः, लोमवान्। पामादिभ्यो नो भवति। पामनः, पामवान्। पिच्छादिभ्य इलच् भवति। पिच्छिलः, पिच्छवान्। उरसिलः, उरस्वान्॥ लोमन्। रोमन्। वल्गु। बभ्रु। हरि। कपि। शुनि। तरु। लोमादिः॥ पामन्। वामन्। हेमन्। श्लेष्मन्। कद्रु। बलि। श्रेष्ठ। पलल। सामन्। अङ्गात् कल्याणे (ग० सू० १३०)। शाकीपलालीदद्रूवां ह्रस्वत्वं च (ग० सू० १३१)। विष्वगित्युत्तरपदलोपश्चाकृतसन्धेः (ग० सू० १३२)। लक्ष्म्या अच्च (ग० सू० १३३)। पामादिः॥ पिच्छ। उरस्। ध्रुवका। क्षुवका। जटाघटाकलाः क्षेपे (ग० सू० १३४)। वर्ण। उदक। पङ्क। प्रज्ञा। पिच्छादिः॥

प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः ॥ १०१ ॥

प्रज्ञा श्रद्धा अर्चा वृत्ति इत्येतेभ्यो णः प्रत्ययो भवति मतुबर्थे। मतुप् सर्वत्र समुच्चीयते। प्राज्ञः, प्रज्ञावान्। श्राद्धः, श्रद्धावान्। आर्चः, अर्चावान्। वार्त्तः, वृत्तिमान्॥

तपःसहस्राभ्यां विनीनी ॥ १०२ ॥

तपःसहस्रशब्दाभ्यां विनि इनि इत्येतौ प्रत्ययौ भवतो मत्वर्थे। प्रत्ययार्थयोस्तु यथासंख्यं सर्वत्रैवास्मिन् प्रकरणे नेष्यते। तपोऽस्यास्मिन् वा विद्यते तपस्वी। सहस्री। असन्तत्वाददन्तत्वात् च सिद्धे प्रत्यये पुनर्वचनमणा वक्ष्यमाणेन बाधा मा भूदिति। सह- स्रात् तु ठनपि बाध्यते॥

---

१ - ' अंसवती ' इति मुद्रितः पाठः।

अण् च ॥ १०३ ॥

तपःसहस्राभ्यामण् च प्रत्ययो भवति। तापसः। साहस्रः। योगविभाग उत्तरार्थो यथासंख्यार्थश्च ॥ अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम्॥ ज्योत्स्ना विद्यतेऽस्मिन् पक्षे ज्यौत्स्नः पक्षः। तामिस्रः। कौण्डलः। कौतपः। वैसर्पः। वैपादिकः॥

सिकताशर्कराभ्यां च॥ १०४ ॥

सिकताशर्कराभ्यामण् प्रत्ययो भवति मत्वर्थे। सैकतो घटः। शार्करं मधु। अदेश इहोदाहरणम्। देशे तु लुबिलचौ भविष्यतः॥

देशे लुबिलचौ च ॥ १०५ ॥

सिकताशर्कराभ्यां देशेऽभिधेये लुबिलचौ भवतः, चकारादण् च, मतुप् च। कस्य पुनरयं लुप् ? मतुबादीनामन्यतमस्य, विशेषाभावात्। सिकता अस्मिन् विद्यन्ते सिकता देशः, सिकतिलः, सैकतः, सिकतावान्। एवं शर्करा देशः, शर्करिलः, शार्करः, शर्करावान्। देश इति किम् ? सैकतो घटः। शार्करं मधु॥

दन्त उन्नत उरच् ॥ १०६ ॥

उन्नत इति प्रकृतिविशेषणम्। दन्तशब्दादुन्नतोपाधिकादुरच् प्रत्ययो भवति मत्वर्थे। दन्ता उन्नता अस्य सन्ति दन्तुरः। उन्नत इति किम् ? दन्तवान्॥

ऊषसुषिमुष्कमधो रः ॥ १०७ ॥

ऊष सुषि मुष्क मधु इत्येतेभ्यो रः प्रत्ययो भवति मत्वर्थे। ऊषरं क्षेत्रम्। सुषिरं काष्ठम्। मुष्करः पशुः। मधुरो गुडः। इतिकरणो विवक्षार्थः सर्वत्राभिधेयनियमं करोति। इह न भवति—ऊषोऽस्मिन् घटे विद्यते, मध्वस्मिन् घटे विद्यत इति॥ रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्॥ खमस्यास्ति कण्ठविवरं महत् खरः। मुखमस्यास्तीति सर्वस्मिन् वक्तव्ये मुखरः। कुञ्जावस्य स्तः कुञ्जरः। हस्तिहनू कुञ्जशब्देनोच्येते॥ नगपांसुपाण्डुभ्यश्चेति वक्तव्यम्॥ नगरम्। पांसुरम्। पाण्डुरम्॥ कच्छ्वा ह्रस्वत्वं च॥ कच्छुरम्॥

द्युद्रुभ्यां मः ॥ १०८ ॥

द्युद्रुशब्दाभ्यां मः प्रत्ययो भवति मत्वर्थे। द्युमः। द्रुमः। रूढिशब्दावेतौ। रूढिषु मतुप् पुनर्न विकल्प्यते॥

केशाद् वोऽन्यतरस्याम् ॥ १०९ ॥

केशशब्दाद् वः प्रत्ययो भवति मत्वर्थेऽन्यतरस्याम्। ननु च प्रकृतमन्यतरस्यांग्रहणमनुवर्तत एव ? मतुप्समुच्चयार्थं तदित्युक्तम्। अनेन त्विनिठनौ प्राप्येते। ततश्चातूरूप्यं भवति। केशवः, केशी, केशिकः, केशवानिति॥ वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्॥ मणिवः। हिरण्यवः। कुरावः। कुमारावः। कुञ्जावः। राजीवम्। इष्टकावः। विम्बावः॥ अर्णसो लोपश्च॥ अर्णवः॥ छन्दसीवनिपौ च वक्तव्यौ॥ वश्च मतुप् च। र॒थीर॑भून्मुद्ग॒लानी॒ गवि॑ष्टौ (ऋ० १०.१०२.२)। सुमङ्ग॒लीरि॒यं व॒धूः (ऋ० १०.८५.३३)। वनिप्—म॒घवा॑नमीमहे (ऋ० १०.१६७.२)। वकारमतुपौ च। उद्वा च उद्वती च॥ मेधारथाभ्यामिरन्निरचौ वक्तव्यौ॥ मेधि॑रः (ऋ० १.३१.२)। र॒थि॒रः (ऋ० ३.१.१७)॥

गाण्ड्यजगात् संज्ञायाम् ॥ ११० ॥

गाण्डी अजग इत्येताभ्यां वः प्रत्ययो भवति संज्ञायां विषये मत्वर्थे। गाण्डीवं धनुः। अजगवं धनुः। ह्रस्वादपि भवति—गाण्डिवं धनुरिति। तत्र तुल्या हि संहिता दीर्घह्रस्वयोः। उभयथा च सूत्रं प्रणीतम्॥

काण्डाण्डादीरन्नीरचौ ॥ १११ ॥

काण्ड अण्ड इत्येताभ्यां यथासंख्यमीरन्नीरचौ प्रत्ययौ भवतो मत्वर्थे। काण्डीरः। अण्डीरः॥

रजःकृष्यासुतिपरिषदो वलच् ॥ ११२ ॥

रजःप्रभृतिभ्यः प्रातिपदिकेभ्यो वलच् प्रत्ययो भवति मत्वर्थे। रजस्वला स्त्री। कृषीवलः कुटुम्बी। आसुतीवलः शौण्डिकः। परिषद्वलो राजा। 'वले' (६.३.११८) इति दीर्घत्वम्। इतिकरणो विषयनियमार्थः सर्वत्र संबध्यते। तेनेह न भवति—रजोऽस्मिन् ग्रामे विद्यत इति ॥ वलच्प्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम् ॥ भ्रातृवलः। पुत्रवलः। उत्साहवलः॥

दन्तशिखात् संज्ञायाम् ॥ ११३ ॥

दन्तशिखाशब्दाभ्यां वलच् प्रत्ययो भवति मत्वर्थे संज्ञायां विषये। दन्तावलः सैन्यः।

---

१ - ' वश्च मतुप् च ' इति नास्ति है०।

दन्तावलो गजः। शिखावलं नगरम्। शिखावला स्थूणा॥

ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ॥ ११४॥

ज्योत्स्नादयः शब्दा निपात्यन्ते मत्वर्थे संज्ञायां विषये। ज्योतिष उपधालोपो नश्च प्रत्ययो निपात्यते। ज्योत्स्ना चन्द्रप्रभा। तमस उपधाया इकारो रश्च। तमिस्रा रात्रिः। स्त्रीत्वमतन्त्रम्। अन्यत्रापि दृश्यते। तमिस्रं नभः। शृङ्गादिनच् प्रत्ययो निपात्यते। शृङ्गिणः। ऊर्जोऽसुगागमो निपात्यते विनिवलचौ प्रत्ययौ। ऊर्जस्वी। ऊर्जस्वलः। गोर्मिनिप्रत्ययो निपात्यते। गोमी। मलशब्दादिनजीमसचौ प्रत्ययौ निपात्येते। मलिनः। मलीमसः॥

अत इनिठनौ ॥ ११५ ॥

अकारान्तात् प्रातिपदिकादिनिठनौ प्रत्ययौ भवतः। दण्डी। दण्डिकः। छत्री। छत्रिकः। अन्यतरस्यामित्यधिकारादू मतुबपि भवति। दण्डवान्। छत्रवान्। तपरकरणं किम् ? श्रद्धावान्।

एकाक्षरात् कृतो जातेः सप्तम्यां च न तौ स्मृतौ ॥

एकाक्षरात् तावत्—स्ववान्। खवान्। कृतः—कारकवान्। जातेः—व्याघ्रवान्। सिंहवान्। सप्तम्याम्—दण्डा अस्यां सन्ति दण्डवती शालेति। इतिकरणो विषयनियमार्थः सर्वत्र संबध्यत इत्युक्तम् , तेन क्वचिद् भवत्यपि—कार्यी, हार्यी, तण्डुली, तण्डुलिक इति॥

व्रीह्यादिभ्यश्च ॥ ११६ ॥

व्रीह्यादिभ्यः प्रातिपदिकेभ्य इनिठनौ प्रत्ययौ भवतो मत्वर्थे। मतुब् भवत्येव। व्रीही, व्रीहिकः, व्रीहिमान्। मायी, मायिकः, मायावान्। न च व्रीह्यादिभ्यः सर्वेभ्यः प्रत्ययद्वय- मिष्यते। किं तर्हि ? शिखादिभ्य इनिर्वाच्य इकन् यवखदादिषु। परिशिष्टेभ्य उभयम्। शिखा, मेखला, संज्ञा, बलाका, माला, वीणा, वडवा, अष्टका, पताका, कर्मन्, चर्मन्, हंसा इत्येतेभ्य इनिरेवेष्यते। यवखद, कुमारी, नौ इत्येतेभ्य इकन्नेवेष्यते। परिशिष्टेभ्यो द्वावपि प्रत्ययौ भवतः। व्रीहिग्रहणं किमर्थम्, यावता तुन्दादिषु व्रीहिशब्दः पठ्यते, तत्र इनिठनौ चकारेण विधीयेते ? एवं तर्हि तुन्दादिषु व्रीहिग्रहणमर्थग्रहणं विज्ञायते। शालयोऽस्य सन्ति शालिलः, शाली, शालिकः, शालिमान् इति। व्रीहिशिखादयः पूर्वं पठिताः। यवखद। कुमारी। नौ। शीर्षाद् नञः (ग० सू० १३५)—अशीर्षी। अशीर्षिकः॥

---

१ - ' खट्वावान् ' इति बाल०।

२ - ' शालिनः ' इत्यपपाठो मुद्रितेषु।

तुन्दादिभ्य इलच्च ॥ ११७ ॥

तुन्दादिभ्य प्रातिपदिकेभ्य इलच् प्रत्ययो भवति मत्वर्थे। चकारादिनिठनौ मतुप् च। तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान्। उदरिलः, उदरी, उदरिकः, उदरवान्॥ तुन्द। उदर। पिचण्ड। घट। यव। व्रीहि। स्वाङ्गाद् विवृद्धौ च (ग० सू० १३६)। तुन्दादिः॥

एकगोपूर्वाट् ठञ् नित्यम् ॥ ११८ ॥

एकपूर्वात् गोपूर्वात् च प्रातिपदिकाद् नित्यं ठञ् प्रत्ययो भवति मत्वर्थे। एकशतमस्यास्तीति ऐकशतिकः। ऐकसहस्रिकः। गोपूर्वात् च—गौशतिकः। गौसहस्रिकः। अत इत्येव—एकविंशतिरस्यास्तीति न भवति। कथमैकगविकः ? समासान्ते कृते भविष्यति। कथं गौशकटिकः ? शकटीशब्देन समानार्थः शकटशब्दोऽस्ति, ततो भविष्यति। अवश्यं चात इत्यनुवर्त्यम्, 'द्वन्द्वोपतापगर्ह्यात्०' (५.२.१२८) इत्येवमाद्यर्थम्। नित्यग्रहणं मतुपो बाधनार्थम्। कथमेकद्रव्यवत्त्वादिति ? नैवायं साधुः। एकेन वा द्रव्यवत्त्वादिति समर्थनीयम्॥

शतसहस्रान्ताच्च निष्कात् ॥ ११९ ॥

शतान्तात् सहस्रान्तात् च प्रातिपदिकात् ठञ् प्रत्ययो भवति मत्वर्थे, तौ चेच्छतसहस्रशब्दौ निष्कात् परौ भवतः। निष्कशतमस्यास्ति नैष्कशतिकः। नैष्कसहस्रिकः। सुवर्णनिष्कशतमस्यास्तीत्यनभिधानाद् न भवति॥

रूपादाहतप्रशंसयोर्यप् ॥ १२० ॥

आहतप्रशंसे प्रकृत्युपाधी। आहतप्रशंसाविशिष्टार्थे वर्तमानाद् रूपशब्दाद् यप् प्रत्ययो भवति मत्वर्थे। आहतं रूपमस्य रूप्यो दीनारः। रूप्यः केदारः। रूप्यं कार्षापणम्। प्रशस्तं रूपमस्यास्ति रूप्यः पुरुषः। निघातिकाताडनादिना दीनारादिषु रूपं यदुत्पद्यते तदाहतमित्युच्यते। आहतप्रशंसयोरिति किम् ? रूपवान्॥ यप्प्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्॥ हिम्याः पर्वताः। गुण्या ब्राह्मणाः॥

अस्मायामेधास्रजो विनिः ॥ १२१ ॥

असन्तात् प्रातिपदिकाद् माया मेधा स्रज् इत्येतेभ्यश्च विनिः प्रत्ययो भवति मत्वर्थे। मतुप् सर्वत्र समुच्चीयत एव। असन्तात् तावत्—यशस्वी। तपस्वी। पयस्वी। मायावी। मेधावी। स्रग्वी। मायाशब्दाद् व्रीह्यादिषु पाठादिनिठनावपि भवतः। मायी। मायिकः॥

बहुलं छन्दसि ॥ १२२ ॥

छन्दसि विषये बहुलं विनिः प्रत्ययो भवति मत्वर्थे। अग्नैं तेजस्विन् (तै० सं० ३.३.१.१)। न भवति, सूर्यो वर्चस्वान्॥ छन्दसि विनिप्रकरणेऽष्ट्रामेखलाद्वयोभयरुजा-हृदयानां दीर्घत्वं चेति वक्तव्यम्॥ अष्ट्रावी (ऋ० १०.१०२.८)। मेखलावी। द्वयावी। उभयावी (ऋ० ८.१.२)। रुजावी। हृदयावी। द्वयोभयहृदयानि दीर्घत्वं प्रयोजयन्ति॥ मर्मणश्चेति वक्तव्यम्॥ मर्मावी॥ सर्वत्रामयस्योपसंख्यानम्॥ छन्दसि भाषायां च। आमयावी (तै० सं० ३.२.३.३)॥ शृङ्गवृन्दाभ्यामारकन् वक्तव्यः॥ शृङ्गारकः। वृन्दारकः (श० ब्रा० १४.६.११.१) ॥ फलबर्हाभ्यामिनज् वक्तव्यः॥ फलिनः। बर्हिणः॥ हृदयाच्चालुरन्यतरस्याम्॥ हृदयालुः, हृदयी, हृदयिकः, हृदयवान्॥ शीतोष्णतृप्रेभ्यस्तद् न सहत इत्यालुज् वक्तव्यः॥ शीतं न सहते शीतालुः। उष्णालुः। तृप्रालुः॥ तद् न सहत इति हिमाच्चेलुः॥ हिमं न सहते हिमेलुः॥ बलादूलच्॥ बलं न सहते बलूलः॥ वाताद् समूहे च वातं न सहत इति च॥ वातानां समूहः, वातं न सहत इति वा वातूलः॥ पर्वमरुद्भ्यां तन् वक्तव्यः॥ पर्वतः (मै० सं० ४.१२.५)। मरुत्तः॥ अर्थात् तदभाव इनिर्वक्तव्यः॥ अर्थी। तदभाव इत्येव—अर्थवान्। तदेतत् सर्वं बहुलग्रहणेन सम्पद्यते॥

ऊर्णाया युस् ॥ १२३ ॥

ऊर्णाशब्दाद् युस् प्रत्ययो भवति मत्वर्थे। सकारः पदसंज्ञार्थः। ऊर्णास्य विद्यत ऊर्णायुः (मा० सं० १३.५०)। केचिच्छन्दोग्रहणमनुवर्तयन्ति॥

वाचो ग्मिनिः ॥ १२४ ॥

वाच्शब्दाद् ग्मिनिः प्रत्ययो भवति मत्वर्थे। वाग्ग्मी, वाग्ग्मिनौ, वाग्ग्मिनः॥

आलजाटचौ बहुभाषिणि ॥ १२५ ॥

वाच्शब्दात् प्रथमासमर्थादालच् आटच् इत्येतौ प्रत्ययौ भवतो मत्वर्थे बहुभाषिण्य-भिधेये। ग्मिनेरपवादः। वाचालः। वाचाटः॥ कुत्सित इति वक्तव्यम्॥ यो हि सम्यग् बहु भाषते, वाग्ग्मीत्येव स भवति॥

---

१ - ' वेति ' इति है०।

स्वामिन्नैश्वर्ये ॥ १२६ ॥

स्वामिन्निति निपात्यत ऐश्वर्ये गम्यमाने। स्वशब्दादैश्वर्यवाचिनो मत्वर्थ आमिन् प्रत्ययो निपात्यते। स्वमस्यास्तीति, ऐश्वर्यमस्यास्तीति स्वामी, स्वामिनौ, स्वामिनः। ऐश्वर्य इति किम् ? स्ववान्॥

अर्शआदिभ्योऽच् ॥ १२७ ॥

अर्शस् इत्येवमादिभ्यः प्रातिपदिकेभ्योऽच् प्रत्ययो भवति मत्वर्थे। अर्शांसि अस्य विद्यन्त अर्शसः। उरसः। आकृतिगणश्चायम्। यत्राभिन्नरूपेण शब्देन तद्वतोऽभिधानं तत् सर्वमिह द्रष्टव्यम्॥ अर्शस्। उरस्। तुन्द। चतुर। पलित। जटा। घटा। अभ्र। कर्दम। आम। लवण। स्वाङ्गाद् हीनात् (ग० सू० १३७)। वर्णात् (ग० सू० १३८)। अर्शआदिः॥

द्वन्द्वोपतापगर्ह्यात् प्राणिस्थादिनिः ॥ १२८ ॥

द्वन्द्वः समासः। उपतापो रोगः। गर्ह्यं निन्द्यम्। तद्विषयेभ्यः शब्देभ्यः प्राणिस्थार्थवाचिभ्य इनिः प्रत्ययो भवति मत्वर्थे। द्वन्द्वात् तावत्—कटकवलयिनी। शङ्खनूपुरिणी। उपतापात्—कुष्ठी। किलासी। गर्ह्यात्—ककुदावर्ती। काकतालुकी। प्राणिस्थादिति किम् ? पुष्पफलवान् वृक्षः। प्राण्यङ्गाद् नेष्यते। पाणिपादवती। अत इत्यनुवर्तते। तेनेह न भवति—चित्रललाटिकावती। सिद्धे प्रत्यये पुनर्वचनं ठनादिबाधनार्थम्॥

वातातिसाराभ्यां कुक् च ॥ १२९ ॥

वातातिसारशब्दाभ्यामिनिः प्रत्ययो भवति, तत्संनियोगेन च तयोः कुगागमो भवति। वातातिसारयोरुपतापत्वात् पूर्वेणैव सिद्धे प्रत्यये कुगर्थमेवेदं वचनम्। वातकी। अतिसारकी ॥ पिशाचाच्चेति वक्तव्यम्॥ पिशाचकी वैश्रवणः। रोगे चायमिष्यते। इह न भवति—वातवती गुहेति॥

वयसि पूरणात् ॥ १३० ॥

इनिरनुवर्तते। पूरणप्रत्ययान्तात् प्रातिपदिकादिनिः प्रत्ययो भवति मत्वर्थे वयसि द्योत्ये। पञ्चमोऽस्यास्ति मासः संवत्सरो वा पञ्चमी उष्ट्रः। नवमी। दशमी। सिद्धे सति नियमार्थं वचनम्—इनिरेव भवति, ठन् न भवतीति। वयसीति किम् ? पञ्चमवान् ग्रामरागः॥

सुखादिभ्यश्च ॥ १३१ ॥

सुख इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो नियम्यते मत्वर्थे। सुखी। दुःखी। माला क्षेप इति पठ्यते, व्रीह्यादिषु (५.२.११६) च मालाशब्दोऽस्ति, तदिह क्षेपे मतुब्बाधनार्थं वचनम्॥ सुख। दुःख। तृप्र। कृच्छ्र। आम्र। अलीक। करुणा। कृपण। सोढ। प्रमीप। शील। हल। माला क्षेपे (ग० सू० १३६)। प्रणय। सुखादिः॥

धर्मशीलवर्णान्ताच्च ॥ १३२ ॥

अन्तशब्दः प्रत्येकमभिसंबध्यते। धर्माद्यन्तात् प्रातिपदिकादिनिः प्रत्ययो नियम्यते। ब्राह्मणानां धर्मो ब्राह्मणधर्मः, सोऽस्यास्तीति ब्राह्मणधर्मी। ब्राह्मणशीली। ब्राह्मणवर्णी॥

हस्ताज्जातौ ॥ १३३ ॥

हस्तशब्दादिनिः प्रत्ययो नियम्यते मत्वर्थे, समुदायेन चेज् जातिरभिधीयते। हस्तोऽस्यास्तीति हस्ती, हस्तिनौ, हस्तिनः। जाताविति किम् ? हस्तवान् पुरुषः॥

वर्णाद् ब्रह्मचारिणि ॥ १३४ ॥

वर्णशब्दादिनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेद् ब्रह्मचारी भण्यते। ब्रह्मचारीति त्रैवर्णिकोऽभिप्रेतः। स हि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति, नियममासेवत इत्यर्थः। वर्णी, वर्णिनौ, वर्णिनः। ब्रह्मचारिणीति किम् ? वर्णवान्। ब्राह्मणादयस्त्रयो वर्णा वर्णिन उच्यन्ते॥

पुष्करादिभ्यो देशे ॥ १३५ ॥

पुष्कर इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो भवति, समुदायेन चेद् देशोऽभिधीयते। पुष्करिणी। पद्मिनी। देश इति किम् ? पुष्करवान् हस्ती॥ इनिप्रकरणे बलाद् बाहूरुपूर्वादुपसंख्यानम्॥ बाहुबली। ऊरुबली॥ सर्वादेश्चेति वक्तव्यम्॥ सर्वधनी। सर्वबीजी। सर्वकेशी नटः॥ अर्थाच्चासन्निहिते॥ अर्थी। असन्निहित इति किम् ? अर्थवान्॥ तदन्ताच्चेति वक्तव्यम्॥ धान्यार्थी। हिरण्यार्थी॥ पुष्कर। पद्म। उत्पल। तमाल। कुमुद। नड। कपित्थ। बिस। मृणाल। कर्दम। शालूक। विगर्ह। करीष। शिरीष। यवास। प्रवास। हिरण्य। पुष्करादिः॥

---

१ - ' इति वक्तव्यम् ' इति नास्ति है०।

बलादिभ्यो मतुबन्यतरस्याम् ॥ १३६ ॥

बलादिभ्यः प्रातिपदिकेभ्यो मतुप् प्रत्ययो भवति। अन्यतरस्यांग्रहणेन प्रकृत इनिः समुच्चीयते। बलवान्, बली। उत्साहवान्, उत्साही॥ बल। उत्साह। उद्भाव। उद्वास। उद्वाम। शिखा। पूग। मूल। दंश। कुल। आयाम। व्यायाम। उपयाम। आरोह। अवरोह। परिणाह। युद्ध। बलादिः॥

संज्ञायां मन्माभ्याम् ॥ १३७ ॥

मन्नन्तात् प्रातिपदिकाद् मशब्दान्तात् चेनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेत् संज्ञा गम्यते। प्रथिमिनी। दामिनी। मशब्दान्तात्—होमिनी। सोमिनी। संज्ञायामिति किम् ? सोमवान्। होमवान्॥

कंशंभ्यां बभयुस्ततुतयसः ॥ १३८ ॥

कम् शमिति मकारान्तावुदकसुखयोर्वाचकौ, ताभ्यां ब भ युस् ति तु त यस् इत्येते सप्त प्रत्यया भवन्ति मत्वर्थे। कम्बः। शम्बः। कम्भः। शम्भः। कंयुः। शंयुः। कन्तिः। शन्तिः। कन्तुः। शन्तुः। कन्तः। शन्तः। कंयः। शंयः। सकारः पदसंज्ञार्थः, तेनानुस्वार-परसवर्णौ सिद्धौ भवतः। संज्ञायां हि असत्यां कम्यः शम्य इति स्यात्॥

तुन्दिबलिवटेर्भः ॥ १३९ ॥

तुन्दि बलि वटि इत्येतेभ्यो भः प्रत्ययो भवति मत्वर्थे। तुन्दिरिति वृद्धा नाभिरुच्यते, सास्यास्तीति तुन्दिभः। बलिभः। वटिभः। बलिशब्दः पामादिषु पठ्यते, तेन बलिन इत्यपि भवति॥

अहंशुभमोर्युस् ॥ १४० ॥

अहमिति शब्दान्तरमहंकारे वर्तते, शुभमित्यव्ययं शुभपर्यायः, ताभ्यां युस् प्रत्ययो भवति मत्वर्थे। सकारः पदसंज्ञार्थः। अहंयुः। अहंकारवानित्यर्थः। शुभंयुः। कल्याणवा- नित्यर्थः॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ पञ्चमाध्यायस्य द्वितीयः पादः॥

— o —

॥ पञ्चमाध्यायस्य तृतीयः पादः ॥

प्राग् दिशो विभक्तिः ॥ १ ॥

'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो०' (५.३.२७) इति वक्ष्यति। प्रागेतस्माद् दिक्संशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामो विभक्तिसंज्ञास्ते वेदितव्याः। वक्ष्यति—'पञ्चम्यास्तसिल्' (५.३.७)—ततः। यतः। कुतः। तसिलादीनां विभक्तित्वे प्रयोजनं त्यदादिविधयः, इदमो विभक्तिस्वरश्च। इह। 'ऊडिदम्०' (६.१.१७१) इति विभक्त्युदात्तत्वं सिद्धं भवति। अतः परं स्वार्थिकाः प्रत्ययाः, तेषु समर्थाधिकारः प्रथमग्रहणं च प्रतियोग्यपेक्षत्वाद् नोपयुज्यत इति द्वयमपि निवृत्तम्[1]। वावचनं तु वर्तत एव, तेन विकल्पेन तसिलादयो भवन्ति। कुतः, कस्मात्। कुत्र, कस्मिन्निति॥

किंसर्वनामबहुभ्योऽद्व्यादिभ्यः ॥ २ ॥

प्राग् दिश इत्येव। किमः सर्वनाम्नो बहुशब्दात् च प्राग् दिशः प्रत्यया वेदितव्याः। सर्वनामत्वात् प्राप्ते ग्रहणे द्व्यादिपर्युदासः क्रियते। कुतः। कुत्र। यतः। यत्र। ततः। तत्र। बहुतः। बहुत्र। अद्व्यादिभ्य इति किम् ? द्वाभ्याम्। द्वयोः। प्रकृतिपरिसंख्यानं किम् ? वृक्षात्। वृक्षे। प्राग् दिश इत्येव—वैयाकरणपाशः। सर्वनामत्वादेव सिद्धे किमो ग्रहणं द्व्यादिपर्युदासाद्॥ बहुग्रहणे संख्याग्रहणम्॥ इह न भवति—बहोः सूपात्। बहौ सूप इति॥

इदम इश् ॥ ३ ॥

प्राग् दिश इत्येव। इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु प्रत्ययेषु परतः। शकारः सर्वादेशार्थः। इह॥

एतेतौ रथोः ॥ ४ ॥

रेफथकारादौ प्राग्दिशीये प्रत्यये परत इदम एतेतावादेशौ भवतः। इशोऽपवादः। रेफेऽकार उच्चारणार्थः। 'इदमो र्हिल्' (५.३.१६)—एतर्हि। 'इदमस्थमुः' (५.३.२४)—इत्थम्॥

एतदोऽश् ॥ ५ ॥

---

१ - 'द्वयमपि' इति नास्ति बाल०, है०। २ - 'एतदोऽन्' इति यथामहाभाष्यम्

प्राग् दिश इत्येव। एतदः प्राग्दिशीये परतोऽशित्ययमादेशो भवति। शकारः सर्वादेशार्थः। अतः। अत्र। एतद इति योगविभागः कर्तव्यः। एतदो रथोः परत एत इत् इत्येतावादेशौ भवतः। एतर्हि। इत्थम्। रेफादिः 'अनद्यतने र्हिलन्यतरस्याम्' (५.३.२१) इति विद्यत एव। थमुप्रत्ययः पुनरेतद उपसंख्येयः॥

सर्वस्य सोऽन्यतरस्यां दि ॥ ६ ॥

सर्वस्य स इत्ययमादेशो भवति प्राग्दिशीये दकारादौ प्रत्यये परतोऽन्यतरस्याम्। सर्वदा, सदा। प्राग्दिशीय इत्येव—सर्वं ददातीति सर्वदा ब्राह्मणी॥

पञ्चम्यास्तसिल् ॥ ७ ॥

पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यस्तसिल् प्रत्ययो भवति। कुतः। यतः। ततः। बहुतः॥

तसेश्च ॥ ८ ॥

'प्रतियोगे पञ्चम्यास्तसिः' (५.४.४४), 'अपादाने चाहीयरुहोः' (५.४.४५) इति वक्ष्यति। तस्य तसेः किंसर्वनामबहुभ्यः परस्य तसिलादेशो भवति। कुत आगतः। यतः। ततः। बहुत आगतः। तसेस्तसिल्वचनं स्वरार्थं विभक्त्यर्थं च॥

पर्यभिभ्यां च ॥ ९ ॥

परि अभि इत्येताभ्यां तसिल् प्रत्ययो भवति। सर्वोभयार्थे वर्तमानाभ्यां प्रत्यय इष्यते। परितः। सर्वत इत्यर्थः। अभितः। उभयत इत्यर्थः॥

सप्तम्यास्त्रल् ॥ १० ॥

किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यः त्रल् प्रत्ययो भवति। कुत्र। यत्र। तत्र। बहुत्र॥

इदमो हः ॥ ११ ॥

इदमः सप्तम्यन्ताद् हः प्रत्ययो भवति। त्रलोऽपवादः। इह॥

किमोऽत् ॥ १२ ॥

किमः सप्तम्यन्तादत् प्रत्ययो भवति। त्रलोऽपवादः। क्व भोक्ष्यसे। क्वाध्येष्यसे। त्रलमपि केचिदिच्छन्ति। कुत्र। तत्कथम् ? उत्तरसूत्राद् वावचनं पुरस्तादपकृष्यते॥

वा ह चच्छन्दसि ॥ १३ ॥

किमः सप्तम्यन्ताद् वा हः प्रत्ययो भवति छन्दसि विषये। यथाप्राप्तं च। क्व। कुह (ऋ० ८.७३.४)। कुत्रचिदस्य सा दूरे क्व ब्राह्मणस्य चावकाः॥

इतराभ्योऽपि दृश्यन्ते ॥ १४ ॥

पञ्चमीसप्तम्यपेक्षमितरत्वम्। इतराभ्यो विभक्तिभ्यस्तसिलादयो दृश्यन्ते। दृशिग्रहणं प्रायिकविध्यर्थम्, तेन भवदादिभिर्योग एवैतद्विधानम्। के पुनर्भवदादयः ? भवान् दीर्घायुरायुष्मान् देवानां प्रिय इति। स भवान्, ततो भवान्, तत्र भवान्। तं भवन्तम्, ततो भवन्तम् , तत्र भवन्तम्। तेन भवता, ततो भवता, तत्र भवता। तस्मै भवते, ततो भवते, तत्र भवते। तस्माद् भवतः, ततो भवतः, तत्र भवतः। तस्य भवतः, ततो भवतः, तत्र भवतः। तस्मिन् भवति, ततो भवति, तत्र भवति। एवं दीर्घायुःप्रभृतिष्वप्युदाहार्यम्॥

सर्वैकान्यकिंयत्तदः काले दा ॥ १५ ॥

सप्तम्या इति वर्तते, न त्वितराभ्य इति। सर्वादिभ्यः प्रातिपदिकेभ्यो दा प्रत्ययो भवति। त्रलोऽपवादः। सर्वस्मिन् काले सर्वदा। एकदा। अन्यदा। कदा। यदा। तदा। काल इति किम् ? सर्वत्र देशे॥

इदमोर्हिल् ॥ १६ ॥

सप्तम्या इत्येव, काल इति च। इदमः सप्तम्यन्तात् काले वर्तमानाद् र्हिल् प्रत्ययो भवति। हस्यापवादः। लकारः स्वरार्थः। अस्मिन् काल एतर्हि। काल इत्येव—इह देशे॥

अधुना ॥ १७ ॥

अधुनेति निपात्यते। इदमोऽशूभावो धुना च प्रत्ययः। अस्मिन् काले अधुना॥

दानीं च ॥ १८ ॥

इदमः सप्तम्यन्तात् काले वर्तमानाद् दानीं प्रत्ययो भवति। अस्मिन् काल इदानीम्॥

तदो दा च ॥ १९ ॥

तदः सप्तम्यन्तात् काले वर्तमानाद् दा प्रत्ययो भवति, चकाराद् दानीं च। तस्मिन् काले तदा, तदानीम्। तदो दावचनमनर्थकम्, विहितत्वात्॥

तयोर्दार्हिलौ चच्छन्दसि ॥ २० ॥

तयोरिति प्रातिपदिकनिर्देशः। तयोरिदमः तदश्च यथासंख्यं दार्हिलौ प्रत्ययौ भवत- श्छन्दसि विषये। चकारादु यथाप्राप्तं च। इदावत्सरीयः (काठ० सं० १३. १५)। इदं तर्हि। इदानीम्। तदानीम्॥

अनद्यतने र्हिलन्यतरस्याम् ॥ २१ ॥

छन्दसीति न स्वर्यते। सामान्येन विधानम्। किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्योऽनद्यतने कालविशेषे वर्तमानेभ्यो र्हिल् प्रत्ययो भवत्यन्यतरस्याम्। कर्हि, कदा। यर्हि, यदा। तर्हि, तदा॥

सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥ २२॥

सप्तम्या इति काल इति च वर्तते। सद्यःप्रभृतयः शब्दा निपात्यन्ते। प्रकृतिः, प्रत्ययः, आदेशः, कालविशेष इति सर्वमेतद् निपातनाद् लभ्यते। समानस्य सभावो निपात्यते द्यश्च प्रत्ययोऽहन्यभिधेये। समानेऽहनि सद्यः। पूर्वपूर्वतरयोः परभावो निपात्यत उदारी च प्रत्ययौ संवत्सरेऽभिधेये। पूर्वस्मिन् संवत्सरे परुत्। पूर्वतरे संवत्सरे परारी। इदम इश्भावः समसण् प्रत्ययो निपात्यते संवत्सरेऽभिधेये। अस्मिन् संवत्सर ऐषमः। परस्मादेद्यविः प्रत्ययोऽहनि। परस्मिन्नहनि परेद्यवि। इदमोऽश्भावो द्यश्च प्रत्ययोऽहनि। अस्मिन्नहनि अद्य। पूर्वान्यान्यतरेतरापराधरोभयोत्तरेभ्य एद्युस् प्रत्ययो निपात्यतेऽहन्यभिधेये। पूर्वस्मिन्नहनि पूर्वेद्युः। अन्यस्मिन्नहनि अन्येद्युः। अन्यतरस्मिन्नहनि अन्यतरेद्युः। इतरस्मिन्नहनि इतरेद्युः। अपरस्मिन्नहनि अपरेद्युः। अधरस्मिन्नहनि अधरेद्युः। उभयोरह्नोरुभयेद्युः। उत्तरस्मिन्नहनि उत्तरेद्युः॥ द्युश्चोभयाद् वक्तव्यः॥ उभयद्युः (शौ० सं० १.२५.४)॥

प्रकारवचने थाल् ॥ २३ ॥

'किंसर्वनामबहुभ्योऽद्व्यादिभ्यः' (५.३.२) इति वर्तते। सप्तम्या इति काल इति च निवृत्तम्। सामान्यस्य भेदको विशेषः प्रकारः। प्रकृत्यर्थविशेषणं चैतत्। प्रकारवृत्तिभ्यः किंसर्वनामबहुभ्यः स्वार्थे थाल् प्रत्ययो भवति। तेन प्रकारेण तथा। यथा। सर्वथा। जातीयरोऽपीदृशमेव लक्षणम्। स तु स्वभावात् प्रकारवति वर्तते, थाल् पुनः प्रकारमात्रे॥

इदमस्थमुः ॥ २४ ॥

इदंशब्दात् प्रकारवचने थमुः प्रत्ययो भवति। थालोऽपवादः। अनेन प्रकारेण इत्थम्। उकारो मकारपरित्राणार्थः॥

किमश्च ॥ २५ ॥

किंशब्दात् प्रकारवचने थमुः प्रत्ययो भवति। केन प्रकारेण कथम्। योगविभाग उत्तरार्थः॥

था हेतौ चच्छन्दसि ॥ २६ ॥

किंशब्दाद् हेतौ वर्तमानात् था प्रत्ययो भवति, चकारात् प्रकारवचने छन्दसि विषये। हेतौ तावत्—क॒था ग्रामं॒ न पृ॒च्छसि॒ (ऋ० १०.१४६.१)। केन हेतुना न पृच्छसीत्यर्थः। प्रकारवचने—कथा देवा आसन् पुराविदः। विभक्तिसंज्ञायाः पूर्णोऽवधिः॥

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ २७॥

दिशां शब्दा दिक्शब्दाः। तेभ्यो दिक्शब्देभ्यो दिग्देशकालेषु वर्तमानेभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्योऽस्तातिः प्रत्ययो भवति स्वार्थे। यथासंख्यमत्र नेष्यते। पुरस्ताद् वसति। पुरस्तादागतः। पुरस्ताद् रमणीयम्। अधस्ताद् वसति। अधस्तादागतः। अधस्ताद् रमणीयम्। दिक्शब्देभ्य इति किम् ? ऐन्द्र्यां दिशि वसति। सप्तमीपञ्चमीप्रथमाभ्य इति किम् ? पूर्वं ग्रामं गतः। दिग्देशकालेष्विति किम् ? पूर्वस्मिन् गुरौ वसति। इकारस्तकारपरित्राणार्थः॥

दक्षिणोत्ताराभ्यामतसुच् ॥ २८ ॥

दक्षिणोत्ताराभ्यां दिग्देशकालेषु वर्तमानाभ्यां सप्तमीपञ्चमीप्रथमान्ताभ्यां स्वार्थेऽतसुच् प्रत्ययो भवति। अस्तातेरपवादः। दक्षिणाशब्दः काले न संभवतीति दिग्देशवृत्तिः परिगृह्यते। दक्षिणतो वसति। दक्षिणत आगतः। दक्षिणतो रमणीयम्। उत्तरतो वसति। उत्तरत आगतः। उत्तरतो रमणीयम्। अकारो विशेषणार्थः 'षष्ठ्यतसर्थप्रत्ययेन' (२. ३.३०) इति॥

विभाषा परावराभ्याम् ॥ २९ ॥

---

१ - 'योगविभाग उत्तरार्थः' इति नास्ति बाल०।

परावरशब्दाभ्यां विभाषातसुच् प्रत्ययो भवत्यस्तातेरर्थे। परतो वसति। परत आगतः। परतो रमणीयम्। परस्ताद् वसति। परस्तादागतः। परस्ताद् रमणीयम्। अवरतो वसति। अवरत आगतः। अवरतो रमणीयम्। अवस्ताद् वसति। अवस्ताद् आगतः। अवस्ताद् रमणीयम्॥

अञ्चेर्लुक् ॥ ३० ॥

अञ्चत्यन्तेभ्यो दिक्शब्देभ्य उत्तरस्यास्तातिप्रत्ययस्य लुग् भवति। प्राच्यां दिशि वसति। 'लुक् तद्धितलुकि' (१.२.४९) इति स्त्रीप्रत्ययोऽपि निवर्तते। प्राग् वसति। प्राग् आगतः। प्राग् रमणीयम्। प्रत्यग् वसति। प्रत्यग् आगतः। प्रत्यग् रमणीयम्॥

उपर्युपरिष्टात् ॥ ३१ ॥

उपरि उपरिष्टाद् इत्येतौ शब्दौ निपात्येते अस्तातेरर्थे। ऊर्ध्वस्योपभावो रिलू-रिष्टातिलौ च प्रत्ययौ निपात्येते। ऊर्ध्वायां दिशि वसति उपरि वसति। उपर्यागतः। उपरि रमणीयम्। उपरिष्टाद् वसति। उपरिष्टादागतः। उपरिष्टाद् रमणीयम्॥

पश्चात् ॥ ३२ ॥

पश्चादित्ययं शब्दो निपात्यतेऽस्तातेरर्थे। अपरस्य पश्चभाव आतिश्च प्रत्ययः। अपरस्यां दिशि वसति पश्चाद् दिशि वसति। पश्चादागतः। पश्चाद् रमणीयम्॥ दिक्पूर्वपदस्यापरस्य पश्चभावो वक्तव्यः, आतिश्च प्रत्ययः॥ दक्षिणपश्चात्। उत्तरपश्चात्॥ अर्धोत्तरपदस्य दिक्पूर्वपदस्य पश्चभावो वक्तव्यः॥ दक्षिणपश्चार्धः। उत्तरपश्चार्धः॥ विनापि पूर्वपदेन पश्चभावो वक्तव्यः॥ पश्चार्धः॥

पश्च पश्चा चच्छन्दसि ॥ ३३ ॥

पश्चपश्चाशब्दौ निपात्येते छन्दसि विषयेऽस्तातेरर्थे। चकारात् पश्चादित्यपि भवति। अपरस्य पश्चभावोऽकाराकारौ च प्रत्ययौ निपात्येते। पुरा व्याघ्रो जायते पश्च सिंहः। पश्चा सिंहः। पश्चात् सिंहः॥

उत्तराधरदक्षिणादातिः ॥ ३४ ॥

उत्तराधरदक्षिणशब्देभ्य आतिः प्रत्ययो भवत्यस्तातेरर्थे। उत्तरस्यां दिशि वसति उत्तराद् वसति। उत्तरादागतः। उत्तराद् रमणीयम्। अधराद् वसति। अधरादागतः।

---

१ - ' अवरस्ताद् ' इति है०। २ - ' पुरो व्याप्तो ' इति बाल०।

अधराद् रमणीयम्। दक्षिणाद् वसति। दक्षिणादागतः। दक्षिणाद् रमणीयम्॥

एनबन्यतरस्यामदूरेऽपञ्चम्याः ॥ ३५ ॥

उत्तराधरदक्षिणशब्देभ्य एनप् प्रत्ययो भवत्यन्यतरस्यामस्तातेरर्थे, अदूरे चेदवधिमानवधेर्भवति। विभक्तित्रये प्रकृतेऽपञ्चम्या इति पञ्चमी पर्युदस्यते। तेनायं सप्तमीप्रथमा- न्ताद् विज्ञायते प्रत्ययः। उत्तरेण वसति, उत्तराद् वसति, उत्तरतो वसति। उत्तरेण रमणीयम्, उत्तराद् रमणीयम्, उत्तरतो रमणीयम्। अधरेण वसति, अधराद् वसति, अधस्ताद् वसति। अधरेण रमणीयम्, अधराद् रमणीयम्, अधस्ताद् रमणीयम्। दक्षिणेन वसति, दक्षिणाद् वसति, दक्षिणतो वसति। दक्षिणेन रमणीयम्, दक्षिणाद् रमणीयम्, दक्षिणतो रमणीयम्। अदूर इति किम् ? उत्तराद् वसति। अपञ्चम्या इति किम् ? उत्तरादागतः। अपञ्चम्या इति प्रागसेः (५.३.३६)। असिप्रत्ययस्तु पञ्चम्यन्तादपि भवति। केचिदिहोत्तरादिग्रहणं नानुवर्तयन्ति। दिक्छब्दमात्रात् प्रत्ययं मन्यन्ते। पूर्वेण ग्रामम्। अपरेण ग्रामम्॥

दक्षिणादाच् ॥ ३६ ॥

अदूर इति न स्वर्यते। अपञ्चम्या इति वर्तते। दक्षिणशब्दादाच् प्रत्ययो भवत्यस्तातेरर्थे। दक्षिणा वसति। दक्षिणा रमणीयम्। अपञ्चम्या इत्येव—दक्षिणत आगतः। चकारो विशेषणार्थः, अञ्चूत्तरपदाजाहियुक्ते (२.३.२६) इति॥

आहि च दूरे ॥ ३७ ॥

दक्षिणशब्दादाहिः प्रत्ययो भवत्यस्तातेरर्थे, चकारादाच्, दूरे चेदवधिमानवधेर्भवति। दक्षिणाहि वसति। दक्षिणा वसति। दक्षिणाहि रमणीयम्। दक्षिणा रमणीयम्। दूर इति किम् ? दक्षिणतो वसति। अपञ्चम्या इत्येव—दक्षिणत आगतः॥

उत्तराच्च ॥ ३८ ॥

उत्तरशब्दादाजाही प्रत्ययौ भवतोऽस्तातेरर्थे, दूरे चेदवधिमानवधेर्भवति। उत्तरा वसति। उत्तराहि वसति। उत्तरा रमणीयम्। उत्तराहि रमणीयम्। दूर इत्येव—उत्तरेण प्रयाति। अपञ्चम्या इत्येव—उत्तरादागतः॥

पूर्वाधरावराणामसि पुरधवश्चैषाम् ॥ ३९ ॥

अपञ्चम्या इति निवृत्तम्। तिसृणां विभक्तीनामिह ग्रहणम्। पूर्वाधरावराणामसिः

प्रत्ययो भवत्यस्तातेरर्थे, तत्सन्नियोगेन चैषां यथासंख्यं पुर् अध् अव् इत्येत आदेशा भवन्ति। असीत्यविभक्तिको निर्देशः। पुरो वसति। पुर आगतः। पुरो रमणीयम्। अधो वसति। अध आगतः। अधो रमणीयम्। अवो वसति। अव आगतः। अवो रमणीयम्॥

अस्ताति च ॥ ४० ॥

सप्तम्यन्तमेतत्। अस्तातिप्रत्यये परतः पूर्वादीनां यथासंख्यं पुरादय आदेशा भवन्ति। इदमेवादेशविधानं ज्ञापकम्—अस्तातिरेभ्यो भवति, असिप्रत्ययेन न बाध्यत इति। पुरस्ताद् वसति। पुरस्तादागतः। पुरस्ताद् रमणीयम्। अधस्ताद् वसति। अधस्तादागतः। अधस्ताद् रमणीयम्॥

विभाषावरस्य ॥ ४१ ॥

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते। अवरस्यास्तातौ परतो विभाषा अव् इत्यय-मादेशो भवति। अवस्ताद् वसति। अवस्तादागतः। अवस्ताद् रमणीयम्। अवरस्ताद् वसति। अवरस्तादागतः। अवरस्ताद् रमणीयम्॥

संख्याया विधार्थे धा ॥ ४२ ॥

संख्यावाचिभ्यः प्रातिपदिकेभ्यो विधार्थे वर्तमानेभ्यो धा प्रत्ययो भवति स्वार्थे। विधा प्रकारः, स च सर्वक्रियाविषय एव गृह्यते। क्रियाप्रकारे वर्तमानायाः संख्याया धा प्रत्ययः। एकधा भुङ्क्ते। द्विधा गच्छति। त्रिधा। चतुर्धा। पञ्चधा॥

अधिकरणविचाले च ॥ ४३ ॥

संख्याया इत्येव। अधिकरणं द्रव्यम्, तस्य विचालः संख्यान्तरापादनम्। एकस्यानेकी-करणमनेकस्य वैकीकरणम्। अधिकरणविचाले गम्यमाने संख्यायाः स्वार्थे धा प्रत्ययो भवति। एकं राशिं पञ्चधा कुरु। अष्टधा कुरु। अनेकमेकधा कुरु॥

एकाद्धो ध्यमुञन्यतरस्याम् ॥ ४४ ॥

एकशब्दात् परस्य धाप्रत्ययस्य ध्यमुञादेशो भवत्यन्यतरस्याम्। एकधा राशिं कुरु, ऐकध्यं कुरु। एकधा भुङ्क्ते, ऐकध्यं भुङ्क्ते। प्रकरणादेव लब्धे पुनर्धाग्रहणं विधार्थे विहितस्यापि यथा स्यात्। अनन्तरस्यैव ह्येतत् प्राप्नोति॥

---

१ - 'सर्व' इति न स्यात् यथान्यासपदमञ्जरि ।

द्वित्र्योश्च धमुञ् ॥ ४५ ॥

धा इत्यनुवर्तते। द्वित्र्योः संबन्धिनो धाप्रत्ययस्य विधार्थेऽधिकरणविचाले च विहितस्य धमुञादेशो भवत्यन्यतरस्याम्। चकारो विकल्पानुकर्षणार्थः। द्विधा, द्वैधम्। त्रिधा, त्रैधम्॥ धमुञन्तात् स्वार्थे डदर्शनम्॥ मतिद्वैधानि संश्रयन्ते। मतित्रैधानि संश्रयन्ते॥

एधाच्च ॥ ४६ ॥

द्वित्र्योः संबन्धिनो धाप्रत्ययस्य एधाजादेशो भवत्यन्यतरस्याम्। चकारो विकल्पानुकर्षणार्थः। द्वेधा, द्वैधम्, द्विधा। त्रेधा, त्रैधम्, त्रिधा॥

याप्ये पाशप् ॥ ४७ ॥

याप्यः कुत्सित इत्युच्यते। याप्ये वर्तमानात् प्रातिपदिकात् स्वार्थे पाशप् प्रत्ययो भवति। याप्यो वैयाकरणः, कुत्सितो वैयाकरणो वैयाकरणपाशः। याज्ञिकपाशः। यो व्याकरणशास्त्रे प्रवीणो दुःशीलः, तत्र कस्माद् न भवति ? यस्य गुणस्य सद्भावाद् द्रव्ये शब्दनिवेशः, तस्य कुत्सायां प्रत्ययः॥

पूरणाद् भागे तीयादन् ॥ ४८ ॥

पूरणप्रत्ययो यस्तीयः, तदन्ताद् प्रातिपदिकाद् भागे वर्तमानात् स्वार्थेऽन् प्रत्ययो भवति। स्वरार्थं वचनम्। द्वितीयो भागो द्वितीयः। तृतीयः। भाग इति किम् ? द्वितीयम्। तृतीयम्। पूरणग्रहणमुत्तरार्थम्, न ह्यपूरणस्तीयोऽस्ति। मुखतीयादिरनर्थकः॥

प्रागेकादशभ्योऽच्छन्दसि ॥ ४९ ॥

पूरणाद् भाग इत्येव। प्रागेकादशभ्यः संख्याशब्देभ्यः पूरणप्रत्ययान्तेभ्यो भागे वर्तमानेभ्यः स्वार्थेऽन् प्रत्ययो भवति अच्छन्दसि विषये। स्वरार्थं वचनम्। पञ्चमः। सप्तमः। नवमः। दशमः। प्रागेकादशभ्य इति किम् ? एकादशः। द्वादशः। अच्छन्दसीति किम् ? तꣳस्य पञ्च१मꣳमिन्द्रि१यꣳस्यांपा१क्रामꣳत् (मै० सं० १.६.४)॥

---

१ - ‘ पथि० ’ इति बाल०।

२ - ‘ याप्यो वैयाकरणः ’ इति नास्ति तारा०।

३ - ‘ संख्यावाचिभ्यः ’ इति बाल०।

षष्ठाष्टमाभ्यां ञ च ॥ ५० ॥

भाग इत्येव, अच्छन्दसीति च। षष्ठाष्टमाभ्यां भागेऽभिधेयेऽच्छन्दसि विषये ञः प्रत्ययो भवति, चकारादन् च। षष्ठो भागः षाष्ठः, षष्ठः। आष्टमः, अष्टमः॥

मानपश्वङ्गयोः कन्लुकौ च ॥ ५१ ॥

भाग इत्येव। षष्ठाष्टमाभ्यां यथासंख्यं कन्लुकौ च भवतो मानपश्वङ्गयोर्भाग-योरभिधेययोः। षष्ठको भागो मानं चेत् तद् भवति। अष्टमो भागः पश्वङ्गं चेत् तद् भवति। कस्य लुक्? ञस्य लुक्, अनो वा। चकाराद् यथाप्राप्तं च। षाष्ठः, षष्ठः। आष्टमः, अष्टमः। मानपश्वङ्गयोरिति किम्? षाष्ठः। षष्ठः। आष्टमः। अष्टमः॥

एकादाकिनिच्चासहाये ॥ ५२ ॥

एकशब्दादसहायवाचिनः स्वार्थ आकिनिच् प्रत्ययो भवति, चकारात् कन्लुकौ च। आकिनिचः कनो वा लुग् विज्ञायते। स च विधानसामर्थ्यात् पक्षे भवति। एकाकी, एककः, एकः। असहायग्रहणं संख्याशब्दनिरासार्थम्। तदुपादाने हि द्विबह्वोर्न स्यात्। एकाकिनौ, एकाकिनः॥

भूतपूर्वे चरट् ॥ ५३ ॥

पूर्वं भूत इति विगृह्य सुप्सुपेति समासः। भूतपूर्वशब्दोऽतिक्रान्तकालवचनः। प्रकृतिविशेषणं चैतत्। भूतपूर्वत्वविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे चरट् प्रत्ययो भवति। आढ्यो भूतपूर्व आढ्यचरः। सुकुमारचरः। टकारो ङीबर्थः। आढ्यचरी॥

षष्ठ्या रूप्य च ॥ ५४॥

षष्ठ्यन्तात् प्रातिपदिकाद् रूप्यः प्रत्ययो भवति, चकारात् चरट् च। षष्ठ्यन्तात् प्रत्ययविधानात् संप्रति भूतपूर्वग्रहणं प्रत्ययार्थस्य विशेषणम्, न तु प्रकृत्यर्थविशेषणम्। देवदत्तस्य भूतपूर्वो गौर्देवदत्तरूप्यः। देवदत्तचरः॥

अतिशायने तमबिष्ठनौ ॥ ५५ ॥

अतिशयनमतिशायनम्, प्रकर्षः। निपातनाद् दीर्घत्वम्। प्रकृत्यर्थविशेषणं चैतत्। अतिशायनविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे तमबिष्ठनौ प्रत्ययौ भवतः।

---

१ - 'शब्द' इति नास्ति बाल०।

प्रकृत्यर्थविशेषणं च स्वार्थिकानां द्योत्यं भवति। सर्व इम आढ्याः, अयमेषामतिशयेनाढ्य आढ्यतमः। दर्शनीयतमः। सुकुमारतमः। सर्व इमे पटवः, अयमेषामतिशयेन पटुः पटिष्ठः। लघिष्ठः। गरिष्ठः। यदा च प्रकर्षवतां पुनः प्रकर्षो विवक्ष्यते, तदातिशायिकान्तादपरः प्रत्ययो भवत्येव। दे॒वो वः॑ सवि॒ता प्रार्प॑यतु श्रेष्ठ॑तमाय॒ कर्म॑णे॒ (मा० सं० १.१)। युधिष्ठिरः श्रेष्ठतमः कुरूणामिति॥

तिङश्च ॥ ५६ ॥

तिङन्तात् चातिशायने द्योत्ये तमप् प्रत्ययो भवति। 'ङ्याप्प्रातिपदिकात्' (४.१.१) इत्यधिकारात् तिङो न प्राप्नोतीतीदं वचनम्। सर्व इमे पचन्तीति, अयमेषामतिशयेन पचति पचतितमाम्। जल्पतितमाम्। इष्ठन् नोदाहियते, गुणवचने तस्य नियतत्वात्[1] ॥

द्विवचनविभज्योपपदे तरबीयसुनौ ॥ ५७ ॥

द्वयोरर्थयोर्वचनं द्विवचनम्। विभक्तव्यो विभज्यः। निपातनाद् यद् भवति। द्व्यर्थे विभज्ये चोपपदे प्रातिपदिकात् तिङन्तात् चातिशायने तरबीयसुनौ प्रत्ययौ भवतः। तमबिष्टनोरपवादौ। यथासंख्यमत्र नेष्यते। द्वाविमावाढ्यौ, अयमनयोरतिशयेनाढ्य आढ्यतरः। सुकुमारतरः। पचतितराम्। जल्पतितराम्। ईयसुन् खल्वपि—द्वाविमौ पटू, अयमनयोरतिशयेन पटुः पटीयान्। लघीयान्। विभज्ये चोपपदे—माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। दर्शनीयतराः। पटीयांसः। लघीयांसः॥

अजादी गुणवचनादेव ॥ ५८ ॥

इष्ठन्नीयसुनावजादी सामान्येन विहितौ, तयोरयं विषयनियमः क्रियते—गुणवचनादेव भवतस्तौ, नान्यस्मादिति। पटीयान्। लघीयान्। पटिष्ठः। लघिष्ठः। इह न भवतः—पाचकतरः, पाचकतम इति। एवकार इष्टतोऽवधारणार्थः, प्रत्ययनियमोऽयं न प्रकृतिनियम इति। पटुतरः। पटुतमः॥

तुश्छन्दसि ॥ ५९ ॥

तुरिति तृन्तृचोः सामान्येन ग्रहणम्। त्रन्तात् छन्दसि विषयेऽजादी प्रत्ययौ भवतः। पूर्वेण गुणवचनादेव नियमे कृते छन्दसि प्रकृत्यन्तराण्यभ्यनुज्ञायन्ते, त्रन्तादप्यजादी भवत इति। आसु॒तिं करि॑ष्ठः (ऋ० ७.९७.७)। दोहीयसी धेनुः। 'भस्याढे तद्धिते०' (वा० ६.३.३५) इति पुंवद्भावे कृते 'तुरिष्ठेमेयःसु' (६.४.१५४) इति तृचो निवृत्तिः॥

---

१ - 'गुणवचने नियमितत्वात्' इति बाल०। २ - 'आढ्य' इति नास्ति बाल०।

प्रशस्यस्य श्रः ॥ ६० ॥

प्रशस्यशब्दस्य श्र इत्ययमादेशो भवत्यजाद्योः प्रत्ययोः परतः। अजादी इति प्रकृतस्य सप्तमी विभक्तिर्विपरिणम्यते। ननु च प्रशस्यशब्दस्यागुणवचनत्वादजादी न संभवतः ? एवं तह्यदिशविधानसामर्थ्यात् तद्विषयो नियमो न प्रवर्तते, अजादी गुणवचनादेवेति। एवमुत्तरेष्वपि योगेषु विज्ञेयम्। सर्व इमे प्रशस्याः, अयमेषामतिशयेन प्रशस्यः श्रेष्ठः। उभाविमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यः श्रेयान्। अयमस्मात् श्रेयान्। 'प्रकृत्यैकाच्' (६.४.१६३) इति प्रकृतिभावात् श्रशब्दस्य टिलोपयस्येतिलोपौ न भवतः॥

ज्य च ॥ ६१ ॥

प्रशस्यशब्दस्य ज्य इत्ययमादेशो भवत्यजाद्योः प्रत्ययोः परतः। सर्व इमे प्रशस्याः, अयमेषामतिशयेन प्रशस्यो ज्येष्ठः। उभाविमौ प्रशस्यौ, अयमनयोरतिशयेन प्रशस्यो ज्यायान्। अयमस्मात् ज्यायान्। 'ज्यादादीयसः' (६.४.१६०) इत्याकारः॥

वृद्धस्य च ॥ ६२ ॥

वृद्धशब्दस्य च ज्य इत्ययमादेशो भवत्यजाद्योः प्रत्ययोः परतः। तयोश्च सत्त्वं नियमाभावेन पूर्ववद् ज्ञाप्यते। सर्व इमे वृद्धाः, अयमेषामतिशयेन वृद्धो ज्येष्ठः। उभाविमौ वृद्धौ, अयमनयोरतिशयेन वृद्धो ज्यायान्। अयमस्माद् ज्यायान्। 'प्रियस्थिर०' (६.४.१५७) इत्यादिना वृद्धशब्दस्य वर्षादेशो विधीयते। वचनसामर्थ्यात् पक्षे सोऽपि भवति—वर्षिष्ठः, वर्षीयानिति॥

अन्तिकबाढयोर्नेदसाधौ ॥ ६३ ॥

अन्तिकबाढयोर्यथासंख्यं नेद साध इत्येतावादेशौ भवतोऽजाद्योः परतः। तयोश्च सत्त्वं पूर्ववद् विज्ञेयम्। निमित्तयोर्यथासंख्यमत्र नेष्यते। सर्वाणीमान्यन्तिकानि, इदमेषामतिशयेनान्तिकं नेदिष्ठम्। उभे इमे अन्तिके, इदमनयोरतिशयेनान्तिकं नेदीयः। इदमस्माद् नेदीयः। सर्व इमे बाढमधीयते, अयमेषामतिशयेन बाढमधीते साधिष्ठम्। उभाविमौ बाढमधीयाते, अयमनयोरतिशयेन बाढमधीते साधीयः। अयमस्मात् साधीयोऽधीते॥

---

१ - ' अयमस्मात् श्रेयान् ' इति नास्ति बाल० ।

२ - ' साधिष्ठः ' इति मुद्रितेषु ।

युवाल्पयोः कनन्यतरस्याम् ॥ ६४ ॥

युवाल्पशब्दयोः कनित्ययमादेशो भवत्यन्यतरस्यामजाद्योः परतः। तयोश्च सत्त्वं पूर्ववत् ज्ञेयम्। सर्व इमे युवानः, अयमेषामतिशयेन युवा कनिष्ठः। द्वाविमौ युवानौ, अयमनयोरतिशयेन युवा कनीयान्। अयमस्मात् कनीयान्। यविष्ठः, यवीयान् इति वा। सर्व इमेऽल्पाः, अयमेषामतिशयेनाल्पः कनिष्ठः। उभाविमावल्पौ, अयमनयोरतिशयेनाल्पः कनीयान्। अयमस्मात् कनीयान्। अल्पिष्ठः, अल्पीयानिति वा॥

विन्मतोर्लुक् ॥ ६५ ॥

विनो मतुपश्च लुग् भवत्यजाद्योः प्रत्यययोः परतः। इदमेव वचनं ज्ञापकमजादिसद्भावस्य। सर्व इमे स्रग्विणः, अयमेषामतिशयेन स्रग्वी स्रजिष्ठः। उभाविमौ स्रग्विणौ, अयमनयोरतिशयेन स्रग्वी स्रजीयान्। अयमस्मात् स्रजीयान्। सर्व इमे त्वग्वन्तः, अयमेषामतिशयेन त्वग्वान् त्वचिष्ठः। उभाविमौ त्वग्वन्तौ, अयमनयोरतिशयेन त्वग्वान् त्वचीयान्। अयमस्मात् त्वचीयान्॥

प्रशंसायां रूपप् ॥ ६६ ॥

प्रशंसा स्तुतिः। प्रकृत्यर्थस्य विशेषणं चैतत्। प्रशंसाविशिष्टेऽर्थे वर्तमानात् प्राति- पदिकात् स्वार्थे रूपप् प्रत्ययो भवति। स्वार्थिकाश्च प्रत्ययाः प्रकृत्यर्थविशेषस्य द्योतका भवन्ति। प्रशस्तो वैयाकरणो वैयाकरणरूपः। याज्ञिकरूपः। प्रकृत्यर्थस्य वैशिष्ट्ये प्रशंसा भवति। वृषलरूपोऽयम्, यः पलाण्डुना सुरां पिबति। चोररूपः, दस्युरूपः, योऽक्ष्णोरप्यञ्जनं हरेत्[1]। 'तिङश्च' (५.३.५६) इत्यनुवर्तते। पचतिरूपम्, पचतोरूपम्, पचन्तिरूपम्। क्रियाप्रधानमाख्यातम्। एका च क्रियेति रूपप्प्रत्ययान्तादु द्विवचनबहुवचने न भवतः। नपुंसकलिङ्गं तु भवति, लोकाश्रयत्वाल्लिङ्गस्य॥

ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ॥ ६७ ॥

संपूर्णता पदार्थानां समाप्तिः। स्तोकेनासंपूर्णता ईषदसमाप्तिः। प्रकृत्यर्थविशेषणं चैतत्। ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् कल्पब् देश्य देशीयर् इत्येते प्रत्यया भवन्ति। ईषदसमाप्तः पटुः पटुकल्पः। पटुदेश्यः। पटुदेशीयः। मृदुकल्पः। मृदुदेश्यः। मृदुदेशीयः। तिङश्चेत्येव—पचतिकल्पम्। जल्पतिकल्पम्॥

---

१ - ' अपहरेत् ' इति बाल०।

विभाषा सुपो बहुच् पुरस्तात्तु ॥ ६८ ॥

ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात् सुबन्ताद् विभाषा बहुच् प्रत्ययो भवति, स तु पुरस्तादेव भवति न परतः। चित्करणमन्तोदात्तार्थम्। ईषदसमाप्तः पटुः बहुपटुः। बहुमृदुः। बहुगुडो द्राक्षा। विभाषावचनात् कल्पबादयोऽपि भवन्ति। सुबग्रहणं तिङन्ताद् मा भूदिति॥

प्रकारवचने जातीयर् ॥ ६९ ॥

सामान्यस्य भेदको विशेषः प्रकारः, तस्य वचने। प्रकृत्यर्थविशेषणं चैतत्। सुबन्तात् प्रकारविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे जातीयर् प्रत्ययो भवति। प्रकारवति चायं प्रत्ययः। थाल् पुनः प्रकारमात्र एव भवति। पटुप्रकारः पटुजातीयः। मृदुजातीयः। दर्शनीयजातीयः॥

प्रागिवात् कः ॥ ७० ॥

'इवे प्रतिकृतौ' (५.३.९६) इति वक्ष्यति। प्रागेतस्मादिवसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्यामः, कप्रत्ययस्तेष्वधिकृतो वेदितव्यः। वक्ष्यति—'अज्ञाते' (५.३.७३) इति। अश्वकः। गर्दभकः। तिङन्तादयं प्रत्ययो नेष्यते, अकजिष्यते। 'तिङश्च' (५.३.५६) इत्यनुवृत्तमुत्तरसूत्रेणैव संबन्धनीयम्॥

अव्ययसर्वनाम्नामकच् प्राक् टेः ॥ ७१ ॥

'तिङश्च' (५.३.५६) इत्येव। अव्ययानां सर्वनाम्नां च प्रागिवीयेष्वर्थेष्वकच् प्रत्ययो भवति, स च प्राक् टेः, न परतः। कस्यापवादः। उच्चकैः। नीचकैः। शनकैः। सर्वनाम्नः खल्वपि—सर्वके। विश्वके। उभयके। प्रातिपदिकात् सुप इति द्वयमपीहानुवर्तते। तत्राभिधानतो व्यवस्था भवति। क्वचित् प्रातिपदिकस्य प्राक् टेः प्रत्ययो भवति, क्वचित् सुबन्तस्य। युष्मकाभिः, अस्मकाभिः, युष्मकासु, अस्मकासु, युवकयोः, आवकयोरित्यत्र प्रातिपदिकस्य। त्वयका, मयका, त्वयकि, मयकीत्यत्र सुबन्तस्य॥ अकच्प्रकरणे तूष्णीमः कामुञ् प्रत्ययो वक्तव्यः॥ स च मित्त्वादन्त्यादचः परो भवति। तूष्णीकामास्ते। तूष्णीकां तिष्ठति॥ शीले को मलोपश्च वक्तव्यः॥ तूष्णींशीलः, तूष्णीकः। 'तिङश्च' (५.३.५६) इति प्रकृतमत्र संबध्यते। पचतकि। जल्पतकि॥

---

१ - 'च' इति बाल०।

कस्य च दः ॥ ७२ ॥

ककारान्तस्य प्रातिपदिकस्याकच्सन्नियोगेन दकारादेशो भवति। चकारः सन्नियोगार्थः। सामर्थ्याच्चाव्ययग्रहणमनुवर्तते, न सर्वनामग्रहणम्, ककारान्तस्य सर्वनाम्नोऽसंभवात्। धिक्—धकित्। हिरुक्—हिरकुत्। पृथक्—पृथकत्॥

अज्ञाते ॥ ७३ ॥

अज्ञातविशेषोऽज्ञातः। अज्ञातत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् तिङन्तात् च स्वार्थे यथाविहितं प्रत्ययो भवति। स्वेन रूपेण ज्ञाते पदार्थे विशेषरूपेणाज्ञाते प्रत्ययविधानमेतत्। कस्यायमश्व इति स्वस्वामिसंबन्धेनाज्ञातेऽश्वे प्रत्ययः, अश्वकः। गर्दभकः। उष्ट्रकः। एवमन्यत्रापि यथायोगमज्ञातता विज्ञेया। उच्चकैः। नीचकैः। सर्वके। विश्वके। पचतकि। जल्पतकि॥

कुत्सिते ॥ ७४ ॥

कुत्सितो गर्हितो निन्दितः। प्रकृत्यर्थविशेषणं चैतत्। कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् स्वार्थे यथाविहितं प्रत्ययो भवति। कुत्सितोऽश्वः अश्वकः। उष्ट्रकः। गर्दभकः। उच्चकैः। नीचकैः। सर्वके। विश्वके। पचतकि। जल्पतकि॥

संज्ञायां कन् ॥ ७५ ॥

कुत्सित इत्येव। कुत्सितत्वोपाधिकेऽर्थे वर्तमानात् प्रातिपदिकात् कन् प्रत्ययो भवति, कस्यापवादः, प्रत्ययान्तेन चेत् संज्ञा गम्यते। शूद्रकः। धारकः। पूर्णकः॥

अनुकम्पायाम् ॥ ७६ ॥

कारुण्येनाभ्युपपत्तिः परस्यानुकम्पा। तस्यां गम्यमानायां सुबन्तात् तिङन्तात् च यथाविहितं प्रत्ययो भवति। पुत्रकः। वत्सकः। दुर्बलकः। बुभुक्षितकः। स्वपितकि। श्वसितकि॥

नीतौ च तद्युक्तात् ॥ ७७ ॥

सामदानादिरुपायो नीतिः। नीतौ च गम्यमानायां तद्युक्तादनुकम्पायुक्ताद् यथाविहितं प्रत्ययो भवति। हन्त ते धानकाः। हन्त ते तिलकाः। एहकि। अद्धकि। अनुकम्पमानो दानेनाराधयति। पूर्वेण प्रत्यासन्नानुकम्पासंबन्धादनुकम्प्यमानादेव प्रत्ययो विहितः। सम्प्रति

१ – 'परस्यानुकम्पामात्रोपादानेनाराधयति' इति है०।

व्यवहितादपि यथा स्यादिति वचनम्॥

बह्वचो मनुष्यनाम्नष्ठञ् वा ॥ ७८ ॥

अनुकम्पायाम्, नीतौ च तद्युक्तादिति वर्तते। बह्वचः प्रातिपदिकाद् मनुष्यनामधेयाद् वा ठच् प्रत्ययो भवत्यनुकम्पायां गम्यमानायां नीतौ च। देविकः, देवदत्तकः। यज्ञिकः, यज्ञदत्तकः। बह्वच इति किम् ? दत्तकः। गुप्तकः। मनुष्यनाम्न इति किम् ? मद्रबाहुकः। भद्रबाहुकः॥

घनिलचौ च ॥ ७९ ॥

अनुकम्पायामित्यादि सर्वमनुवर्तते। पूर्वेण ठचि विकल्पेन प्राप्ते वचनम्। बह्वचो मनुष्यनाम्नो घन् इलच् इत्येतौ प्रत्ययौ भवतः, चकारादु यथाप्राप्तं च। देवियः। देविलः। देविकः। देवदत्तकः। यज्ञियः। यज्ञिलः। यज्ञिकः। यज्ञदत्तकः॥

प्राचामुपादेरडज्वुचौ च ॥ ८० ॥

पूर्ववत् सर्वमनुवर्तते। उपशब्द आदिर्यस्य तस्मादुपादेः प्रातिपदिकाद् बह्वचो मनुष्यनाम्नोऽडज्वुच्प्रत्ययौ भवतः। चकारादु घनिलचौ प्रत्ययौ भवतः, ठच् च वा। उपडः। उपकः। उपियः। उपिलः। उपिकः। उपेन्द्रदत्तकः। प्राचांग्रहणं पूजार्थम्। वेत्येव हि वर्तते॥

जातिनाम्नः कन् ॥ ८१ ॥

बह्वच इति नानुवर्तते। सामान्येन विधानम्। जातिशब्दो यो मनुष्यनामधेयो व्याघ्र सिंह इत्येवमादिः, तस्मादनुकम्पायां नीतौ च कन् प्रत्ययो भवति। व्याघ्रकः। सिंहकः। शरभकः। वावचनानुवृत्तेर्यथादर्शनमन्योऽपि भवति। व्याघ्रिलः। सिंहिलः। नामग्रहणं स्वरूपनिवृत्त्यर्थम्॥

अजिनान्तस्योत्तरपदलोपश्च ॥ ८२ ॥

कनित्यनुवर्तते, मनुष्यनाम्न इति च। अजिनशब्दान्तात् प्रातिपदिकाद् मनुष्य-नाम्नोऽनुकम्पायां कन् प्रत्ययो भवति, तस्य चोत्तरपदलोपः। व्याघ्राजिनो नाम कश्चिद् मनुष्यः, सोऽनुकम्पितो व्याघ्रकः। सिंहकः॥

ठाजादावूर्ध्वं द्वितीयादचः ॥ ८३ ॥

लोप इत्यनुवर्तते। अस्मिन् प्रकरणे यष्ठोऽजादिश्च प्रत्ययः, तस्मिन् परतः प्रकृतेर्द्वितीयादच ऊर्ध्वं यच्छब्दरूपं तस्य लोपो भवति। ऊर्ध्वग्रहणं सर्वलोपार्थम्। अनुकम्पितो देवदत्तो देविकः। देवियः। देविलः। यज्ञिकः। यज्ञियः। यज्ञिलः। उपडः। उपकः। उपियः। उपिलः। उपिकः। उपेन्द्रदत्तकः। ठग्रहणमुको द्वितीयत्वे कविधानार्थम्। अजादिलक्षणे हि माथितिकादिवत् प्रसङ्गः। वायुदत्तो वायुकः। पितृदत्तः पितृकः॥ **चतुर्थादच ऊर्ध्वस्य लोपो वक्तव्यः॥** अनुकम्पितो बृहस्पतिदत्तो बृहस्पतिकः। बृहस्पतियः। बृहस्पतिलः ॥ **अनजादौ विभाषा लोपो वक्तव्यः॥** देवदत्तकः, देवकः। यज्ञदत्तकः, यज्ञकः॥ **लोपः पूर्वपदस्य च ठाजादावनजादौ च वक्तव्यः॥** दत्तिकः। दत्तिलः। दत्तियः। दत्तकः ॥ **विनापि प्रत्ययेन पूर्वोत्तरपदयोर्विभाषा लोपो वक्तव्यः॥** देवदत्तो दत्तः, देव इति वा॥ **उवर्णाल् ल इलस्य च॥** भानुदत्तो भानुलः। वसुदत्तो वसुलः।

चतुर्थादनजादौ च लोपः पूर्वपदस्य च।
अप्रत्यये तथैवेष्ट उवर्णाल्ल इलस्य च॥

॥ **द्वितीयादचो लोपे सन्ध्यक्षरद्वितीयत्वे तदादेर्लोपवचनम्॥** लहोडो लहिकः। कहोडः कहिकः॥ **एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः॥** वागाशीर्वाचिकः। स्रुचिकः। त्वचिकः। कथं षडङ्गुलिदत्तः षडिक इति ? ॥ **षषष्ठाजादिवचनात् सिद्धम्॥**

शेवलसुपरिविशालवरुणार्यमादीनां तृतीयात् ॥ ८४ ॥

शेवलादीनां मनुष्यनाम्नां ठाजादौ प्रत्यये परतः तृतीयादच ऊर्ध्वस्य लोपो भवति। पूर्वस्यायमपवादः। अनुकम्पितः शेवलदत्तः शेवलिकः। शेवलियः। शेवलिलः। सुपरिकः। सुपरियः। सुपरिलः। विशालिकः। विशालियः। विशालिलः। वरुणिकः। वरुणियः। वरुणिलः। अर्यमिकः। अर्यमियः। अर्यमिलः॥ **शेवलादीनां तृतीयादचो लोपः स चाकृतसन्धीनामिति वक्तव्यम्॥** शेवलेन्द्रदत्तः, सुपर्याशीर्दत्तः, शेवलिकः, सुपरिक इति यथा स्यात्। शेवलयिकः, सुपर्यिक इति मा भूत्॥

अल्पे ॥ ८५ ॥

परिमाणापचयेऽल्पशब्दः। प्रकृतिविशेषणं चैतत्। अल्पत्वविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकाद् यथाविहितं प्रत्ययो भवति। अल्पं तैलं तैलकम्। घृतकम्। सर्वकम्। विश्वकम्। उच्चकैः। नीचकैः। पचतकि। जल्पतकि॥

---

१ - 'उपियः। उपिलः। उपिकः' इति नास्ति बाल०। 'उपेन्द्रदत्तकः' इति नास्ति है०।

ह्रस्वे ॥ ८६ ॥

ह्रस्वत्वविशिष्टेऽर्थे वर्तमानात् प्रातिपदिकाद् यथाविहितं प्रत्ययो भवति। दीर्घप्रतियोगी ह्रस्वः। ह्रस्वो वृक्षो वृक्षकः। प्लक्षकः। स्तम्भकः॥

संज्ञायां कन् ॥ ८७ ॥

ह्रस्व इत्येव। ह्रस्वत्वहेतुका या संज्ञा तस्यां गम्यमानायां कन् प्रत्ययो भवति। पूर्वस्यायमपवादः। वंशकः। वेणुकः। दण्डकः॥

कुटीशमीशुण्डाभ्यो रः ॥ ८८ ॥

ह्रस्व इत्येव। संज्ञाग्रहणं नानुवर्तते, सामान्येन विधानम्। कुटीशमीशुण्डाभ्यो ह्रस्वार्थे द्योत्ये रः प्रत्ययो भवति। कस्यापवादः। ह्रस्वा कुटी कुटीरः। शमीरः। शुण्डारः। स्वार्थिकत्वेऽपि पुँल्लिङ्गता, लोकाश्रयत्वाल् लिङ्गस्य॥

कुत्वा डुपच् ॥ ८९ ॥

ह्रस्व इत्येव। कुतूशब्दाद् ह्रस्वत्वे द्योत्ये डुपच् प्रत्ययो भवति। कस्यापवादः। ह्रस्वा कुतूः कुतुपम्। चर्ममयं स्नेहभाजनमुच्यते। कुतूरित्यावपनस्याख्या॥

कासूगोणीभ्यां ष्टरच् ॥ ९० ॥

ह्रस्व इत्येव। कासूगोणीशब्दाभ्यां ह्रस्वत्वे द्योत्ये ष्टरच् प्रत्ययो भवति। कस्यापवादः। षकारो ङीषर्थः। ह्रस्वा कासूः कासूतरी। गोणीतरी। कासूरिति शक्तिरायुधविशेष उच्यते॥

वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे ॥ ९१ ॥

ह्रस्व इति निवृत्तम्। वत्स उक्षन् अश्व ऋषभ इत्येतेभ्यस्तनुत्वे द्योत्ये ष्टरच् प्रत्ययो भवति। यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशः, तस्य तनुत्वे प्रत्ययः। वत्सतरः। उक्षतरः। अश्वतरः। ऋषभतरः। प्रथमवया वत्सः, तस्य तनुत्वं द्वितीयवयःप्राप्तिः। तरुण उक्षा, तस्य तनुत्वं तृतीयवयःप्राप्तिः। अश्वेनाश्वायामुत्पन्नोऽश्वः, तस्य तनुत्वमन्यपितृकता। अनड्वानृषभः, तस्य तनुत्वं भारवहने मन्दशक्तिता॥

किंयत्तदो निर्धारणे द्वयोरेकस्य डतरच् ॥ ९२ ॥

किं यत् तद् इत्येतेभ्यः प्रातिपदिकेभ्यो द्वयोरेकस्य निर्धारणे डतरच् प्रत्ययो भवति।

निर्धार्यमाणवाचिभ्यः स्वार्थे प्रत्ययः। जात्या क्रियया गुणेन संज्ञया वा समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। कतरो भवतोः कठः। कतरो भवतोः कारकः। कतरो भवतोः पटुः। कतरो भवतोर्देवदत्तः। यतरो भवतोः कारकः। यतरो भवतोः पटुः। यतरो भवतोर्देवदत्तः, ततर आगच्छतु। महाविभाषया चात्र प्रत्ययो विकल्प्यते। को भवतो- र्देवदत्तः, स आगच्छतु। निर्धारण इति विषयसप्तमीनिर्देशः। द्वयोरिति समुदायाद् निर्धारणविभक्तिः। एकस्येति निर्धार्यमाणनिर्देशः॥

वा बहूनां जातिपरिप्रश्ने डतमच् ॥ ९३ ॥

किंयत्तद इति वर्तते, निर्धारणे, एकस्येति च। बहूनामिति निर्धारणे षष्ठी। बहूनां मध्य एकस्य निर्धारणे गम्यमाने जातिपरिप्रश्नविषयेभ्यः किमादिभ्यो वा डतमच् प्रत्ययो भवति। कतमो भवतां कठः। यतमो भवतां कठः, ततम आगच्छतु। वावचनमकजर्थम्। यको भवतां कठः, सक आगच्छतु। महाविभाषा च प्रत्ययविकल्पार्थानुवर्तत एव। को भवतां कठः। यो भवतां कठः, स आगच्छतु। जातिपरिप्रश्न इति किम् ? को भवतां देवदत्तः। परिप्रश्नग्रहणं च किम एव विशेषणम्, न यत्तदोरसंभवात्। जातिग्रहणं तु सर्वैरेव संबध्यते। किमोऽस्मिन् विषये डतरमपीच्छन्ति केचित्। कतरो भवतां कठः। कतरो भवतां कालाप इति। तत्र 'कतरकतमौ जातिपरिप्रश्ने' (२.१.६३) इति वचनात् सिद्धम्॥

एकाच्च प्राचाम् ॥ ९४ ॥

एकशब्दात् प्राचामाचार्याणां मतेन डतरच् डतमच् इत्येतौ प्रत्ययौ भवतः स्वस्मिन् विषये। चकारो डतरचोऽनुकर्षणार्थः। द्वयोर्निर्धारणे डतरच्, बहूनां निर्धारणे डतमच्। जातिपरिप्रश्न इति नानुवर्तते। सामान्येन विधानम्। एकतरो भवतोर्देवदत्तः। एकतमो भवतां देवदत्तः। प्राचांग्रहणं पूजार्थम् , विकल्पोऽनुवर्तत एव॥

अवक्षेपणे कन् ॥ ९५ ॥

अवक्षिप्यते येन तदवक्षेपणम्। तस्मिन् वर्तमानात् प्रातिपदिकात् कन् प्रत्ययो भवति। व्याकरणकेन नाम त्वं गर्वितः। याज्ञिक्यकेन नाम त्वं गर्वितः। परस्य कुत्सार्थं यदुपादीयते, तदिहोदाहरणम्। यत् पुनः स्वयमेव कुत्सितम् , तत्र 'कुत्सिते' (५.३.७४) इत्यनेन कन् प्रत्ययो भवति—देवदत्तकः, यज्ञदत्तक इति। प्रागिवीयस्य पूर्णोऽवधिः॥

---

१ - ' जात्या ' इति नास्ति क्वचित् , द्र० पद०। २ - ' यतरो भवतोः कठः ' इत्यप्यत्र स्यात् ।
३ - ' निर्देशः ' इत्यधिकं मुद्रितेषु। न्यासे नास्ति। ४ - ' कतरो भवतां कठः ' इति नास्ति है०।

इवे प्रतिकृतौ ॥ ९६ ॥

कनित्यनुवर्तते। इवार्थे यत् प्रातिपदिकं वर्तते, तस्मात् कन् प्रत्ययो भवति। इवार्थः सादृश्यम्, तस्य विशेषणं प्रतिकृतिग्रहणम्। प्रतिकृतिः प्रतिरूपकं प्रतिच्छन्दकम्। अश्व इवायमश्वप्रतिकृतिरश्वकः। उष्ट्रकः। गर्दभकः। प्रतिकृताविति किम् ? गौरिव गवयः॥

संज्ञायां च ॥ ९७ ॥

इवेत्यनुवर्तते, कनिति च। इवार्थे गम्यमाने कन् प्रत्ययो भवति, समुदायेन चेत् संज्ञा गम्यते। अप्रतिकृत्यर्थ आरम्भः। अश्वसदृशस्य संज्ञा अश्वकः। उष्ट्रकः। गर्दभकः॥

लुम्मनुष्ये ॥ ९८ ॥

संज्ञायामित्येव। संज्ञायां विहितस्य कनो मनुष्येऽभिधेये लुब् भवति। चञ्चेव मनुष्यः चञ्चा। दासी। खरकुटी। मनुष्य इति किम् ? अश्वकः। उष्ट्रकः। गर्दभकः। देवपथादेराकृतिगणत्वात् तस्यैवायं प्रपञ्चो वेदितव्यः॥

जीविकार्थे चापण्ये ॥ ९९ ॥

जीविकार्थं यदपण्यं तस्मिन्नभिधेये कनो लुब् भवति। विक्रीयते यत् तत् पण्यम्। वासुदेवः। शिवः। स्कन्दः। विष्णुः। आदित्यः। देवलकादीनां जीविकार्था देवप्रतिकृतय उच्यन्ते। अपण्य इति किम् ? हस्तिकान् विक्रीणीते। अश्वकान्। रथकान्। देवपथादेरेवायं प्रपञ्चः॥

देवपथादिभ्यश्च ॥ १०० ॥

'इवे प्रतिकृतौ' (५.३.९६) 'संज्ञायां च' (५.३.९७) विहितस्य कनो देवपथादिभ्य उत्तरस्य लुब् भवति। आदिशब्दः प्रकारे। आकृतिगणश्चायम्। देवपथः। हंसपथः।

अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च।
इवे प्रतिकृतौ लोपः कनो देवपथादिषु॥

अर्चासु तावत्—शिवः। विष्णुः। चित्रकर्मणि—अर्जुनः। दुर्योधनः। ध्वजेषु—कपिः। गरुडः। सिंहः॥ देवपथ। हंसपथ। वारिपथ। जलपथ। राजपथ। शतपथ। सिंहगति। उष्ट्रग्रीवा। चामरज्जु। रज्जु। हस्त। इन्द्र। दण्ड। पुष्प। मत्स्य॥

वस्तेर्ढञ् ॥ १०१ ॥

इवेत्यनुवर्तते। इतः प्रभृति प्रत्यया सामान्येन भवन्ति, प्रतिकृतौ चाप्रतिकृतौ च। वस्तिशब्दादिवार्थे द्योत्ये ढञ् प्रत्ययो भवति। वस्तिरिव वास्तेयः। वास्तेयी॥

शिलाया ढः ॥ १०२ ॥

शिलाशब्दादिवार्थे ढः प्रत्ययो भवति। शिलेव शिलेयं दधि। केचिदत्र ढञमपीच्छन्ति, तदर्थं योगविभागः कर्तव्यः। शिलाया ढञ् प्रत्ययो भवति। शैलेयम्। ततो ढः। शिलेयम्॥

शाखादिभ्यो यत् ॥ १०३ ॥

शाखा इत्येवमादिभ्यः प्रातिपदिकेभ्यो यत् प्रत्ययो भवति इवार्थे। शाखेव शाख्यः। मुख्यः। जघन्यः॥ शाखा। मुख। जघन। शृङ्ग। मेघ। चरण। स्कन्ध। शिरस्। उरस्। अग्र। शरण। शाखादिः॥

द्रव्यं च भव्ये ॥ १०४ ॥

द्रव्यशब्दो निपात्यते भव्येऽभिधेये। द्रुशब्दादिवार्थे यत् प्रत्ययो निपात्यते। द्रव्यं भव्यः, आत्मवान्, अभिप्रेतानामर्थानां पात्रभूत उच्यते। द्रव्योऽयं राजपुत्रः। द्रव्योऽयं माणवकः॥

कुशाग्राच्छः ॥ १०५ ॥

कुशाग्रशब्दादिवार्थे छः प्रत्ययो भवति। कुशाग्रमिव सूक्ष्मत्वात् कुशाग्रीया बुद्धिः। कुशाग्रीयं शस्त्रम्॥

समासाच्च तद्विषयात् ॥ १०६ ॥

तदित्यनेन प्रकृत इवार्थो निर्दिश्यते। इवार्थविषयात् समासादपरस्मिन्निवार्थ एव छः प्रत्ययो भवति। काकतालीयम्। अजाकृपाणीयम्। अन्धकवर्तकीयम्। अतर्कितोपनतं चित्रीकरणमुच्यते। तत्कथम्? काकस्यागमनं यादृच्छिकम्, तालस्य पतनं च। तेन तालेन पतता काकस्य वधः कृतः। एवमेव देवदत्तस्य तत्रागमनम्, दस्यूनां चोपनिपातः। तैश्च तस्य वधः कृतः। तत्र यो देवदत्तस्य दस्यूनां च समागमः स काकतालसमागमसदृश इत्येक उपमार्थः। अतश्च देवदत्तस्य वधः, स काकतालवधसदृश इति द्वितीय

उपमार्थः। तत्र प्रथमे समासः, द्वितीये प्रत्ययः। समासश्चायमस्मादेव ज्ञापकात्, नह्यस्यापरं लक्षणमस्ति। सुप्सुपेति वा समासः। स चैवंविषय एव॥

शर्करादिभ्योऽण् ॥ १०७ ॥

शर्करा इत्येवमादिभ्यः प्रातिपदिकेभ्य इवार्थेऽण् प्रत्ययो भवति। शकरेव शार्करम्। कापालिकम्॥ शर्करा। कपालिका। पिष्टिक। पुण्डरीक। शतपत्र। गोलोमन्। गोपुच्छ। नरालि। नकुला। सिकता। शर्करादिः॥

अङ्गुल्यादिभ्यष्ठक् ॥ १०८ ॥

अङ्गुल्यादिभ्य इवार्थे ठक् प्रत्ययो भवति। अङ्गुलीवाङ्गुलिकः। भारुजिकः॥ अङ्गुलि। भरुज। बभ्रु। वल्गु। मण्डर। मण्डल। शष्कुल। कपि। उदश्वित्। गोणी। उरस्। शिखर। कुलिश। अङ्गुल्यादिः॥

एकशालायाष्ठजन्यतरस्याम् ॥ १०९ ॥

एकशालाशब्दादिवार्थेऽन्यतरस्यां ठच् प्रत्ययो भवति। अन्यतरस्यांग्रहणेनानन्तर-ष्ठक् प्राप्यते। एकशालेव एकशालिकः, ऐकशालिकः॥

कर्कलोहितादीकक् ॥ ११०॥

कर्कलोहितशब्दाभ्यामिवार्थ ईकक् प्रत्ययो भवति। कर्कः शुक्लोऽश्वः, तेन सदृशः कार्कीकः। लौहितीकः स्फटिकः। स्वयमलोहितोऽप्युपाश्रयवशात् तथा प्रतीयते॥

प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ॥ १११ ॥

प्रत्न पूर्व विश्व इम इत्येतेभ्य इवार्थे थाल् प्रत्ययो भवति छन्दसि विषये। तं प्र॒त्नथा॑ पू॒र्वथा॑ वि॒श्वथे॒मथा॑ (ऋ० ५.४४.१)॥

पूगाञ्ञ्योऽग्रामणीपूर्वात् ॥ ११२ ॥

इवार्थ इति निवृत्तम्। नानाजातीया अनियतवृत्तयोऽर्थकामप्रधानाः संघाः पूगाः। पूगवाचिनः प्रातिपदिकादग्रामणीपूर्वात् स्वार्थे ञ्यः प्रत्ययो भवति। लौहध्वज्यः, लौहध्वज्यौ, लोहध्वजाः। शैब्यः, शैब्यौ, शिबयः। चातक्यः, चातक्यौ, चातकाः। अग्रामणी-पूर्वादिति किम् ? देवदत्तो ग्रामणीरेषां त इमे देवदत्तकाः। यज्ञदत्तकाः॥

व्रातच्फञोरस्त्रियाम् ॥ ११३ ॥

नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः। व्रातवाचिभ्यः प्रातिपदिकेभ्यः च्फञन्तेभ्यः च स्वार्थे ञ्यः प्रत्ययो भवत्यस्त्रियाम्। कापोतपाक्यः, कापोतपाक्यौ, कपोतपाकाः। व्रैहिमत्यः, व्रैहिमत्यौ, व्रीहिमन्तः। च्फञः खल्वपि—कौञ्जायन्यः, कौञ्जायन्यौ, कौञ्जायनाः। ब्राध्नायन्यः, ब्राध्नायन्यौ, ब्राध्नायनाः। अस्त्रियामिति किम्? कपोतपाकी। व्रीहिमती। कौञ्जायनी। ब्राध्नायनी॥

आयुधजीविसंघाञ्ञ्यङ् वाहीकेष्वब्राह्मणराजन्यात् ॥ ११४ ॥

आयुधजीविनां संघ आयुधजीविसंघः। स वाहीकैर्विशेष्यते। वाहीकेषु य आयुध- जीविसंघः, तद्वाचिनः प्रातिपदिकाद् ब्राह्मणराजन्यवर्जितात् स्वार्थे ञ्यट् प्रत्ययो भवति। ब्राह्मणे तद्विशेषग्रहणम्। राजन्ये तु स्वरूपग्रहणमेव। टकारो ङीबर्थः। तेनास्त्रियामिति नानुवर्तते। कौण्डीबृस्यः, कौण्डीबृस्यौ, कौण्डीबृसाः। क्षौद्रक्यः, क्षौद्रक्यौ, क्षुद्रकाः। मालव्यः, मालव्यौ, मालवाः। स्त्रियाम्—कौण्डीबृसी। क्षौद्रकी। मालवी। आयुधजीविग्रहणं किम् ? मल्लाः। शयण्डाः। संघग्रहणं किम् ? सम्राट्। वाहीकेष्विति किम् ? शबराः।पुलिन्दाः। अब्राह्मणराजन्यादिति किम् ? गोपालवा ब्राह्मणाः। शालङ्कायना राजन्याः॥

वृकाट् टेण्यण् ॥ ११५ ॥

आयुधजीविसंघादिति वर्तते। वृकशब्दादायुधजीविनः स्वार्थे टेण्यण् प्रत्ययो भवति। टकारो ङीबर्थः, णकारो वृद्ध्यर्थः। वार्केण्यः, वार्केण्यौ, वृकाः। आयुधजीविसंघविशेषणं जातिशब्दाद् मा भूत्—कामक्रोधौ मनुष्याणां खादितारौ वृकाविव॥

दामन्यादित्रिगर्तषष्ठाच्छः ॥ ११६ ॥

आयुधजीविसंघादिति वर्तते। दामन्यादिभ्यः प्रातिपदिकेभ्यः त्रिगर्तषष्ठेभ्यश्चायुधजीविसंघवाचिभ्यः स्वार्थे छः प्रत्ययो भवति। येषामायुधजीविनां संघानां षडन्तर्वर्गास्तत्र च त्रिगर्तः षष्ठः। त्रिगर्तः षष्ठो येषाम्, ते त्रिगर्तषष्ठा इत्युच्यन्ते। तेषु चेयं स्मृतिः —

आहुस्त्रिगर्तषष्ठांस्तु कौण्डोपरथदाण्डकी।
क्रौष्टकिर्जालमानिश्च ब्राह्मगुप्तोऽथ जानकिः॥

---

१ - 'च्फञन्तेभ्यः' इति नास्ति मुद्रितेषु। २ - 'तेषां' इति है०।

इति । दामन्यादिभ्यस्तावत्—दामनीयः, दामनीयौ, दामनयः। औलपीयः, औलपीयौ, औलपयः। त्रिगर्तषष्ठेभ्यः खल्वपि—कौण्डोपरथीयः, कौण्डोपरथीयौ, कौण्डोपरथाः। दाण्डकीयः, दाण्डकीयौ, दाण्डकयः। क्रौष्टकीयः। जालमानीयः। ब्राह्मगुप्तीयः। जानकीयः॥ दामनी। औलपि। आकिदन्ती। काकरन्ति। काकदन्ति। शत्रुन्तपि। सार्वसेनि। बिन्दु। मौञ्जायन। उलभ। सावित्रीपुत्र। दामन्यादिः॥

पश्वादियौधेयादिभ्यामणञौ ॥ ११७ ॥

आयुधजीविसंघादित्येव। पश्वादिभ्यो यौधेयादिभ्यश्च प्रातिपदिकेभ्य आयुधजीविसंघवाचिभ्यः स्वार्थेऽणञौ प्रत्ययौ भवतः। पार्शवः, पार्शवौ, पर्शवः। आसुरः, आसुरौ, असुराः। यौधेयः। शौक्रेयः॥ पर्शु। असुर। रक्षस्। बाह्लीक। वयस्। मरुत्। दशार्ह। पिशाच। विशाल। अशनि। कार्षापण। सत्वत्। वसु। पश्वादिः॥ यौधेय। कौशेय। क्रौशेय। शौक्रेय। शौभ्रेय। धार्तेय। वार्तेय। जाबालेय। त्रिगर्त। भरत। उशीनर। यौधेयादिः॥

अभिजिद्विदभृच्छालावच्छिखावच्छमीवदूर्णावच्छ्रमदणो यञ् ॥ ११८॥

आयुधजीविसंघादिति निवृत्तम्। अभिजिदादिभ्योऽणन्तेभ्यः प्रातिपदिकेभ्यः स्वार्थे यञ् प्रत्ययो भवति। अभिजितोऽपत्यमित्यण्। तदन्ताद् यञ्। आभिजित्यः, आभिजित्यौ, आभिजिताः। वैदभृत्यः, वैदभृत्यौ, वैदभृताः। शालावत्यः, शालावत्यौ, शालावताः। शैखावत्यः। शामीवत्यः। और्णावत्यः। श्रौमत्यः। गोत्रप्रत्ययस्यात्राणो ग्रहणमिष्यते। आभिजितो मुहूर्तः, आभिजितः स्थालीपाक इत्यत्र न भवति॥

ञ्यादयस्तद्राजाः ॥ ११९ ॥

'पूगाञ्ञ्योऽग्रामणीपूर्वात्' (५.३.११२) इत्यतः प्रभृति ये प्रत्ययाः, ते तद्राजसंज्ञा भवन्ति। तथा चैवोदाहृतम्। तद्राजप्रदेशाः—'तद्राजस्य बहुषु०' (२.४.६२) इत्येवमादयः॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ पञ्चमाध्यायस्य तृतीयः पादः॥



---

१ – 'उलपयः' इति मुद्रितेषु।

॥ पञ्चमाध्यायस्य चतुर्थः पादः ॥

पादशतस्य संख्यादेर्वीप्सायां वुन् लोपश्च ॥ १ ॥

पादशतान्तस्य संख्यादेः प्रातिपदिकस्य वीप्सायां द्योत्यायां वुन् प्रत्ययो भवति, तत्सन्नियोगेन चान्तस्य लोपो भवति। यस्येति-(६.४.१४८)-लोपेनैव सिद्धे पुनर्वचनम-नैमित्तिकार्थम्। यस्येतिलोपः परनिमित्तकः। तस्य स्थानिवद्भावात् 'पादः पत्' (६.४. १३०) इति पद्भावो न स्यात्। अस्य त्वनैमित्तिकत्वाद् न स्थानिवत्त्वम्। द्वौद्वौ पादौ ददाति, द्विपदिकां ददाति। द्वेद्वे शते ददाति, द्विशतिकां ददाति। 'तद्धितार्थो०' (२.१.५१) इति समासः। ततः प्रत्ययः। स्वभावात् च वुन्प्रत्ययान्तं स्त्रियामेव वर्तते। पादशतस्येति किम् ? द्वौद्वौ माषौ ददाति। संख्यादेरिति किम् ? पादंपादं ददाति। वीप्सायामिति किम्? द्वौ पादौ ददाति। द्वे शते ददाति। पादशतग्रहणमनर्थकम्, अन्यत्रापि दर्शनात्। द्विमोदकिकां ददाति। त्रिमोदकिकां ददाति॥

दण्डव्यवसर्गयोश्च ॥ २ ॥

दमनं दण्डः। दानं व्यवसर्गः। दण्डव्यवसर्गयोर्गम्यमानयोः पादशतान्तस्य प्राति-पदिकस्य संख्यादेर्वुन् प्रत्ययो भवति, अन्तलोपश्च। अवीप्सार्थोऽयमारम्भः। द्वौ पादौ दण्डितो द्विपदिकां दण्डितः। द्वौ पादौ व्यवसृजति द्विपदिकां व्यवसृजति। द्विशतिकां दण्डितः। त्रिशतिकाम्। द्विशतिकां व्यवसृजति। त्रिशतिकाम्॥

स्थूलादिभ्यः प्रकारवचने कन् ॥ ३ ॥

स्थूलादिभ्यः प्रकारवचने द्योत्ये कन् प्रत्ययो भवति। जातीयरोऽपवादः। प्रकारो विशेषः। स्थूलप्रकारः स्थूलकः। अणुकः। माषकः॥ कन्प्रकरणे चञ्चद्बृहतोरुपसंख्यानम्॥ चञ्चत्प्रकारः चञ्चत्कः। बृहत्कः। चञ्चबृहयोरिति केचित् पठन्ति। तेषां चञ्चकः, बृहक इति उदाहरणं द्रष्टव्यम्॥ स्थूल। अणु। माष। इषु। कृष्ण तिलेषु (ग० सू० १४०)। यव व्रीहिषु (ग० सू० १४१)। पाद्यकालावदाताः सुरायाम् (ग० सू० १४२)। गोमूत्र आच्छादने (ग० सू० १४३)। सुरा अहौ (ग० सू० १४४)। जीर्ण शालिषु (ग० सू० १४५)। पत्रमूले समस्तव्यस्ते (ग० सू० १४६)। कुमारीपुत्र। कुमार। श्वशुर। मणि। स्थूलादिः॥

---

१ - ' इक्षुतिलपाद्य० ' इति बाल०। २ - ' सुराया ' इत्यपपाठो मुद्रितेषु ।

अनत्यन्तगतौ क्तात् ॥ ४ ॥

अत्यन्तगतिरशेषसंबन्धः, तदभावोऽनत्यन्तगतिः। अनत्यन्तगतौ गम्यमानायां क्तान्तात् कन् प्रत्ययो भवति। भिन्नकः। छिन्नकः। अनत्यन्तगताविति किम् ? भिन्नम्। छिन्नम्॥

न सामिवचने ॥ ५ ॥

सामिवचन उपपदे क्तान्तात् कन् प्रत्ययो न भवति। सामिकृतम्। सामिभुक्तम्। वचनग्रहणं पर्यायार्थम्। अर्धकृतम्। नेमकृतम्। सामिवचने प्रतिषेधानर्थक्यम् , प्रकृत्याभिहितत्वात्। एवं तर्हि नैवायमनत्यन्तगतौ विहितस्य कनः प्रतिषेधः। किं तर्हि ? स्वार्थिकस्य। केन पुनः स्वार्थिकः कन् विहितः ? एतदेव ज्ञापकम्—भवति स्वार्थे कन्निति। तत्र यदेतदुच्यते—'एवं हि सूत्रमभिन्नतरकं भवति' (महाभाष्य १.१७२), 'एतैर्हि बहुतरकं व्याप्यते' (महाभाष्य १.३५६) इत्येवमादि, तदुपपन्नं भवति॥

बृहत्या आच्छादने ॥ ६ ॥

कन्ननुवर्तते, न प्रतिषेधः। बृहतीशब्दादाच्छादने वर्तमानात् स्वार्थे कन् प्रत्ययो भवति। बृहतिका। आच्छादन इति किम् ? बृहती छन्दः॥

अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात् खः ॥ ७ ॥

अषडक्ष आशितङ्गु अलंकर्म अलंपुरुष इत्येतेभ्योऽध्युत्तरपदात् च स्वार्थे खः प्रत्ययो भवति। अविद्यमानानि षडक्षीण्यस्येति बहुव्रीहिः। 'बहुव्रीहौ सक्थ्यक्ष्णोः०' (५.४.११३) इति षच् , ततः खप्रत्ययः। अषडक्षीणो मन्त्रः। यो द्वाभ्यामेव क्रियते न बहुभिः। आशिता गावोऽस्मिन्नरण्य आशितंगवीनमरण्यम्। निपातनात् पूर्वपदस्य मुमागमः। अलंकर्मन्, अलंपुरुष इति 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' (वा० २.२.१८) इति समासः। अलं कर्मणे अलंकर्मीणः। अलं पुरुषाय अलंपुरुषीणः। अध्युत्तरपदस्तत्पुरुषः—अधिशब्दः शौण्डादिषु पठ्यते। राजाधीनः। नित्यश्चायं प्रत्ययः, उत्तरत्र विभाषाग्रहणात्। अन्येऽपि स्वार्थिका नित्याः प्रत्ययाः स्मर्यन्ते—तमबादयः (५.३.५५) प्राक् कनः (५.३.६४), ञ्यादयः (५.३.११२) प्राग् वुनः (५.४.१), आमादयः (५.४.११) प्राङ् मयटः (५.४.२१), बृहतीजात्यन्ताः (५.४.६,६) समासान्ताश्चेति॥

---

१ - ' अशेषेण संबन्धः ' इति बाल०।

विभाषाञ्चेरदिक्स्त्रियाम् ॥ ८ ॥

अञ्चत्यन्तात् प्रातिपदिकाददिक्स्त्रियां वर्तमानात् स्वार्थे विभाषा खः प्रत्ययो भवति। प्राक्, प्राचीनम्। अर्वाक्, अर्वाचीनम्। अदिक्स्त्रियामिति किम् ? प्राची दिक्। प्रतीची दिक्। दिग्ग्रहणं किम् ? प्राचीना ब्राह्मणी। अर्वाचीना शिखा। स्त्रीग्रहणं किम्? प्राचीनं दिग् रमणीयम्। उदीचीनं दिग् रमणीयम्॥

जात्यन्ताच्छ बन्धुनि ॥ ९ ॥

जात्यन्तात् प्रातिपदिकाद् बन्धुनि वर्तमानात् स्वार्थे छः प्रत्ययो भवति। बध्यतेऽ- स्मिन् जातिरिति बन्धुशब्देन द्रव्यमुच्यते। येन ब्राह्मणत्वादिजातिर्व्यज्यते तद् बन्धु द्रव्यम्। ब्राह्मणजातीयः, क्षत्रियजातीयः, वैश्यजातीय इति ब्राह्मणादिरेवोच्यते। बन्धुनीति किम्? ब्राह्मणजातिः शोभना॥

स्थानान्ताद् विभाषा सस्थानेनेति चेत् ॥ १० ॥

स्थानान्तात् प्रातिपदिकाद् विभाषा छः प्रत्ययो भवति, सस्थानेन चेत् स्थानान्त- मर्थवद् भवति। सस्थान इति तुल्य उच्यते, समानं स्थानमस्येति कृत्वा। पित्रा तुल्यः पितृस्थानीयः, पितृस्थानः। मातृस्थानीयः, मातृस्थानः। राजस्थानीयः, राजस्थानः। सस्थानेनेति किम् ? गोस्थानम्। अश्वस्थानम्। इतिकरणो विवक्षार्थः। तेन बहुव्रीहिः सस्थानशब्दार्थमुपस्थापयति, न तत्पुरुषः। चेच्छब्दः संबन्धार्थः। द्वयोर्विभाषयोर्मध्ये नित्या विधय इति पूर्वत्र नित्यः प्रत्ययः॥

किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ॥ ११ ॥

किम एकारान्तात् तिङन्तादव्ययेभ्यश्च यो विहितो घः स किमेत्तिङव्ययघः, तदन्तात् प्रातिपदिकादद्रव्यप्रकर्ष आमुप्रत्ययो भवति। यद्यपि द्रव्यस्य स्वतः प्रकर्षो नास्ति, तथापि क्रियागुणस्थः प्रकर्षो यदा द्रव्य उपचर्यते तदायं प्रतिषेधः। क्रियागुणयोरेवायं प्रकर्षे प्रत्ययः। किंतराम्। किंतमाम्। पूर्वाह्णेतराम्। पूर्वाह्णेतमाम्। पचतितराम्। पचतितमाम्। उच्चैस्तराम्। उच्चैस्तमाम्। अद्रव्यप्रकर्ष इति किम् ? उच्चैस्तरः। उच्चैस्तमः॥

अमु चच्छन्दसि ॥ १२ ॥

किमेत्तिङव्ययघादद्रव्यप्रकर्षेऽमुप्रत्ययो भवति छन्दसि विषये। चकारादामु च।

---

१ - 'नित्यविधयः' इति मुद्रितः पाठः।

प्रत॑रं न॒ आयु॑: (ऋ० ४.१२.६)। प्र॑तं॒रां नय (मा० सं० १७.५१)। स्वरादिषु अम् आम् इति पठ्यते। तस्मात् तदन्तस्याव्ययत्वम्॥

अनुगादिनष्ठक् ॥ १३ ॥

अनुगदतीत्यनुगादी। अनुगादिन्शब्दात् स्वार्थे ठक् प्रत्ययो भवति। आनुगादिकः॥

णचः स्त्रियामञ् ॥ १४ ॥

'कर्मव्यतिहारे णच् स्त्रियाम्' (३.३.४३) इति णज् विहितः, तदन्तात् स्वार्थेऽञ् प्रत्ययो भवति स्त्रियां विषये। व्यावक्रोशी। व्यावहासी वर्तते। स्त्रीग्रहणं किमर्थं यावता णच् स्त्रियामेव विहितः, ततः स्वार्थिकस्तत्रैव भविष्यति ? एवं तर्ह्येतज् ज्ञापयति—'स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि' (परि० ८३) इति। तेन गुडकल्पा द्राक्षा, तैलकल्पा प्रसन्ना, देव एव देवतेत्येवमादि उपपन्नं भवति॥

अणिनुणः ॥ १५ ॥

'अभिविधौ भाव इनुण्' (३.३.४४) विहितः, तदन्तात् स्वार्थेऽण् प्रत्ययो भवति। सांराविणं वर्तते। सांकूटिनम्॥

विसारिणो मत्स्ये ॥ १६ ॥

विसरतीति विसारी। विसारिन्शब्दात् स्वार्थेऽण् प्रत्ययो भवति मत्स्येऽभिधेये। वैसारिणो मत्स्यः। मत्स्य इति किम् ? विसारी देवदत्तः॥

संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ॥ १७ ॥

संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः स्वार्थे कृत्वसुच् प्रत्ययो भवति। पौनःपुन्यम् अभ्यावृत्तिः। एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्मसंख्यानं क्रियाभ्यावृत्तिगणनम्, तत्र प्रत्ययः। पञ्च वारान् भुङ्क्ते पञ्चकृत्वः। सप्तकृत्वः। संख्याया इति किम् ? भूरीन् वारान् भुङ्क्ते। क्रियाग्रहणं किमर्थम्, यावताभ्यावृत्तिः क्रियाया एव संभवति, न द्रव्यगुणयोः ? उत्तरार्थं क्रियाग्रहणम्। 'एकस्य सकृच्च' (५.४.१६) इत्यत्र क्रियैव गण्यते, नाभ्यावृत्तिः, असंभवात्। अभ्यावृत्तिग्रहणं किम् ? क्रियामात्रगणने मा भूत्। पञ्च पाकाः। दश पाकाः। गणनग्रहणं किमर्थम्, यावता गणनात्मिकैव संख्या ? अक्रियमाणे गणनग्रहणे क्रियाभ्यावृत्तौ वर्तमानेभ्यः संख्येयवचनेभ्य एव प्रत्ययः स्यात्—शतं वारान् भुङ्क्ते शतकृत्व इति। इह न स्यात्—शतं वाराणां भुङ्क्त इति। न ह्यत्राभ्यावृत्तौ शतशब्दः, संख्यानमात्रवृत्तित्वात्। गणनग्रहणात् तु सर्वत्र सिद्धं भवति॥

---

१. 'शतवारान्' इत्यपपाठो मुद्रितेषु।

द्वित्रिचतुर्भ्यः सुच् ॥ १८ ॥

द्वि त्रि चतुर् इत्येतेभ्यः संख्याशब्देभ्यः क्रियाभ्यावृत्तिगणने वर्तमानेभ्यः सुच् प्रत्ययो भवति। कृत्वसुचोऽपवादः। द्विर्भुङ्क्ते। त्रिर्भुङ्क्ते। चतुर्भुक्तम्। चकारः स्वरार्थः॥

एकस्य सकृच्च ॥ १९ ॥

एकशब्दस्य सकृदित्ययमादेशो भवति सुच् च प्रत्ययः क्रियागणने। कृत्वसुचोऽपवादः। अभ्यावृत्तिस्त्विह न संभवति। सकृद् भुङ्क्ते। सकृदधीते। एकः पाक इत्यत्र न भवति, अनभिधानात्॥

विभाषा बहोर्धाविप्रकृष्टकाले ॥ २० ॥

बहुशब्दात् क्रियाभ्यावृत्तिगणने वर्तमानाद् विभाषा धा प्रत्ययो भवति। कृत्वसुचोऽपवादः। पक्षे सोऽपि भवति। अविप्रकृष्टग्रहणं क्रियाभ्यावृत्तिविशेषणम्। क्रियाणामुत्पत्तयश्चेदासन्नकाला भवन्ति, न विप्रकृष्टकालाः। बहुधा दिवसस्य भुङ्क्ते, बहुकृत्वो दिवसस्य भुङ्क्ते। अविप्रकृष्टकाल इति किम् ? बहुकृत्वो मासस्य भुङ्क्ते॥

तत्प्रकृतवचने मयट् ॥ २१ ॥

तदिति प्रथमा समर्थविभक्तिः। प्राचुर्येण प्रस्तुतं प्रकृतम्। प्रथमासमर्थात् प्रकृतो- पाधिकेऽर्थे वर्तमानात् स्वार्थे मयट् प्रत्ययो भवति। टकारो ङीबर्थः। अन्नं प्रकृतम् अन्नमयम्। अपूपमयम्। अपरे पुनरेवं सूत्रार्थमाहुः। प्रकृतमित्युच्यतेऽस्मिन्निति प्रकृतवचनम्। तदिति प्रथमासमर्थात् प्रकृतवचनेऽभिधेये मयट् प्रत्ययो भवति। अन्नं प्रकृतमस्मिन् अन्नमयो यज्ञः। अपूपमयं पर्व। वटकमयी यात्रा। द्वयमपि प्रमाणम्, उभयथा सूत्रप्रणयनात्॥

समूहवच्च बहुषु ॥ २२ ॥

तत् प्रकृतवचन इत्येव। बहुषु प्रकृतेषूच्यमानेषु समूहवत् प्रत्यया भवन्ति। चका- राद् मयट् च। मोदकाः प्रकृताः प्राचुर्येण प्रस्तुता मौदकिकम्, मोदकमयम्। शाष्कुलि- कम्, शष्कुलीमयम्। 'अतिवर्तन्तेऽपि स्वार्थिकाः प्रकृतितो लिङ्गवचनानि' (परि० ८३)। द्वितीये सूत्रार्थे—मोदकाः प्रकृता अस्मिन् यज्ञे मौदकिको यज्ञः, मोदकमयः। शाष्कुलिकः, शष्कुलीमयः॥

अनन्तावसथेतिहभेषजाञ् ञ्यः ॥ २३ ॥

अनन्तादिभ्यः स्वार्थे ञ्यः प्रत्ययो भवति। अनन्त एव आनन्त्यम्। आवसथ एवावसथ्यम्। इति ह ऐतिह्यम्। निपातसमुदायोऽयमुपदेशपारम्पर्ये वर्तते। भेषजमेव भैषज्यम्। महाविभाषया विकल्पते प्रत्ययः॥

देवतान्तात्तादर्थ्ये यत् ॥ २४ ॥

देवताशब्दान्तात् प्रातिपदिकात् चतुर्थीसमर्थात् तादर्थ्ये यत् प्रत्ययो भवति। तदर्थ एव तादर्थ्यम्। चातुर्वर्ण्यादित्वात् ष्यञ्। तदिति प्रकृत्यर्थो निर्दिश्यते। अग्निदेवतायै इदम् अग्निदेवत्यम्। पितृदेवत्यम्। वायुदेवत्यम्॥

पादार्घाभ्यां च ॥ २५ ॥

तादर्थ्य इत्येव। पादार्घशब्दाभ्यां चतुर्थीसमर्थाभ्यां तादर्थ्येऽभिधेये यत् प्रत्ययो भवति। पादार्थमुदकं पाद्यम्। अर्घ्यम्। अनुक्तसमुच्चयार्थश्चकारः। यथादर्शनमन्यत्रापि प्रत्ययो भवति। ए॒ष वै छन्द॒स्यः॑ प्र॒जाप॑तिः (तै० सं० १.६.११.४)। वसु, अपस्, ओक, कवि, क्षेम, उदक, वर्चस्, निष्केवल, उक्थ, जन, पूर्व, नव, सूर, मर्त, यविष्ठ इत्येतेभ्यः छन्दसि स्वार्थे यत् प्रत्ययो भवति। अ॒ग्निरीशे वस॒व्यस्य (ऋ० ४.५५.८)। अप॒ ३स्यो॒ व॒सा॒नाः (मै० सं० २.६.८)। द्वितीयाबहुवचनस्यालुक्। अपो वसाना इत्यर्थः। स्व ओ॒क्ये॑ (ऋ० १.६१.१३)। क॒व्यो॒ऽसि कव्य॒वाह॑न॒ः (मै० सं० १.२.१२)। क्षे॒म्यम॒ध्यक्ष्यति (तै० सं० ५.२.१.७)। वायुर्वर्चस्यः। निष्केवल्यं (काठ० सं० २८.१०) शंसन्ति। उक्थ्यं शंसति। जन्यं ताभिः। पू॒र्व्या विदुः (शौ० सं० १६.३४.६)। स्तोम॑ं जनया॒मि॒ नव्य॑म् (ऋ० १.१०६.२)। सूर्यः (ऋ० १.२३.१७)। मर्त्यः (ऋ० १.१६.२)। य॒वि॒ष्ठ्यः (ऋ० १.३६.६)॥ आमुष्यायणामुष्यपुत्रिकेत्युपसंख्यानम् (द्र०—शौ० सं० १०.५.३६)॥ समशब्दादावतुप्रत्ययो वक्तव्यः॥ स॒मा॒वद॒ति (मै० सं० २.२.७)॥ नवस्य नू आदेशस्त्नप्तनप्खाश्च प्रत्ययाः॥ नूत्नम्। नूतनम्। नवीनम् ॥ नश्च पुराणे प्रात्॥ पुराणे वर्तमानात् प्रशब्दाद् नः प्रत्ययो भवति, चकारात् त्नप्तनप्खाश्च। प्रणम्। प्र॒त्नम् (ऋ० १.३६.४)। प्रतनम्। प्रीणम्॥ भागरूपनामभ्यो धेयः प्रत्ययो वक्तव्यः॥ भागधेयम्। रूपधेयम्। नामधेयम्॥ मित्राच्छन्दसि॥ मित्र॒धेये॑ यतस्व (तै० सं० ४.१.७.२) ॥ आग्नीध्रसाधारणादञ्॥ आग्नी॑ध्रम् (तै० सं० ३.१.६.१)। साधा॑रणम् (तै० सं० २.६.१.६)। स्त्रियां ङीप्—आग्नीध्री। सा॑धार॒णी (ऋ० १.१६७.४)। वाप्रकरणाच्च विकल्पन्त एतान्युपसंख्यानानि, तेन यथाप्राप्तमपि भवति। आग्नीध्रा शाला। साधारणा भूरिति॥ अयवसमरुद्भ्यां छन्दस्यञ् वक्तव्यः॥ आय॑वसे रमन्ते

---

१ - ‘ अयस् ’ इति बाल०।

(तै० सं० ५.२.८.३)। मास्तं॒ शर्धं॒ः (ऋ० १.१०६.१)॥

अतिथेर्ञ्यः ॥ २६ ॥

तादर्थ्य इत्येव। अतिथिशब्दात् चतुर्थीसमर्थात् तादर्थ्येऽभिधेये ञ्यः प्रत्ययो भवति। अतिथय इदम् आतिथ्यम्॥

देवात्तल् ॥ २७ ॥

तादर्थ्य इति निवृत्तम्। देवशब्दात् स्वार्थे तल् प्रत्ययो भवति। देव एव देवता॥

अवेः कः ॥ २८ ॥

अविशब्दात् स्वार्थे कः प्रत्ययो भवति। अविरेव अविकः॥

यावादिभ्यः कन् ॥ २९ ॥

याव इत्येवमादिभ्यः स्वार्थे कन् प्रत्ययो भवति। याव एव यावकः। मणिकः॥ याव। मणि। अस्थि। चण्ड। पीत। स्तम्ब। ऋतावुष्णशीते (ग० सू० १४७)। पशौ लूनवियाते (ग० सू० १४८)। अणु निपुणे (ग० सू० १४९)। पुत्र कृत्रिमे (ग० सू० १५०)। स्नात वेदसमाप्तौ (ग० सू० १५१)। शून्य रिक्ते (ग० सू० १५२)। दान कुत्सिते (ग० सू० १५३)। तनु सूत्रे (ग० सू० १५४)। ईयसश्च (ग० सू० १५५)। श्रेयस्कः। ज्ञात। कुमारीक्रीडनकानि च (ग० सू० १५६)। यावादिः॥

लोहितान् मणौ ॥ ३० ॥

लोहितशब्दाद् मणौ वर्तमानात् स्वार्थे कन् प्रत्ययो भवति। लोहितो मणिर्लोहितकः। मणाविति किम् ? लोहितः॥

वर्णे चानित्ये ॥ ३१ ॥

अनित्ये वर्णे वर्तमानात् लोहितशब्दात् स्वार्थे कन् प्रत्ययो भवति। लोहितकः कोपेन। लोहितकः पीडनेन। अनित्य इति किम् ? लोहितो गौः। लोहितं रुधिरम्॥ लोहितात्लिङ्गबाधनं वा वक्तव्यम्॥ लोहितिका कोपेन, लोहिनिका कोपेन॥

रक्ते ॥ ३२ ॥

लाक्षादिना रक्ते यो लोहितशब्दः, तस्मात् कन् प्रत्ययो भवति। लोहितकः

कम्बलः। लोहितकः पटः। लिङ्गबाधनं वेत्येव। लोहितिका, लोहिनिका शाटी॥

कालाच्च ॥ ३३ ॥

वर्णे चानित्ये रक्त इति द्वयमप्यनुवर्तते। कालशब्दादनित्ये वर्तमानाद् रक्ते च कन् प्रत्ययो भवति। कालकं मुखं वैलक्ष्येण। रक्ते—कालकः पटः। कालिका शाटी॥

विनयादिभ्यष्ठक् ॥ ३४ ॥

विनय इत्येवमादिभ्यः स्वार्थे ठक् प्रत्ययो भवति। विनय एव वैनयिकः। सामयिकः। औपयिकः। विभाषाग्रहणेन विकल्प्यते प्रत्ययः॥ विनय। समय। उपायाद् ध्रस्वत्वं च (ग० सू० १५७)। संगति। कथंचित्। अकस्मात्। समयाचार। उपचार। समाचार। व्यवहार। संप्रदान। समुत्कर्ष। समूह। विशेष। अत्यय। विनयादिः॥

वाचो व्याहृतार्थायाम् ॥ ३५ ॥

व्याहृतः प्रकाशितोऽर्थो यस्यास्तस्यां वाचि वर्तमानाद् वाच्शब्दात् स्वार्थे ठक् प्रत्ययो भवति। पूर्वमन्येनोक्तार्थत्वात् संदेशवाग् व्याहृतार्थेत्युच्यते। वाचिकं कथयति। वाचिकं श्रद्दधे। व्याहृतार्थायामिति किम् ? मधुरा वाक् देवदत्तस्य॥

तद्युक्तात् कर्मणोऽण् ॥ ३६ ॥

व्याहृतार्थया वाचा यत् कर्म युक्तम् , तदभिधायिनः कर्मशब्दात् स्वार्थेऽण् प्रत्ययो भवति। कर्मैव कार्मणम्। वाचिकं श्रुत्वा तथैव यत् कर्म क्रियते तत् कार्मणमित्युच्यते ॥ अण्प्रकरणे कुलालवरुडनिषादकर्मारचण्डालमित्रामित्रेभ्यश्छन्दस्युपसंख्यानम्॥ कुलाल एव कौलालः (मा० सं० ३०.७)। वारुडः[1]। नैषादः (मा० सं० ३०.८)। कार्मारः (ऋ० ६.११२.२)। चाण्डालः (मा० सं० ३०.२१)। मैत्रः[1] (मा० सं० ३६.५)। आमित्रः[1] (ऋ० ६.२८.३)। सान्नाय्यानुजावरानुषूकाष्टुभचातुष्प्राश्यराक्षोघ्न-वैयातवैकृतवारिवस्कृताग्रायणाग्रहायणसान्तपनाः। एतेऽणन्ताः स्वार्थिकाश्छन्दसि भाषायां चेष्यन्ते। सांनाय्यम् (तै० सं० २.५.३.७)। आनुजावरः[1] (तै० सं० २.३.४.२)। आनुषूकः (तै० सं. २.३.४.४)। आष्टुभः[1]। चातुष्प्राश्यः (काठ० सं० ८.१०)। राक्षोघ्नम् (तै० सं० ५.१.१०.२)। वैयातः। वैकृतः। वारिवस्कृतः (तै० सं० ४.५.२.२)। आग्रायणः[1] (मै० सं० २.७.१६)। आग्रहायणः। सान्तपनः[1] (मा० सं० १७.८५)॥

---

१ - ' आष्टुभ ' इति सार्वत्रिकः पाठः। न्यासे तु ' आनुष्टुभ ' इति। महाभाष्यपदमञ्जर्योस्तु नास्ति पाठद्वयमपि। २ - ' सांनाय्यम् .....सान्तपनः ' इति नास्ति बाल०, तारा०।

ओषधेरजातौ ॥ ३७ ॥

ओषधिशब्दादजातौ वर्तमानात् स्वार्थेऽण् प्रत्ययो भवति। औषधं पिबति। औषधं ददाति। अजाताविति किम् ? ओषधयः क्षेत्रे रूढा भवन्ति॥

प्रज्ञादिभ्यश्च ॥ ३८ ॥

प्रजानातीति प्रज्ञः। प्रज्ञ इत्येवमादिभ्यः प्रातिपदिकेभ्यः स्वार्थेऽण् प्रत्ययो भवति। प्रज्ञ एव प्राज्ञः। प्राज्ञी स्त्री। यस्यास्तु प्रज्ञा विद्यते सा प्राज्ञा भवति—'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' (५.२.१०१) इति। विदन्नित्यत्र पठ्यते। विदेः शत्रन्तस्य ग्रहणम्, 'विदेः शतुर्वसुः' (७.१.३६) इत्यत एव ज्ञापकात् पाक्षिको वस्वादेशः। अन्यतरस्यांग्रहणं वा तत्रानुवर्तते—'तुह्योस्तातङाशिष्यन्यतरस्याम्' (७.१.३५) इति॥ प्रज्ञ। वणिज्। उशिज्। उष्णिज्। प्रत्यक्ष। विद्वस्। विदन्। षोडन्। षोडश। विद्या। मनस्। श्रोत्र शरीरे (ग० सू० १५८)। श्रौत्रम्। जुह्वत् कृष्णमृगे (ग० सू० १५९)। चिकीर्षत्। चोर। शत्रु। योध। चक्षुस्। वक्षस्। धूर्त। वस्। एत्। मरुत्। क्रुङ्। राजा। सत्वन्तु। दशार्ह। वयस्। आतुर। रक्षस्। पिशाच। अशनि। कार्षापण। देवता। बन्धु। प्रज्ञादिः॥

मृदस्तिकन् ॥ ३९ ॥

मृच्छब्दात् स्वार्थे तिकन् प्रत्ययो भवति। विकल्पः सर्वत्रानुवर्तते। मृदेव मृत्तिका॥

सस्नौ प्रशंसायाम् ॥ ४० ॥

प्रशंसोपाधिकेऽर्थे वर्तमानाद् मृच्छब्दात् स स्न इत्येतौ प्रत्ययौ भवतः। रूपपोऽपवादः। प्रशस्ता मृद् मृत्सा। मृत्स्ना। नित्यश्चायं प्रत्ययः, उत्तरसूत्रेऽन्यतरस्यांग्रहणात्॥

वृकज्येष्ठाभ्यां तिल्तातिलौ चच्छन्दसि ॥ ४१ ॥

प्रशंसायामित्येव। वृकज्येष्ठाभ्यां प्रशंसोपाधिकेऽर्थे वर्तमानाभ्यां यथासंख्यं तिल्तातिलौ प्रत्ययौ भवतश्छन्दसि विषये। रूपपोऽपवादौ। वृकतिः (ऋ० ४.४१.४)। ज्येष्ठतातिः (ऋ० ५.४४.१)॥

बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ॥ ४२ ॥

बह्वर्थादल्पार्थात् च कारकाभिधायिनः शब्दात् शस् प्रत्ययो भवत्यन्यतरस्याम्। विशेषानभिधानात् च सर्वं कर्मादिकारकं गृह्यते। बहूनि ददाति, बहुशो ददाति। अल्पं ददाति, अल्पशो ददाति। बहुभिर्ददाति, बहुशो ददाति। अल्पेन, अल्पशः। बहुभ्यः,

बहुशः। अल्पाय, अल्पश इत्येवमाद्युदाहार्यम्। बह्वल्पार्थादिति किम् ? गां ददाति। अश्वं ददाति। कारकादिति किम् ? बहूनां स्वामी। अल्पानां स्वामी। अर्थग्रहणात् पर्यायेभ्योऽपि भवति। भूरिशो ददाति। स्तोकशो ददाति॥ बह्वल्पार्थान् मङ्गलवचनम्॥ यत्र मङ्गलं गम्यते तत्रायं प्रत्यय इष्यते। बहुशो ददातीत्याभ्युदयिकेषु कर्मसु। अल्पशो ददातीत्य-निष्टेषु कर्मसु॥

संख्यैकवचनाच्च वीप्सायाम् ॥ ४३ ॥

संख्यावाचिभ्यः प्रातिपदिकेभ्य एकवचनात् च वीप्सायां द्योत्यायां शस् प्रत्ययो भवत्यन्यतरस्याम्। द्वौद्वौ मोदकौ ददाति द्विशः। त्रिशः। एकवचनात् खल्वपि—कार्षापणं-कार्षापणं ददाति कार्षापणशः। माषशः। पादशो ददाति। एकोऽर्थ उच्यते येन तदेक-वचनम्। कार्षापणादयश्च परिमाणशब्दा वृत्तावेकार्था एव भवन्ति। संख्यैकवचनादिति किम् ? घटंघटं ददाति। वीप्सायामिति किम् ? द्वौ ददाति। कार्षापणं ददाति। कारकादित्येव—द्वयोर्द्वयोः स्वामी। कार्षापणस्यकार्षापणस्य स्वामी॥

प्रतियोगे पञ्चम्यास्तसिः ॥ ४४ ॥

प्रतिना कर्मप्रवचनीयेन योगे या पञ्चमी विहिता तदन्तात् तसिः प्रत्ययो भवति। प्रद्युम्नो वासुदेवतः प्रति। अभिमन्युरर्जुनतः प्रति। वाग्ग्रहणानुवृत्तेर्विकल्पेन भवति। वासुदेवादर्जुनादित्यपि भवति॥ तसिप्रकरण आद्यादिभ्य उपसंख्यानम्॥ आदौ आदितः। मध्यतः। पार्श्वतः। पृष्ठतः। आकृतिगणश्चायम्॥

अपादाने चाहीयरुहोः ॥ ४५ ॥

अपादाने या पञ्चमी तस्याः पञ्चम्या वा तसिः प्रत्ययो भवति, तच्चेदपादानं हीयरुहोः संबन्धि न भवति। ग्रामत आगच्छति, ग्रामात्। चोरतो बिभेति, चोरात्। अध्ययनतः पराजयते, अध्ययनात्। अहीयरुहोरिति किम् ? सार्थाद् हीयते। पर्वतादवरोहति। हीयत इति विकारनिर्देशो जहातेः प्रतिपत्त्यर्थः, जिहीतेर्मा भूत्। भूमित उज्जिहीते। भूमेरुज्जिहीते। कथं 'मन्त्रो हीनः स्वरतो वर्णतो वा' (पा० श्लो० शि० ५२) इति। नैषा पञ्चमी। किं तर्हि? तृतीया। स्वरेण वर्णेन वा हीन इत्यर्थः॥

---

१ - 'मङ्गलामङ्गलवचनम्' इति मुद्रितेषु पाठः। स काशिकान्यासपदमञ्जरीभिर्न संवदते।

२ - जिहीतेरिति तिङन्तानुकरणम्, श्तिपि जिहातेरिति स्यात्।

अतिग्रहाव्यथनक्षेपेष्वकर्तरि तृतीयायाः ॥ ४६ ॥

अतिक्रम्य ग्रहोऽतिग्रहः। अचलनमव्यथनम्। क्षेपो निन्दा। अतिग्रहादिविषये या तृतीया तदन्ताद् वा तसिः प्रत्ययो भवति, सा चेत् कर्तरि न भवति। वृत्तेनातिगृह्यते, वृत्ततोऽतिगृह्यते। चारित्रेणातिगृह्यते, चारित्रतोऽतिगृह्यते। सुष्ठुवृत्तवानन्यानतिक्रम्य वृत्तेन गृह्यत इत्यर्थः। अव्यथने—वृत्तेन न व्यथते, वृत्ततो न व्यथते। चारित्रेण न व्यथते, चारित्रतो न व्यथते। वृत्तेन न चलतीत्यर्थः। क्षेपे—वृत्तेन क्षिप्तः, वृत्ततः क्षिप्तः। चारित्रेण क्षिप्तः, चारित्रतः क्षिप्तः। वृत्तेन निन्दित इत्यर्थः। अकर्तरीति किम्? देवदत्तेन क्षिप्तः॥

हीयमानपापयोगाच्च ॥ ४७ ॥

अकर्तरि तृतीयाया इत्येव। हीयमानेन पापेन च योगो यस्य तद्वाचिनः शब्दात् परा या तृतीया विभक्तिरकर्तरि तदन्ताद् वा तसिः प्रत्ययो भवति। वृत्तेन हीयते, वृत्ततो हीयते। चारित्रेण हीयते, चारित्रतो हीयते। पापयोगात्—वृत्तेन पापः, वृत्ततः पापः। चारित्रेण पापः, चारित्रतः पापः। क्षेपस्य चाविवक्षायां तत्त्वाख्यायामिदमुदाहरणम्। क्षेपे हि पूर्वेणैव सिद्धम्। अकर्तरीत्येव—देवदत्तेन हीयते॥

षष्ठ्या व्याश्रये ॥ ४८ ॥

नानापक्षसमाश्रयो व्याश्रयः। व्याश्रये गम्यमाने षष्ठ्यन्ताद् वा तसिः प्रत्ययो भवति। देवा अर्जुनतोऽभवन्। आदित्याः कर्णतोऽभवन्। षष्ठी चात्र पक्षापेक्षैव। अर्जुनस्य पक्षे, कर्णस्य पक्ष इत्यर्थः। व्याश्रय इति किम् ? वृक्षस्य शाखा॥

रोगाच्चापनयने ॥ ४९ ॥

रोगो व्याधिः, तद्वाचिनः शब्दाद् या षष्ठी विभक्तिः, तदन्ताद् वा तसिः प्रत्ययो भवत्यपनयने गम्यमाने। अपनयनं प्रतीकारः, चिकित्सेत्यर्थः। प्रवाहिकातः कुरु। कासतः कुरु। छर्दिकातः कुरु। प्रतीकारमस्याः कुर्वित्यर्थः। अपनयन इति किम् ? प्रवाहिकायाः प्रकोपनं कुरु॥

अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरि च्विः ॥ ५० ॥

कारणस्य विकाररूपेणाभूतस्य तदात्मना भावोऽभूततद्भावः। संपद्यतेः कर्ता संपद्यकर्ता। संपद्यकर्तरि वर्तमानात् प्रातिपदिकादभूततद्भावे गम्यमाने कृभ्वस्तिभिर्धातुभिर्योगे च्विः प्रत्ययो भवति। अशुक्लः शुक्लः संपद्यते, तं करोति शुक्लीकरोति।

मलिनं शुक्लीकरोति। शुक्लीभवति। शुक्लीस्यात्। घटीकरोति मृदम्। घटीभवति। घटीस्यात्। अभूततद्भाव इति किम् ? शुक्लं करोति। नात्र प्रकृतिर्विवक्षिता। कृभ्वस्ति-योग इति किम् ? अशुक्लः शुक्लो जायते। संपद्यकर्तरीति किम् , यावता अभूततद्भाव-सामर्थ्याद् लब्धमेव संपद्यकर्तृत्वम् ? कारकान्तरसंपत्तौ मा भूत्। अदेवगृहे देवगृहे संपद्यते। देवगृहस्याधेयविशेषसंबन्धेनाभूततद्भावः, स त्वधिकरणस्य न कर्तुरिति॥

अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च ॥ ५१ ॥

अरुःप्रभृतीनामन्तस्य लोपो भवति च्विश्च प्रत्ययः। अत्र सर्वविशेषणसंबन्धात् पूर्वेणैव प्रत्ययः सिद्धः, लोपमात्रार्थ आरम्भः। अनरुररुः संपद्यते, तं करोति अरूकरोति। अरूभवति। अरूस्यात्। मनस्—उन्मनीकरोति। उन्मनीभवति। उन्मनीस्यात्। चक्षुस्—उच्चक्षूकरोति। उच्चक्षूभवति। उच्चक्षूस्यात्। चेतस्—विचेतीकरोति। विचेतीभवति। विचेतीस्यात्। रहस्—विरहीकरोति। विरहीभवति। विरहीस्यात्। रजस्—विरजीकरोति। विरजीभवति। विरजीस्यात्॥

विभाषा साति कात्स्न्र्ये ॥ ५२ ॥

अभूततद्भावे कृभ्वस्तियोगे संपद्यकर्तरीति सर्वमनुवर्तते। अस्मिन् विषये विभाषा सातिः प्रत्ययो भवति कात्स्न्र्ये गम्यमाने। यदि प्रकृतिः कृत्स्नां विकारात्मतामापद्यत इत्यर्थः। अग्निसाद्भवति शस्त्रम्, अग्नीभवति शस्त्रम्। उदकसाद्भवति लवणम्, उदकीभवति लवणम्। कात्स्न्र्य इति किम् ? एकदेशेन पटः शुक्लीभवति। विभाषाग्रहणं च्वेः प्रापकम्। प्रत्ययविकल्पस्तु महाविभाषयैव सिद्धः॥

अभिविधौ संपदा च ॥ ५३ ॥

अभिविधिरभिव्याप्तिः। अभिविधौ गम्यमाने च्विविषये सातिः प्रत्ययो भवति संपदा योगे, चकारात् कृभ्वस्तिभिश्च। विभाषाग्रहणानुवृत्तेश्च्विरप्यभ्यनुज्ञायते। स तु कृभ्वस्तिभिरेव योगे भवति, न संपदा। अग्निसात्संपद्यते। अग्निसाद्भवति। उदकसात्-संपद्यते। उदकसाद्भवति लवणम्। अग्नीभवति। उदकीभवति। अथाभिविधेः कात्स्न्र्यस्य च को विशेषः ? यत्रैकदेशेनापि सर्वा प्रकृतिर्विकारमापद्यते सोऽभिविधिः। यथास्यां सेनायामुत्पातेन सर्वं शस्त्रमग्निसात्संपद्यते, वर्षासु सर्वं लवणमुदकसात्संपद्यत इति। कात्स्न्र्यं तु सर्वात्मना द्रव्यस्य विकाररूपापत्तौ भवति॥

---

१ – 'सत्त्वाधिकरणस्य' इति मुद्रितः पाठः।

तदधीनवचने ॥ ५४ ॥

अभूततद्भाव इति निवृत्तम्, अर्थान्तरोपादानात्। कृभ्वस्तियोगे संपदा चेति वर्तते। तदधीनं तदायत्तं तत्स्वामिकमित्यर्थः। स्वामिसामान्यमीशितव्यसामान्यं च तदधीनशब्देन निर्दिश्यते। स्वामिविशेषवाचिनः प्रातिपदिकादीशितव्येऽभिधेये सातिः प्रत्ययो भवति कृभ्वस्तिभिः संपदा च योगे। राजाधीनं करोति, राजसात्करोति। राजसाद्भवति। राजसात्स्यात्। राजसात्संपद्यते। ब्राह्मणसात्करोति। ब्राह्मणसाद्भवति। ब्राह्मणसात्स्यात्। ब्राह्मणसात्संपद्यते॥

देये त्रा च ॥ ५५ ॥

तदधीनवचन इत्यनुवर्तते। तस्य विशेषणं देयग्रहणम्। दातव्यं देयम्। तदधीने देये त्रा प्रत्ययो भवति, चकारात् सातिश्च कृभ्वस्तिभिः संपदा च योगे। ब्राह्मणेभ्यो देयमिति यद् विज्ञातम् , तद् यदा तेषां समर्पणेन तदधीनं क्रियते तदा त्रा प्रत्ययः। ब्राह्मणाधीनं देयं करोति, ब्राह्मणसात्करोति। ब्राह्मणत्राकरोति। ब्राह्मणत्राभवति। ब्राह्मणत्रास्यात्। ब्राह्मणत्रासंपद्यते। देय इति किम् ? राजसाद्भवति राष्ट्रम्॥

देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ॥ ५६ ॥

सातिर्निवृत्तः, त्राप्रत्ययोऽनुवर्तते। देवादिभ्यः प्रातिपदिकेभ्यो द्वितीयासप्तम्यन्तेभ्यः त्रा प्रत्ययो भवति बहुलम्। कृभ्वस्तिभिरिति नात्र संबध्यते। सामान्येन विधानम्। देवान् गच्छति देवत्रा गच्छति। देवेषु वसति देवत्रा वसति। मनुष्यान् गच्छति मनुष्यत्रा गच्छति। मनुष्येषु वसति मनुष्यत्रा वसति। पुरुषान् गच्छति पुरुषत्रा गच्छति। पुरुषेषु वसति पुरुषत्रा वसति। पुरून् गच्छति पुरुत्रा गच्छति। पुरुषु वसति पुरुत्रा वसति। मर्त्यान् गच्छति मर्त्यत्रा गच्छति। मर्त्येषु वसति मर्त्यत्रा वसति। बहुलवचनादन्यत्रापि भवति। बहुत्रा जीवंतो मनः (ऋ० १०.१६४.२) इति॥

अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच् ॥ ५७ ॥

यत्र ध्वनावकारादयो वर्णा विशेषरूपेण न व्यज्यन्ते सोऽव्यक्तः। तस्यानुकरणमव्यक्तानुकरणम्। द्व्यज् अवरार्धं यस्य तद् द्व्यजवरार्धम्। अवरशब्दोऽपकर्षे। यस्यापकर्षे क्रियमाणे सुष्ठु न्यूनमर्धं द्व्यच्कं संपद्यते, तस्मादव्यक्तानुकरणादनितिपराड् डाच् प्रत्ययो भवति। कृभ्वस्तियोग इत्यनुवर्तते। यस्य च द्विर्वचने कृते द्व्यजवरार्धं ततः प्रत्ययः।

---

१ – अतोऽग्रे ‘ एवमन्येऽप्युदाहार्याः ’ इत्यनावश्यकः पाठः प्रायिकः।

'डाचि बहुलं द्वे भवतः' (वा० ८.१.१२) इति विषयसप्तमी। डाचि विवक्षिते द्विर्वचनमेव पूर्वं क्रियते, पश्चात् प्रत्ययः। पटपटाकरोति। पटपटाभवति। पटपटास्यात्। दमदमाकरोति। दमदमाभवति। दमदमास्यात्। अव्यक्तानुकरणादिति किम् ? दृषत्करोति। द्रव्यजवरार्धादिति किम् ? श्रत्करोति। अवरग्रहणं किम् ? खरटखरटाकरोति। त्रपटत्रपटाकरोति। अनितावितिकिम् ? पटिति करोति। चकारः स्वरार्थः स्वरितबाधनार्थः। पटपटासि। अत्र 'स्वरितो वानुदात्ते पदादौ' (८.२.६) इति स्वरितो न भवति। केचिद् द्रव्यजवरार्ध्यादिति यकारं पठन्ति, स स्वार्थिको विज्ञेयः॥

कृञो द्वितीयतृतीयशम्बबीजात् कृषौ ॥ ५८ ॥

द्वितीयतृतीयादिभ्यः शब्देभ्यः कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे, नान्यत्र। पुनः कृञ्ग्रहणं भ्वस्त्योर्निवृत्त्यर्थम्। द्वितीयाकरोति। द्वितीयं कर्षणं विलेखनं करोतीत्यर्थः। तृतीयाकरोति। शम्बाकरोति। अनुलोमकृष्टं क्षेत्रं पुनः प्रतिलोमं कृषतीत्यर्थः। बीजाकरोति। सह बीजेन विलेखनं करोतीत्यर्थः। कृषाविति किम् ? द्वितीयं करोति पदम्॥

संख्यायाश्च गुणान्तायाः ॥ ५९ ॥

कृञ इत्यनुवर्तते, कृषाविति च। संख्यावाचिनः शब्दस्य गुणशब्दोऽन्ते समीपे यत्र संभवति, सा संख्या गुणान्तेत्युच्यते। तादृशात् प्रातिपदिकात् कृषावभिधेयायां डाच् प्रत्ययो भवति कृञो योगे। द्विगुणं विलेखनं करोति क्षेत्रस्य, द्विगुणाकरोति क्षेत्रम्। त्रिगुणाकरोति। कृषाविति किम् ? द्विगुणां करोति रज्जुम्॥

समयाच्च यापनायाम् ॥ ६० ॥

कृञ इत्येव। कृषाविति निवृत्तम्। कर्तव्यस्यावसरप्राप्तिः समयः, तस्यातिक्रमणं यापना। समयशब्दाद् यापनायां गम्यमानायां डाच् प्रत्ययो भवति कृञो योगे। समयाकरोति। समयं यापयति, कालक्षेपं करोतीत्यर्थः। यापनायामिति किम् ? समयं करोति॥

सपत्रनिष्पत्रादतिव्यथने ॥ ६१ ॥

कृञ इत्येव। सपत्रनिष्पत्रशब्दाभ्यामतिव्यथने डाच् प्रत्ययो भवति कृञो योगे सति। अतिव्यथनमतिपीडनम्। सपत्राकरोति मृगं व्याधः। सपत्रं शरमस्य शरीरे प्रवेशयतीत्यर्थः। निष्पत्राकरोति। शरीराच्छरमपरपार्श्वे निष्क्रामयतीत्यर्थः। अतिव्यथन इति किम् ? सपत्रं वृक्षं करोति जलसेचकः। निष्पत्रं वृक्षतलं करोति भूमिशोधकः॥

निष्कुलान्निष्कोषणे ॥ ६२ ॥

कृञ इत्येव। निष्कुलशब्दाद् निष्कोषणे वर्तमानात् कृञो योगे डाच् प्रत्ययो भवति। निष्कोषणमन्तरवयवानां बहिर्निष्कासनम्। निष्कुलाकरोति पशून्। निष्कुष्णातीत्यर्थः। निष्कोषण इति किम् ? निष्कुलान् करोति शत्रून्॥

सुखप्रियादानुलोम्ये ॥ ६३ ॥

सुखप्रियशब्दाभ्यामानुलोम्ये वर्तमानाभ्यां कृञो योगे डाच् प्रत्ययो भवति। आनुलोम्यमनुकूलता, आराध्यचित्तानुवर्तनम्। सुखाकरोति। प्रियाकरोति। स्वाम्यादेश्चित्तमाराधयतीत्यर्थः। सुखं प्रियं वा कुर्वन्नप्यानुलोम्येऽवस्थित एवमुच्यते। आनुलोम्य इति किम् ? सुखं करोति, प्रियं करोत्यौषधपानम्॥

दुःखात् प्रातिलोम्ये ॥ ६४ ॥

कृञ इत्येव। दुःखशब्दात् प्रातिपदिकात् प्रातिलोम्ये गम्यमाने डाच् प्रत्ययो भवति कृञो योगे। प्रातिलोम्यं प्रतिकूलता। स्वाम्यादेश्चित्तपीडनम्। दुःखाकरोति भृत्यः। प्रातिलोम्य इति किम् ? दुःखं करोति कदन्नम्॥

शूलात् पाके ॥ ६५ ॥

कृञ इत्येव। शूलशब्दात् पाकविषये डाच् प्रत्ययो भवति कृञो योगे। शूले पचति, शूलाकरोति मांसम्। पाक इति किम् ? शूलं करोति कदन्नम्॥

सत्यादशपथे ॥ ६६ ॥

कृञ इत्येव। सत्यशब्दादशपथे डाच् प्रत्ययो भवति कृञो योगे। सत्यशब्दोऽनृतप्रतिपक्षवचनः। क्वचित् तु शपथे च वर्तते—सत्येन शापयेद् विप्रम् (मनु० ८.११३) इति, तस्यायं प्रतिषेधः। सत्याकरोति वणिक् भाण्डम्। मयैतत् क्रेतव्यमिति तथ्यं करोति। अशपथ इति किम् ? सत्यं करोति ब्राह्मणः॥

मद्रात् परिवापणे ॥ ६७ ॥

कृञ इत्येव। मद्रशब्दात् परिवापणे डाच् प्रत्ययो भवति कृञो योगे। परिवापणं मुण्डनम्। मद्रशब्दो मङ्गलार्थः। मङ्गलं मुण्डनं करोति, मद्राकरोति॥ भद्राच्चेति वक्तव्यम्॥

---

१ - ‘ द्विजम् ’ इति है०।

भद्राकरोति नापितः कुमारम्। परिवापण इति किम् ? भद्रं करोति॥

समासान्ताः ॥ ६८ ॥

अधिकारोऽयम्। आ पादपरिसमाप्तेर्ये प्रत्यया विहितास्ते समासस्यान्ता अवयवा एकदेशा भवन्ति, तद्ग्रहणेन गृह्यन्ते (व्या० प० ८०) इति वेदितव्यम्। प्रयोजनम्—अव्ययीभावद्विगुद्वन्द्वतत्पुरुषबहुव्रीहिसंज्ञाः। उपराजम्। अधिराजम्। 'नाव्ययीभावाद्०' (२.४.८३) इत्येष विधिर्भवति। 'अनश्च' (५.४.१०८) इति टच्। द्विपुरी, त्रिपुरीति। 'द्विगोः' (४.१.२१) इति ङीब् भवति। कोशनिषदिनी। स्रक्त्वचिनी। 'द्वन्द्वोपतापगर्ह्याद्०' (५.२.१२८) इतीनिर्भवति। विधु[1]रः। प्रधु[1]रः। 'तत्पुरुषे तुल्यार्थ०' (६.२.२)—इत्येष स्वरो भवति। उ[1]च्चैर्धु[1]रः। नी[1]चैर्धु[1]रः। 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (६.२.१) इत्येतद् भवति॥

न पूजनात् ॥ ६९ ॥

यान् शब्दानुपादाय समासान्ता विधीयन्ते 'राजाहःसखिभ्यष्टच्' (५.४.९१) इत्येवमादीन्, यदा ते पूजनात् पूजनवचनात् परे भवन्ति तदा समासान्तो न भवति। सुराजा। अतिराजा। सुगौः। अतिगौः॥ पूजायां स्वतिग्रहणं कर्तव्यम्॥ इह मा भूत्—परमराजः, परमगव इति॥ प्राग्बहुव्रीहिग्रहणं च कर्तव्यम्॥ 'बहुव्रीहौ सक्थ्यक्ष्णोः०' (५.४.११३) इत्येवमादौ प्रतिषेधो न भवति। सुसक्थः। अतिसक्थः। स्वक्षः। अत्यक्षः॥

किमः क्षेपे ॥ ७० ॥

क्षेपे यः किंशब्दस्ततः परस्य समासान्तो न भवति। किंराजा यो न रक्षति। किंसखा योऽभिद्रुह्यति। किंगौर्यो न वहति। 'किं क्षेपे' (२.१.६४) इति समासः। क्षेप इति किम्? कस्य राजा किंराजः। किंसखः। किंगवः॥

नञस्तत्पुरुषात् ॥ ७१ ॥

नञः परे वक्ष्यमाणा ये राजादयस्तदन्तात् तत्पुरुषात् समासान्तो न भवति। अराजा। असखा। अगौः। तत्पुरुषादिति किम् ? अनृचो माणवकः। अधुरं शकटम्॥

---

१ - 'समासस्यान्तावयवा' इति बाल०, 'समासान्तावयवा' इति है०।

२ - 'कटकवलयिनी। शङ्खनूपुरिणी' इत्यधिकं मुद्रितेषु। स त्वपपाठः।

पथो विभाषा ॥ ७२ ॥

नञस्तत्पुरुषादिति वर्तते। नञः परो यः पथिन्शब्दः, तदन्तात् तत्पुरुषात् समासान्तो विभाषा न भवति। पूर्वेण नित्यः प्रतिषेधः प्राप्तो विकल्प्यते। अपथम्, अपन्थाः॥

बहुव्रीहौ संख्येये डजबहुगणात् ॥ ७३ ॥

संख्येये यो बहुव्रीहिर्वर्तते, तस्मादबहुगणान्ताद् डच् प्रत्ययो भवति। 'संख्याव्ययासन्ना०' (२.२.२५) इति यो बहुव्रीहिः, तस्येदं ग्रहणम्। उपदशाः। उपविंशाः। उपत्रिंशाः। आसन्नदशाः। अदूरदशाः। अधिकदशाः। द्वित्राः। पञ्चषाः। पञ्चदशाः। संख्येय इति किम् ? चित्रगुः। शबलगुः। अबहुगणादिति किम् ? उपबहवः। उपगणाः। अत्र स्वरे विशेषः ॥ डच्प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं कर्तव्यं निस्त्रिंशाद्यर्थम्॥ निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षाणि देवदत्तस्य। निश्चत्वारिंशानि यज्ञदत्तस्य। निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः॥

ऋक्पूरब्धूःपथामानक्षे ॥ ७४ ॥

बहुव्रीहाविति न स्वर्यते। सामान्येन विधानम्। ऋक् पुर् अप् धुर् पथिन् इत्येवमन्तानां समासानामकारः प्रत्ययो भवति समासान्तोऽक्षे न। सामर्थ्याद् धुर एतद्विशेषणम्, ऋगादीनां न भवति। अक्षसंबन्धिनी या धूस्तदन्तस्य न भवति। अनृचः। बह्वृचः। अर्धर्चः। पुर्—ललाटपुरम्। नान्दीपुरम्। अप्—द्वीपम्। अन्तरीपम्। समीपम्। धुर्—राजधुरा। महाधुरः। पथिन्—स्थलपथः। जलपथः। अनक्ष इति किम् ? अक्षस्य धूः अक्षधूः। दृढधूरक्षः। अनृचो माणवके ज्ञेयः, बह्वृचश्चरणाख्यायाम् (महाभाष्य २. ४४४)। अनृचो माणवकः। बह्वृचो ब्राह्मणः। अनृक्कं साम, बह्वृक्कं सूक्तमित्यत्र न भवति॥

अच् प्रत्यन्ववपूर्वात् सामलोम्नः ॥ ७५ ॥

प्रति अनु अव इत्येवंपूर्वात् सामान्तात् लोमान्तात् च समासादच् प्रत्ययो भवति। प्रतिसामम्। अनुसामम्। अवसामम्। प्रतिलोमम्। अनुलोमम्। अवलोमम्।

---

१ - इदं वाक्यं नास्ति है०।

२ - 'माणवको' इति है०।

कृष्णोदक्पाण्डुपूर्वाया भूमेरचूप्रत्ययः स्मृतः।
गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदि॥

कृष्णभूमः। पाण्डुभूमः। उदग्भूमः। पञ्चनदम्। पञ्चगोदावरम्। 'नदीभिश्च' (२.१.२०) इत्यव्ययीभावः। भूमेरपि संख्यापूर्वाया अच् प्रत्यय इष्यते। द्विभूमः प्रासादः। त्रिभूमः। दशभूमकं सूत्रम्। अन्यत्रापि च दृश्यते। पद्मनाभः। ऊर्णनाभः। दीर्घरात्रः। समरात्रः। अरात्रः। तदेतत् सर्वमिह योगविभागं कृत्वा साधयन्ति॥

अक्ष्णोऽदर्शनात् ॥ ७६ ॥

अजित्यनुवर्तते। दर्शनादन्यत्र योऽक्षिशब्दस्तदन्तादच् प्रत्ययो भवति। लवणाक्षम्। पुष्कराक्षम्। 'उपमितं व्याघ्रादिभिः०' (२.१.५६) इति समासः। अदर्शनादिति किम्? ब्राह्मणाक्षि। कथं कबराक्षं गवाक्षमिति। अश्वादीनां मुखप्रच्छादनार्थं बहुच्छिद्रं कबरा- क्षम्, तेनापि हि दृश्यते, गवाक्षेण च ? नैष दोषः। चक्षुःपर्यायवचनो दर्शनशब्दः, प्राण्यङ्गवचन इहाश्रीयते॥

अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवो- र्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिश्श्रेयसपुरुषायुषद्व्या- युषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः ॥ ७७ ॥

अच्प्रत्ययान्ता एते शब्दा निपात्यन्ते। समासे व्यवस्थापि निपातनादेव प्रतिपत्तव्या। आद्यास्त्रयो बहुव्रीहयः। अदृश्यान्यविद्यमानानि वा चत्वारि यस्य सोऽचतुरः। विगतानि चत्वारि यस्य स विचतुरः। शोभनानि चत्वारि यस्य स सुचतुरः। ततः पर एकादश द्वन्द्वाः। स्त्री च पुमांश्च स्त्रीपुंसौ। इह न भवति—स्त्रियाः पुमान् स्त्रीपुमानिति। धेनुश्च अनड्वांश्च धेन्वनडुहौ। ऋक् च साम च ऋक्सामे। वाक् च मनश्च वाङ्मनसे। अक्षि च भ्रुवौ च अक्षिभ्रुवम्। दाराश्च गावश्च दारगवम्। ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवम्। टिलोपो निपात्यते। पादौ च अष्ठीवन्तौ च पदष्ठीवम्। पादस्य पद्भावो निपात्यते। नक्तं च दिवा च नक्तंदिवम्। सप्तम्यर्थवृत्तयोरव्ययोः समासोऽपि निपातनादेव। रात्रौ च दिवा च रात्रिंदिवम्। पूर्वपदस्य मान्तत्वं निपात्यते। अहनि च दिवा च अहर्दिवम्। ननु च पर्यायावेतौ कथमनयोर्द्वन्द्वः ? वीप्सायां द्वन्द्वो निपात्यते। अहन्यहनीत्यर्थः। एकोऽ- व्ययीभावः साकल्ये—सरजसमभ्यवहरति। बहुव्रीहौ न भवति। सह रजसा सरजः पङ्कजमिति। ततस्तत्पुरुषः—निश्चितं श्रेयो निश्श्रेयसम्। निश्श्रेयस्कः पुरुष इत्यत्र न भवति। ततः षष्ठीसमासः। पुरुषस्यायुः पुरुषायुषम्। द्वन्द्वे न भवति—पुरुषश्च आयुश्च पुरुषायुषी। ततो द्विगू—द्वे आयुषी समाहृते द्व्यायुषम्। त्र्यायुषम्। इह न भवति—

द्वयोरायुर्द्व्यायुः, त्र्यायुरिति। ततो द्वन्द्वः—ऋक् च यजुश्च ऋग्यजुषम्। इह न भवति—ऋग् यजुरस्योन्मुग्धस्य ऋग्यजुरुन्मुग्धः। जातादिपूर्वपदा उक्षशब्दान्तास्त्रयः कर्मधारयाः—जातोक्षः। महोक्षः। वृद्धोक्षः। बहुव्रीहौ न भवति—जातोक्षा ब्राह्मणः, महोक्षा, वृद्धोक्षेति। ततोऽव्ययीभावः—शुनः समीपमुपशुनम्। टिलोपाभावः संप्रसारणं च निपातनादेव। ततः सप्तमीसमासः—गोष्ठे श्वा गोष्ठश्वः॥ चतुरोऽच्प्रकरणे त्र्युपाभ्यामुपसंख्यानम्॥ त्रिचतुराः। उपचतुराः॥

ब्रह्महस्तिभ्यां वर्चसः ॥ ७८ ॥

ब्रह्महस्तिभ्यां परो यो वर्चःशब्दस्तदन्तात् समासादच् प्रत्ययो भवति। ब्रह्मवर्चसम्। हस्तिवर्चसम्॥ पल्यराजभ्यां चेति वक्तव्यम्॥ पल्यवर्चसम्। राजवर्चसम्॥

अवसमन्धेभ्यस्तमसः ॥ ७९ ॥

अव सम् अन्ध इत्येतेभ्यो यः परस्तमःशब्दः, तदन्तात् समासादच् प्रत्ययो भवति। अवतमसम्। सन्तमसम्। अन्धतमसम्॥

श्वसो वसीयःश्रेयसः ॥ ८० ॥

श्वसः परौ यौ वसीयःश्रेयःशब्दौ तदन्तात् समासादच् प्रत्ययो भवति। श्वोवसीयसम्। श्वःश्रेयसम्। मयूरव्यंसकादित्वात् समासः। स्वभावात् चेह श्वःशब्द उत्तरपदार्थस्य प्रशंसामाशीर्विषयामाचष्टे—श्वःश्रेयसं ते भूयात्। शोभनं श्रेयस्ते भूयादित्यर्थः। श्वोवसीयसमित्यस्यैवायं पर्यायः॥

अन्ववतप्ताद्रहसः ॥ ८१ ॥

अनु अव तप्त इत्येतेभ्यः परो यो रहश्शब्दस्तदन्तात् समासादच् प्रत्ययो भवति। अनुरहसम्। अवरहसम्। तप्तरहसम्॥

प्रतेरुरसः सप्तमीस्थात् ॥ ८२ ॥

प्रतेः परो य उरःशब्दस्तदन्तात् समासादच् प्रत्ययो भवति, स चेदुरःशब्दः सप्तमीस्थो भवति। सप्तम्यर्थे वर्तत इत्यर्थः। उरसि वर्तते। विभक्त्यर्थे 'अव्ययम्०' (२.१.६) इति समासः। प्रत्युरसम्। सप्तमीस्थादिति किम् ? प्रतिगतमुरः प्रत्युरः॥

अनुगवमायामे ॥ ८३ ॥

अनुगवमित्यच्प्रत्ययान्तं निपात्यत आयामेऽभिधेये। अनुगवं यानम्। 'यस्य चायामः' (२.१.१६) इति समासः। आयाम इति किम् ? गवां पश्चादनुगु॥

द्विस्तावा त्रिस्तावा वेदिः ॥ ८४ ॥

द्विस्तावा त्रिस्तावेति निपात्यते, वेदिश्चेदभिधेया भवति। अच्प्रत्ययष्टिलोपः समासश्च निपात्यते। यावती प्रकृतौ वेदिस्ततो द्विगुणा वा त्रिगुणा वा कस्याञ्चिद् विकृतौ, तत्रेदं निपातनम्। द्विस्तावा वेदिः। त्रिस्तावा वेदिः। वेदिरिति किम् ? द्विस्तावती, त्रिस्तावती रज्जुः॥

उपसर्गादध्वनः ॥ ८५ ॥

उपसर्गात् परो योऽध्वन्शब्दस्तदन्तात् समासाद् अच् प्रत्ययो भवति। प्रगतोऽध्वानं प्राध्वो रथः। प्राध्वं शकटम्। निरध्वम्। प्रत्यध्वम्। उपसर्गादिति किम् ? परमाध्वा। उत्तमाध्वा॥

तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः ॥ ८६ ॥

अङ्गुलिशब्दान्तस्य तत्पुरुषस्य संख्यादेरव्ययादेश्चाच् प्रत्ययो भवति। द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम्। त्र्यङ्गुलम्। 'तद्धितार्थो०' (२.१.५१) इति समासः। 'प्रमाणे लो द्विगोर्नित्यम्' (वा० ५.२.३७) इति मात्रचो लोपः। अव्ययादेः—निर्गतमङ्गुलिभ्यो निरङ्गुलम्। अत्यङ्गुलम्। तत्पुरुषस्येति किम् ? पञ्चाङ्गुलिः। अत्यङ्गुलिः पुरुषः। तत्पुरुषाधिकारश्च 'द्वन्द्वाच्चुदषहान्तादृ०' (५.४.१०६) इति यावत्॥

अहःसर्वैकदेशसंख्यातपुण्याच्च रात्रेः ॥ ८७ ॥

अहरादिभ्यः परो यो रात्रिशब्दः तदन्तस्य तत्पुरुषस्याच् प्रत्ययो भवति, चकारात् संख्यादेरव्ययादेश्च। अहर्ग्रहणं द्वन्द्वार्थम्। अहश्च रात्रिश्च अहोरात्रः। सर्वरात्रः। एकदेशे—पूर्वं रात्रेः पूर्वरात्रः। अपररात्रः। 'पूर्वापराधरो०' (२.२.१) इति समासः। संख्याता रात्रिः संख्यातरात्रः। 'विशेषणं विशेष्येण०' (२.१.५७) इति समासः। एवं पुण्या रात्रिः पुण्यरात्रः। संख्याव्ययादेः खल्वपि—द्वे रात्री समाहृते द्विरात्रः। त्रिरात्रः। अतिक्रान्तो रात्रिम् अतिरात्रः। नीरात्रः॥

अह्नोऽह्न एतेभ्यः ॥ ८८ ॥

'राजाहःसखिभ्यष्टच्' (५.४.९१) इति वक्ष्यति। तस्मिन् परभूतेऽहन्नित्ये-

तस्याह्न इत्ययमादेशो भवत्येतेभ्य उत्तरस्य। संख्याव्ययादयः प्रक्रान्ताः सर्वनाम्ना प्रत्यवमृश्यन्ते। सामर्थ्याच्चाहःशब्दः पूर्वत्वेन नाश्रीयते। परिशिष्टानां ग्रहणम्। न ह्यहःशब्दात् परोऽहः शब्दः संभवति। संख्यायास्तावत्—द्वयोरह्नोर्भवो द्व्यह्नः, त्र्यह्नः। अव्ययात्—अहरतिक्रान्तोऽत्यह्नः। निरह्नः। सर्वाह्नः। पूर्वाह्नः। अपराह्नः। संख्याताह्नः। पुण्यशब्दात् प्रतिषेधं वक्ष्यति॥

न संख्यादेः समाहारे ॥ ८६ ॥

संख्यादेस्तत्पुरुषस्य समाहारे वर्तमानस्याहःशब्दस्याह्नादेशो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। द्वे अहनी समाहृते द्व्यहः। त्र्यहः। समाहार इति किम् ? द्वयोरह्नोर्भवो द्व्यह्नः। त्र्यह्नः। 'तद्धितार्थो०' (२.१.५१) इति समासे कृतेऽण आगतस्य ' द्विगोः० ' (४.१.८८) इति लुक्॥

उत्तमैकाभ्यां च ॥ ९० ॥

उत्तमैकशब्दाभ्यां च परस्याह्न इत्ययमादेशो न भवति। उत्तमशब्दोऽन्त्यवचनः पुण्यशब्दमाचष्टे। पुण्यग्रहणमेव न कृतं वैचित्र्यार्थम्। पुण्याहः। एकाहः। केचित् तु उपोत्तमस्यापि प्रतिपत्त्यर्थं वर्णयन्ति। तेन संख्यातशब्दादपि परस्य न भवति—संख्याताह इति॥

राजाहःसखिभ्यष्टच् ॥ ९१ ॥

राजन् अहन् सखि इत्येवमन्तात् तत्पुरुषात् प्रातिपदिकात् टच् प्रत्ययो भवति। महाराजः। मद्रराजः। परमाहः। उत्तमाहः। राज्ञः सखा राजसखः। ब्राह्मणसखः। इह कस्माद् न भवति—मद्राणां राज्ञी मद्रराज्ञी, लिङ्गविशिष्टपरिभाषया (परि० ७१) प्राप्नोति? लघ्वक्षरस्य पूर्वनिपाते प्राप्ते राजशब्दस्य सवर्णदीर्घार्थं प्रथमं प्रयोगं कुर्वन्नेतद् ज्ञापयति—यस्याकारेण सवर्णदीर्घत्वं संभवति तस्येदं ग्रहणमिति॥

गोरतद्धितलुकि ॥ ९२ ॥

गोशब्दान्तात् तत्पुरुषात् टच् प्रत्ययो भवति, स चेत् तत्पुरुषस्तद्धितलुग्विषयो न भवति। परमगवः। उत्तमगवः। पञ्चगवम्। दशगवम्। अतद्धितलुकीति किम् ? पञ्चभिर्गोभिः क्रीतः पञ्चगुः। दशगुः। 'तेन क्रीतम्' (५.१.३७) इत्यागतस्यार्हीयस्य ठको 'अध्यर्धपूर्वद्विगोः०' (५.१.२८) इति लुक्। तद्धितग्रहणं किम् ? सुब्लुकि प्रतिषेधो

---

१ - ' तत्पुरुषात् ' इति नास्ति मुद्रितेषु।

मा भूत्। राजगवमिच्छति राजगवीयति। लुग्ग्रहणं किम् ? तद्धित एव मा भूत्। पञ्चभ्यो गोभ्य आगतं पञ्चगवरूप्यम्। पञ्चगवमयम्। दशगवरूप्यम्। दशगवमयम्॥

अग्राख्यायामुरसः ॥ ६३ ॥

उरःशब्दान्तात् तत्पुरुषात् टच् प्रत्ययो भवति, स चेदुरःशब्दोऽग्राख्यायां भवति। अग्रं प्रधानमुच्यते। यथा शरीरावयवानामुच्यत उरः प्रधानम्, एवमन्योऽपि प्रधानभूत उरःशब्देनोच्यते। अश्वानामुरः अश्वोरसम्। हस्त्युरसम्। रथोरसम्। अग्राख्यायामिति किम् ? देवदत्तस्योरः देवदत्तोरः॥

अनोऽश्मायःसरसां जातिसंज्ञयोः ॥ ६४ ॥

अनस् अश्मन् अयस् सरस् इत्येवमन्तात् तत्पुरुषात् टच् प्रत्ययो भवति जातौ संज्ञायां च विषये। उपानसमिति जातिः। महानसमिति संज्ञा। अमृताश्म इति जातिः। पिण्डाश्म इति संज्ञा। कालायसमिति जातिः। लोहितायसमिति संज्ञा। मण्डूकसरसमिति जातिः। जलसरसमिति संज्ञा। जातिसंज्ञयोरिति किम् ? सदनः। सदश्मा। सत्सरः॥

ग्रामकौटाभ्यां च तक्ष्णः ॥ ६५ ॥

जातिसंज्ञयोरिति नानुवर्तते। ग्रामकौटाभ्यां परो यस्तक्षन्शब्दस्तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति। ग्रामस्य तक्षा ग्रामतक्षः। बहूनां साधारण इत्यर्थः। कुट्यां भवः कौटः, तस्य तक्षा कौटतक्षः। स्वतन्त्रः कर्मजीवी, न कस्यचित् प्रतिबद्ध इत्यर्थः। ग्रामकौटाभ्यामिति किम् ? राजतक्षा॥

अतेः शुनः ॥ ६६ ॥

अतिशब्दात् परो यः श्वन्शब्दस्तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति। अतिक्रान्तः श्वानम् अतिश्वो वराहः। जववानित्यर्थः। अतिश्वः सेवकः। सुष्ठु स्वामिभक्त इत्यर्थः। अतिश्वी सेवा। अतिनीचेत्यर्थः॥

उपमानादप्राणिषु ॥ ६७ ॥

उपमानवाची यः श्वन्शब्दोऽप्राणिषु वर्तते, तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति। आकर्षः श्वेव आकर्षश्वः। फलकश्वः। 'उपमितं व्याघ्रादिभिः०' (२.१.५६) इति समासः। उपमानादिति किम् ? न श्वा अश्वा लोष्टः। अप्राणिष्विति किम् ? वानरः श्वेव वानरश्वा॥

उत्तरमृगपूर्वाच्च सक्थ्नः ॥ ९८ ॥

उत्तर मृग पूर्व इत्येतेभ्यः परो यः सक्थिशब्दः, चकारादुपमानात् च, तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति समासान्तः। उत्तरसक्थम्। मृगसक्थम्। पूर्वसक्थम्। उपमानात् खल्वपि—फलकमिव सक्थि फलकसक्थम्॥

नावो द्विगोः ॥ ९९ ॥

नौशब्दान्ताद् द्विगोष्टच् प्रत्ययो भवति समासान्तः। द्वे नावौ समाहृते द्विनावम्। त्रिनावम्। द्विनावधनः। पञ्चनावप्रियः। द्वाभ्यां नौभ्यामागतं द्विनावरूप्यम्। द्विनावमयम्। द्विगोरिति किम् ? राजनौः। अतद्धितलुकीत्येव—पञ्चभिर्नौभिः क्रीतः पञ्चनौः। दशनौः॥

अर्धाच्च ॥ १०० ॥

अर्धशब्दात् परो यो नौशब्दस्तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति। अर्धं नावोऽर्धनावम्। 'अर्धं नपुंसकम्' (२.२.२) इति समासः। परवल्लिङ्गं न भवति, लोकाश्रयत्वाल्लिङ्गस्य॥

खार्याः प्राचाम् ॥ १०१ ॥

द्विगोरर्धाच्चेति द्वयमप्यनुवर्तते। खारीशब्दान्ताद् द्विगोरर्धात् च परो यः खारीशब्दस्तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति प्राचामाचार्याणां मतेन। द्वे खार्यौ समाहृते द्विखारम्, द्विखारि। त्रिखारम्, त्रिखारि। अर्धं खार्या अर्धखारम्, अर्धखारी॥

द्वित्रिभ्यामञ्जलेः ॥ १०२ ॥

द्वित्रिभ्यां परो योऽञ्जलिशब्दस्तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवति। द्वावञ्जली समाहृतौ द्व्यञ्जलम्। त्र्यञ्जलम्। द्विगोरित्येव—द्वयोरञ्जलिर्द्व्यञ्जलिः। अतद्धितलुकीत्येव—द्वाभ्यामञ्जलिभ्यां क्रीतो द्व्यञ्जलिः। त्र्यञ्जलिः। प्राचामित्येव—द्व्यञ्जलिप्रियः॥

अनसन्तान्नपुंसकाच्छन्दसि ॥ १०३ ॥

अन्नन्तादसन्तात् च नपुंसकलिङ्गात् तत्पुरुषात् टच् प्रत्ययो भवति छन्दसि विषये। हस्तिचर्मे जुहोति। ऋषभचर्मेऽध्यभिषिच्यते (काठ० सं० ३७.३)। असन्तात्—

---

१ - ' उपमानम् ' इत्यपपाठो मुद्रितेषु ।

२ - ' अर्धखारि ' इति है० । तत्राभिधेयस्य नपुंसकत्वाद् लौकिकं ह्रस्वत्वम् ।

देवच्छन्दऽसानि (मै० सं० ३.२.६)। मनुष्यच्छन्दऽसम् (तै० सं० ५.४.८.६)। अनसन्तादिति किम् ? बिल्वदारु जुहोति। नपुंसकादिति किम् ? सुत्रामाणं पृथिवीं द्यामनेऽहसम् (ऋ० १०.६३.१०)॥ अनसन्तान्नपुंसकाच्छन्दसि वावचनम्॥ ब्रह्मसाम (ता० ब्रा० ४.३.१)। देवच्छन्दः (शां० ब्रा० १.५)। ब्रह्मसाममम् (तै० सं० १.८.१८.१)। देवच्छन्दऽसम् (तै० सं० ५.४.८.५)॥

ब्रह्मणो जानपदाख्यायाम् ॥ १०४ ॥

ब्रह्मन्शब्दान्तात् तत्पुरुषात् टच् प्रत्ययो भवति, समासेन चेद् ब्रह्मणो जानपदत्वमाख्यायते। जनपदेषु भवो जानपदः। यस्य तत्पुरुषस्य जनपदशब्दः पूर्वपदं तस्मादेतत् प्रत्ययविधानम्। सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः। अवन्तिब्रह्मः। योगविभागात् सप्तमीसमासः। जानपदाख्यायामिति किम् ? देवब्रह्मा नारदः॥

कुमहद्भ्यामन्यतरस्याम् ॥ १०५ ॥

कुमहद्भ्यां परो यो ब्रह्मा तदन्तात् तत्पुरुषात् टच् प्रत्ययो भवत्यन्यतरस्याम्। कुब्रह्मः, कुब्रह्मा। महाब्रह्मः, महाब्रह्मा। ब्राह्मणपर्यायो ब्रह्मन्शब्दः॥

द्वन्द्वाच्चुदषहान्तात् समाहारे ॥ १०६ ॥

तत्पुरुषाधिकारो निवृत्तः। द्वन्द्वात् चवर्गान्तात् दकारान्तात् षकारान्तात् हकारान्तात् च टच् प्रत्ययो भवति, स चेद् द्वन्द्वः समाहारे वर्तते, नेतरेतरयोगे। वाक् च त्वक् च वाक्त्वचम्। स्रक् च त्वक् च स्रक्त्वचम्। श्रीस्रजम्। इडूर्जम्। वागूर्जम्। समिद्दृषदम्। संपद्विपदम्। वाग्विप्रुषम्। छत्रोपानहम्। धेनुगोदुहम्। द्वन्द्वादिति किम्? तत्पुरुषाद् मा भूत्—पञ्च वाचः समाहताः पञ्चवाक्। चुदषहान्तादिति किम् ? वाक्समित्। समाहार इति किम् ? प्रावृट्शरदौ॥

अव्ययीभावे शरत्प्रभृतिभ्यः ॥ १०७ ॥

शरदित्येवमादिभ्यः प्रातिपदिकेभ्यष्टच् प्रत्ययो भवत्यव्ययीभावे। शरदः समीपम् उपशरदम्। प्रतिशरदम्। उपविपाशम्। प्रतिविपाशम्। अव्ययीभाव इति किम् ? परमशरत्। येऽत्र झयन्ताः पठ्यन्ते तेषां नित्यार्थं ग्रहणम्। स्वर्यते चेदमव्ययीभावग्रहणं प्राग् बहुव्रीहेः॥ शरत्। विपाश्। अनस्। मनस्। उपानह्। दिव्। हिमवत्। अनडुह्। दिश्। दृश्। चतुर्। यद्। तद्। जराया जरश्च (ग० सू० १६०)। प्रतिपरसमनुभ्योऽक्ष्णः (ग० सू० १६१)। पथिन्। प्रत्यक्षम्। परोक्षम्। समक्षम्। अन्वक्षम्। प्रतिपथम्। परपथम्। संपथम्। अनुपथम्॥

अनश्च ॥ १०८ ॥

अन्नन्तादव्ययीभावात् टच् प्रत्ययो भवति समासान्तः। उपराजम्। प्रतिराजम्। अध्यात्मम्। प्रत्यात्मम्॥

नपुंसकादन्यतरस्याम् ॥ १०९ ॥

अन इत्येव। नपुंसकग्रहणमुत्तरपदविशेषणम्। अन्नन्तं यद् नपुंसकं तदन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति समासान्तः। पूर्वेण नित्ये प्राप्ते विकल्प्यते। प्रतिचर्मम्, प्रतिचर्म। उपचर्मम्, उपचर्म॥

नदीपौर्णमास्याग्रहायणीभ्यः ॥ ११० ॥

नदी पौर्णमासी आग्रहायणी इत्येवमन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति। नद्याः समीपम् उपनदम्, उपनदि। उपपौर्णमासम्, उपपौर्णमासि। उपाग्रहायणम्, उपाग्रहायणि॥

झयः ॥ १११ ॥

झय इति प्रत्याहारग्रहणम्। झयन्तादव्ययीभावादन्यतरस्यां टच् प्रत्ययो भवति। उपसमिधम्। उपसमित्। उपदृषदम्। उपदृषत्॥

गिरेश्च सेनकस्य ॥ ११२ ॥

गिरिशब्दान्तादव्ययीभावात् टच् प्रत्ययो भवति सेनकस्याचार्यस्य मतेन। अन्तर्गिरम्, अन्तर्गिरि। उपगिरम्, उपगिरि। सेनकग्रहणं पूजार्थम्। विकल्पोऽनुवर्तत एव॥

बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥ ११३ ॥

स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद् बहुव्रीहेः षच् प्रत्ययो भवति समासान्तः। अयमर्थोऽभिप्रेतः। सूत्रे तु दुःश्लिष्टविभक्तीनि पदानि। दीर्घं सक्थि यस्य दीर्घसक्थः। कल्याणाक्षः। लोहिताक्षः। विशालाक्षः। बहुव्रीहाविति किम् ? परमसक्थि। परमाक्षि। सक्थ्यक्ष्णोरिति किम् ? दीर्घजानुः। सुबाहुः। स्वाङ्गादिति किम् ? दीर्घसक्थि शकटम्। स्थूलाक्षिः इक्षुः। टचि प्रकृते षज्ग्रहणं स्वरार्थम्। दीर्घसक्थी स्त्री। 'सक्थं

---

१ - सविसर्जनीयोऽपपाठो मुद्रितेषु। २ - इतः पूर्वं 'चक्रसक्थी स्त्री' इत्यधिकः पाठो मुद्रितेषु। स तु न युक्तः, न्यासपदमञ्जर्योरव्याख्यातत्वात्। कैयटोऽप्यत्रानुसन्धेयः।

चाक्रान्तात्' (६.२.१९८) इति विभाषयोत्तरपदस्यान्तोदात्तता विधीयते। तत्र यस्मिन् पक्षे नास्त्युदात्तत्वं तत्र ङीपि सत्युदात्तनिवृत्तिस्वरस्याभावादनुदात्तः श्रूयेत। ङीषि तु सर्वत्रोदात्तः सिद्धो भवति। बहुव्रीहिग्रहणम् आ पादपरिसामाप्तेरनुवर्तते॥

अङ्गुलेर्दारुणि ॥ ११४ ॥

अङ्गुलिशब्दान्ताद् बहुव्रीहेः षच् प्रत्ययो भवति समासान्तो दारुणि समासार्थे। द्व्यङ्गुलं दारु। त्र्यङ्गुलं दारु। पञ्चाङ्गुलं दारु। अङ्गुलिसदृशावयवं धान्यादीनां विक्षेपणकाष्ठमुच्यते। यस्य तु द्वे अङ्गुली प्रमाणं दारुणस्तत्र 'तद्धितार्थो०' (२.१.५१) इति समासे कृते 'तत्पुरुषस्याङ्गुलेः०' (५.४.८६) इत्यचा भवितव्यम्। दारुणीति किम्? पञ्चाङ्गुलिर्हस्तः॥

द्वित्रिभ्यां ष मूर्ध्नः ॥ ११५ ॥

द्वित्रिभ्यां परो यो मूर्धन्शब्दस्तदन्ताद् बहुव्रीहेः षः प्रत्ययो भवति समासान्तः। द्विमूर्धः। त्रिमूर्धः। द्वित्रिभ्यामिति किम् ? उच्चैर्मूर्धा॥

अप् पूरणीप्रमाण्योः ॥ ११६ ॥

पूरणप्रत्ययान्ताः स्त्रीलिङ्गाः शब्दाः पूरणीग्रहणेन गृह्यन्ते। प्रमाणीति स्वरूपग्रहणम्। पूरण्यन्तात् प्रमाण्यन्तात् च बहुव्रीहेरप् प्रत्ययो भवति समासान्तः। कल्याणी पञ्चमी आसां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः। कल्याणीदशमा रात्रयः। स्त्री प्रमाणी एषां स्त्रीप्रमाणाः कुटुम्बिनः। भार्याप्रधाना इत्यर्थः॥ अपि प्रधानपूरणीग्रहणं कर्तव्यम्॥ यत्रान्यपदार्थे पूरण्यनुप्रविशति न केवलं वर्तिपदार्थ एव, तत्र पूरण्याः प्राधान्यम्। पुंवद्भावप्रतिषेधेऽपि प्रधानपूरण्येव गृह्यते। इह न भवति—कल्याणी पञ्चमी अस्मिन् पक्षे कल्याणपञ्चमीकः पक्ष इति ॥ नेतुर्नक्षत्र उपसंख्यानम्॥ मृगो नेता आसां रात्रीणां मृगनेत्रा रात्रयः। पुष्यनेत्राः। नक्षत्र इति किम् ? देवदत्तनेतृकाः॥ छन्दसि च नेतुरुपसंख्यानम्॥ बृह॒स्पतिनेत्रा दे॒वाः (तै० सं० १.८.७.१)। सो॑मनेत्राः (मै० सं० २. ६.३) ॥ मासाद् भृतिप्रत्ययपूर्वपदाट् ठञ्विधिः॥ पञ्चको मासोऽस्य पञ्चकमासिकः कर्मकरः। दशकमासिकः। 'सोऽस्यांशवस्नभृतयः' (५.१.५६) इति 'संख्याया अतिशदन्तायाः कन्' (५.१.२२)॥

अन्तर्बहिर्भ्यां च लोम्नः ॥ ११७ ॥

अन्तर् बहिस् इत्येताभ्यां परो यो लोमन्शब्दस्तदन्ताद् बहुव्रीहेरप् प्रत्ययो भवति।

अन्तर्गतानि लोमान्यस्य अन्तर्लोमः प्रावारः। बहिर्लोमः पटः॥

अञ् नासिकायाः संज्ञायां नसं चास्थूलात् ॥ ११८ ॥

नासिकान्ताद् बहुव्रीहेरच् प्रत्ययो भवति नासिकाशब्दश्च नसमादेशमापद्यते। अस्थूलादिति नासिकाविशेषणम्, न चेत् स्थूलशब्दात् परा नासिका भवतीति। संज्ञायामिति समुदायोपाधिः। द्रुरिव नासिकास्य द्रुणसः। वाद्ध्रीणसः। 'पूर्वपदात् संज्ञायामगः' (८.४.३) इति णत्वम्। गोनसः। संज्ञायामिति किम् ? तुङ्गनासिकः। अस्थूलादिति किम्? स्थूलनासिको वराहः॥ खुरखराभ्यां नस् वक्तव्यः॥ खुरणाः। खरणाः। पक्षेऽच्प्रत्ययोऽपीष्यते। खुरणसः। खरणसः। शितिनाः, अहिनाः, अर्चना इति निगम इष्यते॥

उपसर्गाच्च ॥ ११९ ॥

उपसर्गात् परो यो नासिकाशब्दस्तदन्ताद् बहुव्रीहेरच् प्रत्ययो भवति, नासिकाशब्दश्च नसमापद्यते। असंज्ञार्थं वचनम्। उन्नता नासिकास्य उन्नसः। प्रणसः। 'उपसर्गाद् बहुलम्' (८.४.२८) इति णत्वम् ॥ वेग्रो वक्तव्यः॥ विगता नासिकास्य विग्रः॥

सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ १२० ॥

सुप्रातादयो बहुव्रीहिसमासा अच्प्रत्ययान्ता निपात्यन्ते। अन्यदपि च टिलोपादिकं निपातनादेव सिद्धम्। शोभनं प्रातरस्य सुप्रातः (शौ० सं० १९.८.३)। शोभनं श्वोऽस्य सुश्वः। शोभनं दिवास्य सुदिवः (ऋ० १०.३.५)। शारेरिव कुक्षिरस्य शारिकुक्षः। चतस्रोऽश्रयोऽस्य चतुरश्रः। एण्या इव पादावस्य एणीपदः। अजस्येव पादावस्य अजपदः। प्रोष्ठो गौः, तस्येव पादावस्य प्रोष्ठपदः (तै० सं० ४.४.१०.३)॥

नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् ॥ १२१ ॥

नञ् दुस् सु इत्येतेभ्यः परौ यौ हलिसक्थिशब्दौ तदन्तात् बहुव्रीहेरन्यतरस्यामच् प्रत्ययो भवति समासान्तः। अविद्यमाना हलिरस्य अहलः, अहलिः। दुर्हलः, दुर्हलिः। सुहलः, सुहलिः। अविद्यमानं सक्थ्यस्य असक्थः, असक्थिः। दुःसक्थः, दुःसक्थिः। सुसक्थः, सुसक्थिः। हलिशक्त्योरिति केचित् पठन्ति। अविद्यमाना शक्तिरस्य अशक्तः, अशक्तिः। विरूपा शक्तिरस्य दुःशक्तः, दुःशक्तिः। शोभना शक्तिरस्य सुशक्तः, सुशक्तिः॥

---

१ - ' खरणसः ' इत्यधिकं क्वचित् ।

नित्यमसिच् प्रजामेधयोः ॥ १२२ ॥

नञ्दुस्सुभ्य इत्येव। नञ् दुस् सु इत्येतेभ्यः परौ यौ प्रजामेधाशब्दौ तदन्ताद् बहुव्रीहे- र्नित्यमसिच् प्रत्ययो भवति समासान्तः। अविद्यमाना प्रजास्य अप्रजाः। दुष्प्रजाः। सुप्रजाः। अविद्यमाना मेधास्य अमेधाः। दुर्मेधाः। सुमेधाः। नित्यग्रहणं किम्, यावता पूर्वसूत्रेऽन्यतरस्यांग्रहणं नैव स्वर्यते ? एवं तर्हि नित्यग्रहणादन्यत्रापि भवतीति सूच्यते।

श्रोत्रियस्येव ते राजन् मन्दकस्याल्पमेधसः।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी॥

बहुप्रजाश्छन्दसि ॥ १२३ ॥

बहुप्रजा इति छन्दसि निपात्यते। बहुप्र[1]जा निर्ऋतिमाविवेश (ऋ० १.१६४.३२)। छन्दसीति किम् ? बहुप्रजो ब्राह्मणः॥

धर्मादनिच् केवलात् ॥ १२४ ॥

केवलाद् यो धर्मशब्दः तदन्ताद् बहुव्रीहेरनिच्प्रत्ययो भवति समासान्तः। कल्याणो धर्मोऽस्य कल्याणधर्मा। प्रियधर्मा। केवलादिति किम् ? परमः स्वो धर्मोऽस्य परम-स्वधर्मः। यद्येवं त्रिपदे बहुव्रीहौ प्राप्नोति—परमः स्वो धर्मोऽस्येति ? एवं तर्हि केवला-दिति पूर्वपदं निर्दिश्यते, केवलाद् पदाद् यो धर्मशब्दो न पदसमुदायात्, तदन्ताद् बहुव्रीहेः प्रत्ययः॥

जम्भा सुहरिततृणसोमेभ्यः ॥ १२५ ॥

बहुव्रीहौ समासे स्वादिभ्यः परं जम्भेति कृतसमासान्तमुत्तरपदं निपात्यते। जम्भ-शब्दोऽभ्यवहार्यवाची दन्तविशेषवाची च। शोभनो जम्भोऽस्य सुजम्भा देवदत्तः। शोभनाभ्यव-हार्यः शोभनदन्तो वा। एवं हरितजम्भा। तृणजम्भा। सोमजम्भा। दन्तवचने—तृणमिव जम्भोऽस्य, सोम इव जम्भोऽस्येति विग्रहीतव्यम्। सुहरिततृणसोमेभ्य इति किम्? पतितजम्भः॥

---

१ – 'केवलः' इति पाठान्तरम्।

२ – 'असमस्तः' इत्यधिकं यथान्यासम्।

३ – द्विपदोऽत्र बहुव्रीहिरभिप्रेतः।

दक्षिणेर्मा लुब्धयोगे ॥ १२६ ॥

दक्षिणेर्मेति कृतसमासान्तो निपात्यते बहुव्रीहौ समासे लुब्धयोगे। लुब्धो व्याधः। दक्षिणमीर्ममस्य दक्षिणेर्मा मृगः। ईर्मं व्रणमुच्यते। दक्षिणमङ्गं व्रणितमस्य व्याधेनेत्यर्थः। लुब्धयोग इति किम् ? दक्षिणेर्मं शकटम्॥

इच् कर्मव्यतिहारे ॥ १२७ ॥

कर्मव्यतिहारे यो बहुव्रीहिस्तस्मादिच् प्रत्ययो भवति। 'तत्र तेनेदमिति सरूपे' (२.२.२७) इत्ययं बहुव्रीहिर्गृह्यते। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। कचाकचि। मुसलैश्च मुसलैश्च प्रहृत्य इदं युद्धं प्रवृत्तं मुसलामुसलि। दण्डादण्डि। तिष्ठद्गुप्रभृतिषु (२.१.१७) अयमिच् प्रत्ययः पठ्यते॥

द्विदण्ड्यादिभ्यश्च ॥ १२८ ॥

द्विदण्ड्यादयः शब्दा इच्प्रत्ययान्ताः साधवो भवन्ति। द्विदण्ड्यादिभ्य इति तादर्थ्य एषा चतुर्थी, न पञ्चमी। द्विदण्ड्याद्यर्थमिच् प्रत्ययो भवति। तथा भवति यथा द्विदण्ड्यादयः सिध्यन्तीत्यर्थः। समुदायनिपातनाच्चार्थविशेषेऽवरुध्यन्ते। द्विदण्डि प्रहरति। द्विमुसलि प्रहरति। इह न भवति—द्विदण्डा शालेति। बहुव्रीह्यधिकारेऽपि तत्पुरुषात् क्वचिद् विधानमिच्छन्ति। निकुच्य कर्णौ धावति। निकुच्यकर्णि धावति। प्रोह्य पादौ हस्तिनं वाहयति। प्रोह्यपादि हस्तिनं वाहयति। मयूरव्यंसकादित्वात् (२.१.७२) समासः॥ द्विदण्डि। द्विमुसलि। उभाञ्जलि। उभयाञ्जलि। उभाकर्णि। उभयाकर्णि। उभादन्ति। उभयादन्ति। उभाहस्ति। उभयाहस्ति। उभापाणि। उभयापाणि। उभाबाहु। उभयाबाहु। एकपदि। प्रोह्यपदि। आढ्यपदि। सपदि। निकुच्यकर्णि। संहतपुच्छि। उभाबाहु, उभयाबाह्विति निपातनादिच्प्रत्ययलोपः। प्रत्ययलक्षणेनाव्ययीभावसंज्ञा॥

प्रसम्भ्यां जानुनोर्ज्ञुः ॥ १२९ ॥

प्र सम् इत्येताभ्यामुत्तरस्य जानुशब्दस्य ज्ञुरादेशो भवति समासान्तो बहुव्रीहौ। प्रकृष्टे जानुनी अस्य प्रज्ञुः। संज्ञुः॥

ऊर्ध्वाद् विभाषा ॥ १३० ॥

ऊर्ध्वशब्दादुत्तरस्य जानुशब्दस्य विभाषा ज्ञुरित्ययमादेशो भवति। ऊर्ध्वे जानुनी अस्य ऊर्ध्वजानुः, ऊर्ध्वज्ञुः॥

---

१ - 'लुब्धो व्याधः' इति पाठः पदमञ्जर्यां सन्नपि है० सं० त्यक्तः।

ऊधसोऽनङ् ॥ १३१ ॥

ऊधःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः। कुण्डमिव ऊधोऽस्याः सा कुण्डोध्नी। घटोध्नी॥ ऊधसोऽनङि स्त्रीग्रहणं कर्तव्यम्॥ इह मा भूत्—महोधाः पर्जन्यः। घटोधो धैनुकम्॥

धनुषश्च ॥ १३२ ॥

धनुःशब्दान्तस्य बहुव्रीहेरनङादेशो भवति समासान्तः। शार्ङ्गं धनुरस्य शार्ङ्गधन्वा। गाण्डीवधन्वा। पुष्पधन्वा। अधिज्यधन्वा॥

वा संज्ञायाम् ॥ १३३ ॥

धनुःशब्दान्ताद् बहुव्रीहेरनङादेशो वा भवति संज्ञायां विषये। पूर्वेण नित्यः प्राप्तो विकल्प्यते। शतधनुः, शतधन्वा। दृढधनुः, दृढधन्वा॥

जायाया निङ् ॥ १३४ ॥

जायाशब्दान्तस्य बहुव्रीहेर्निङादेशो भवति। युवतिर्जाया यस्य युवजानिः। वृद्धजानिः॥

गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥ १३५ ॥

उत् पूति सु सुरभि इत्येतेभ्यः परस्य गन्धशब्दस्य इकारादेशो भवति समासान्तो बहुव्रीहौ समासे। तकार उच्चारणार्थः। उद्गतो गन्धोऽस्य उद्गन्धिः। पूतिगन्धिः। सुगन्धिः। सुरभिगन्धिः। एतेभ्य इति किम्? तीव्रगन्धो वातः॥ गन्धस्येत्वे तदेकान्तग्रहणम्॥ तेन शोभनो गन्धोऽस्य सुगन्ध आपणिकः॥

अल्पाख्यायाम् ॥ १३६ ॥

अल्पाख्यायां यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे। सूपोऽल्पोऽस्मिन् सूपगन्धि भोजनम्। अल्पमस्मिन् भोजने घृतं घृतगन्धि। क्षीरगन्धि। अल्पपर्यायो गन्धशब्दः॥

उपमानाच्च ॥ १३७ ॥

उपमानात् परो यो गन्धशब्दस्तस्येकारादेशो भवति समासान्तो बहुव्रीहौ समासे।

पद्मस्येव गन्धोऽस्य पद्मगन्धिः। उत्पलगन्धिः। करीषगन्धिः॥

पादस्य लोपोऽहस्त्यादिभ्यः ॥ १३८ ॥

उपमानादित्येव। उपमानाद् हस्त्यादिवर्जितात् परस्य पादशब्दस्य लोपो भवति समासान्तो बहुव्रीहौ समासे। स्थानिद्वारेण लोपस्य समासान्तता विज्ञायते। व्याघ्रस्येव पादावस्य व्याघ्रपात्। सिंहपात्। अहस्त्यादिभ्य इति किम् ? हस्तिपादः। कटोलपादः॥ हस्तिन्। कटोल। गण्डोल। गण्डोलक। महिला। दासी। गणिका। कुसूल॥

कुम्भपदीषु च ॥ १३९ ॥

कुम्भपदीप्रभृतयः कृतपादलोपाः समुदाया एव पठ्यन्ते। तत्रैवं सूत्रं ज्ञेयम्। पादस्य लोपो भवति कुम्भपद्यादिविषये, यथा कुम्भपद्यादयः सिध्यन्ति। समुदायपाठस्य च प्रयोजनं विषयनियमः—स्त्रियामेव, तत्र ङीप्रत्यय एव, नान्यदा[1]। कुम्भपदी। शतपदी। यच्चेहोप- मानपूर्वं संख्यापूर्वं च पठ्यते, तस्य सिद्धे लोपे नित्यङीबर्थं वचनम्। 'पादोऽन्यतरस्याम्' (४.१.८) इति विकल्पो न भवति॥ कुम्भपदी। शतपदी। अष्टापदी। जालपदी। एकपदी। मालापदी। मुनिपदी। गोधापदी। गोपदी। कलशीपदी। घृतपदी। दासीपदी। निष्पदी। आर्द्रपदी। कुणपदी। कृष्णपदी। द्रोणपदी। द्रुपदी। शकृत्पदी। सूपपदी। पञ्चपदी। अर्वपदी। स्तनपदी। कुम्भपद्यादिः॥

संख्यासुपूर्वस्य ॥ १४० ॥

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेः पादशब्दान्तस्य लोपो भवति समासान्तः। द्वौ पादावस्य द्विपात्। त्रिपात्। शोभनौ पादावस्य सुपात्॥

वयसि दन्तस्य दतृ ॥ १४१ ॥

संख्यापूर्वस्य सुपूर्वस्य च बहुव्रीहेर्यो दन्तशब्दस्तस्य दतृ इत्ययमादेशो भवति समा- सान्तो वयसि गम्यमाने। ऋकार उगित्कार्यार्थः। द्वौ दन्तावस्य द्विदन्। त्रिदन्। चतुर्दन्। शोभना दन्ता अस्य समस्ता जाताः। सुदन् कुमारः। वयसीति किम् ? द्विदन्तः कुञ्जरः। सुदन्तो दाक्षिणात्यः॥

छन्दसि च ॥ १४२ ॥

छन्दसि च दन्तशब्दस्य दतृ इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे।

---

१ - ' नान्यत्र ' इति बाल०।

पत्रदतमालभेत। उ॒भ॒यादंतः (ऋ० १०.९०.१०) आलभते॥

स्त्रियां संज्ञायाम् ॥ १४३ ॥

स्त्रियामन्यपदार्थे संज्ञायां विषये दन्तशब्दस्य दतृ इत्ययमादेशो भवति। अयोदती। फालदती। संज्ञायामिति किम् ? समदन्ती। स्निग्धदन्ती॥

विभाषा श्यावारोकाभ्याम् ॥ १४४ ॥

श्याव अरोक इत्येताभ्यां परस्य दन्तशब्दस्य दतृ इत्ययमादेशो भवति विभाषा समासान्तो बहुव्रीहौ। श्यावदन्, श्यावदन्तः। अरोकदन्, अरोकदन्तः। अरोको निर्दीप्तिः। संज्ञायामित्येव—श्यावदन्तः। अरोकदन्तः॥

अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च ॥ १४५ ॥

विभाषेत्येव। अग्रान्ताच्छब्दात् शुद्ध शुभ्र वृष वराह इत्येतेभ्यश्च परस्य दन्तशब्दस्य विभाषा दतृ इत्ययमादेशो भवति समासान्तो बहुव्रीहौ समासे। कुड्मलाग्रदन्, कुड्मलाग्रदन्तः। शुद्धदन्, शुद्धदन्तः। शुभ्रदन्, शुभ्रदन्तः। वृषदन्, वृषदन्तः। वराहदन्, वराहदन्तः। अनुक्तसमुच्चयार्थश्चकारः। अहिदन्, अहिदन्तः। मूषिकदन्, मूषिकदन्तः। गर्दभदन्, गर्दभदन्तः। शिखरदन्, शिखरदन्तः॥

ककुदस्यावस्थायां लोपः ॥ १४६ ॥

ककुदशब्दान्तस्य बहुव्रीहेर्लोपो भवति समासान्तोऽवस्थायां गम्यमानायाम्। काला- दिकृता वस्तुधर्मा वयःप्रभृतयोऽवस्थेत्युच्यते। असञ्जातं ककुदमस्य असंजातककुत्। बाल इत्यर्थः। पूर्णककुत्। मध्यमवया इत्यर्थः। उन्नतककुत्। वृद्धवया इत्यर्थः। स्थूलककुत्। बलवानित्यर्थः। यष्टिककुत्। नातिस्थूलो नातिकृश इत्यर्थः। अवस्थायामिति किम् ? श्वेतककुदः॥

त्रिककुत् पर्वते ॥ १४७ ॥

त्रिककुदि बहुव्रीहौ ककुदशब्दस्य लोपः समासान्तो निपात्यते पर्वतेऽभिधेये। त्रीणि ककुदान्यस्य त्रिककुत् पर्वतः। ककुदाकारं पर्वतस्य शृङ्गं ककुदमित्युच्यते। न च सर्वस्त्रिशिखरः पर्वतस्त्रिककुत्। किं तर्हि ? संज्ञैषा पर्वतविशेषस्य। पर्वत इति किम् ? त्रिककुदोऽन्यः॥

---

१ - 'उभयतोदतः' इति न्यासे ।

उद्विभ्यां काकुदस्य ॥ १४८ ॥

उद् वि इत्येताभ्यां परस्य काकुदशब्दस्य लोपो भवति बहुव्रीहौ समासे। उद्गतं काकुदमस्य उत्काकुत्। विकाकुत्। तालु काकुदमुच्यते॥

पूर्णाद् विभाषा ॥ १४९ ॥

पूर्णात् परस्य काकुदशब्दस्य विभाषा लोपो भवति बहुव्रीहौ समासे। पूर्णं काकुदमस्य पूर्णकाकुत्, पूर्णकाकुदः॥

सुहृद्दुर्हृदौ मित्रामित्रयोः ॥ १५० ॥

सुहृद् दुर्हृद् इति निपात्यते यथासंख्यं मित्रामित्रयोरभिधेययोः। सुशब्दात् परस्य हृदयशब्दस्य हृद्भावो निपात्यते बहुव्रीहौ, तथा दुःशब्दात् परस्य। शोभनं हृदयमस्य सुहृद् मित्रम्। दुष्टं हृदयमस्य दुर्हृद् अमित्रम्। मित्रामित्रयोरिति किम् ? सुहृदयः कारुणिकः। दुर्हृदयश्चोरः॥

उरःप्रभृतिभ्यः कप् ॥ १५१ ॥

उरःप्रभृत्यन्ताद् बहुव्रीहेः कप् प्रत्ययो भवति। व्यूढमुरोऽस्य व्यूढोरस्कः। प्रियसर्पिष्कः। अवमुक्तोपानत्कः। पुमान् अनड्वान् पयो नौर्लक्ष्मीरिति विभक्त्यन्ताः पठ्यन्ते, न प्रातिपदिकानि। तत्रेदं प्रयोजनम्—एकवचनान्तानामेव ग्रहणमिह विज्ञायेत, द्विवचनबहुवचनान्तानां मा भूदिति। तत्र 'शेषाद् विभाषा' (५.४.१५४) इति विकल्प एव भवतीति। द्विपुमान्, द्विपुंस्कः। बहुपुमान्, बहुपुंस्कः॥ उरस्। सर्पिस्। उपानह्। पुमान्। अनड्वान्। नौः। पयः। लक्ष्मीः। दधि। मधु। शालि। अर्थान्नञः (ग० सू० १६२)। अनर्थकः॥

इनः स्त्रियाम् ॥ १५२ ॥

इन्नन्ताद् बहुव्रीहेः कप् प्रत्ययो भवति स्त्रियां विषये। बहवो दण्डिनोऽस्यां शालायां बहुदण्डिका शाला। बहुच्छत्रिका। बहुस्वामिका नगरी। बहुवाग्मिका सभा। स्त्रियामिति किम् ? बहुदण्डी राजा, बहुदण्डिकः। 'शेषाद् विभाषा' (५.४.१५४) इत्येतद् भवति॥

नद्यृतश्च ॥ १५३ ॥

नद्यन्ताद् बहुव्रीहेर्ऋकारान्तात् च कप् प्रत्ययो भवति। बह्व्यः कुमार्योऽस्मिन् देशे बहुकुमारीको देशः। बहुब्रह्मबन्धूकः। ऋतः खल्वपि—बहुकर्तृकः। तकारो मुखसुखो-

च्चारणार्थः॥

शेषाद् विभाषा ॥ १५४ ॥

यस्माद् बहुव्रीहेः समासान्तो न विहितः स शेषः, तस्माद् विभाषा कप्प्रत्ययो भवति। बह्व्यः खट्वा अस्मिन् बहुखट्वकः। बहुमालकः। बहुवीणकः। बहुखट्वाकः। बहुमालाकः। बहुवीणाकः। बहुखट्वः। बहुमालः। बहुवीणः। कथमनृक्कं साम बह्वृक्कं सूक्तमिति, यावता विहितोऽत्र सामान्येन समासान्त 'ऋक्पूः०' (५.४.७४) इति? नैतदस्ति। विशेषे स इष्यते, अनृचो माणवके ज्ञेयो बह्वृचश्चरणाख्यायाम् (५.४.७४) इति। शेषादिति किम्? प्रियपथः। प्रियधुरः॥

न संज्ञायाम् ॥ १५५ ॥

संज्ञायां विषये बहुव्रीहौ समासे कप् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। विश्वे देवा अस्य विश्वदेवः। विश्वयशाः॥

ईयसश्च ॥ १५६ ॥

ईयसन्ताद् बहुव्रीहेः कप् प्रत्ययो न भवति। सर्वा प्राप्तिः प्रतिषिध्यते। बहवः श्रेयांसोऽस्य बहुश्रेयान्। 'शेषाद् विभाषा' (५.४.१५४) इत्यस्य प्रतिषेधः। बह्व्यः श्रेयस्योऽस्य बहुश्रेयसी। 'नद्यृतश्च' (५.४.१५३) इत्यस्य प्रतिषेधः। ह्रस्वत्वमपि न भवति। ईयसो बहुव्रीहौ पुंवदिति वचनात् (महाभाष्य १.२२४)॥

वन्दिते भ्रातुः ॥ १५७ ॥

वन्दितेऽर्थे यो भ्रातृशब्दो वर्तते तदन्ताद् बहुव्रीहेः कप् प्रत्ययो न भवति। वन्दितः स्तुतः पूजित इत्युच्यते। शोभनो भ्रातास्य सुभ्राता। वन्दित इति किम् ? मूर्खभ्रातृकः। दुष्टभ्रातृकः॥

ऋतश्छन्दसि ॥ १५८ ॥

ऋवर्णान्ताद् बहुव्रीहेश्छन्दसि विषये कप् प्रत्ययो न भवति। हता मातास्य ह॑ृत- मा॑ता (शौ० सं० २.३२.४)। हतपिता। ह॑ृतस्व॑सा (शौ० सं० २.३२.४)। सुहो॑ता (ऋ० ७.६७.३)॥

---

१ - 'मुखसुखार्थः' इति है०।

नाडीतन्त्र्योः स्वाङ्गे ॥ १५९ ॥

स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्ताद् बहुव्रीहेः कप् प्रत्ययो न भवति। बह्व्यो नाड्योऽस्य बहुनाडिः कायः। बहुतन्त्रीर्ग्रीवा। धमनीवचनस्तन्त्रीशब्दः। स्वाङ्ग इति किम्? बहुनाडीकः स्तम्भः। बहुतन्त्रीका वीणा॥

निष्प्रवाणिश्च ॥ १६० ॥

निष्प्रवाणिरिति नदीलक्षणस्य कपः प्रतिषेधो निपात्यते। प्रोयतेऽस्यामिति प्रवाणी। प्रवयन्ति तयेति वा प्रवाणी। करणसाधनोऽयं ल्युट्। तन्तुवायशलाका भण्यते। निर्गता प्रवाणी अस्य निष्प्रवाणिः पटः। निष्प्रवाणिः कम्बलः। अपनीतशलाकः समाप्तवानः प्रत्यग्रो नवक उच्यते॥

॥ इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ पञ्चमाध्यायस्य चतुर्थः पादः॥

— o —